**VYAKARANAM** **SASTRI I[st] YEAR**

**Paper - II**

# VAYAKARASIDDANTAKOUMUDI

*( Sabdadikare ajantha prakaranam, Sripratyayakarakaprakaranam)*


**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Tirupati - 517 507 (A.P.)

# विषयसूची


| विषयः | पृष्ठसङ्ख्या |
|---|---|
| १. अजन्तपुंल्लिङ्गप्रकरणम् | १ |
| २. अजन्तस्त्रीलिङ्गप्रकरणम् | ३१ |
| ३. अजन्तनपुंसकलिङ्गप्रकरणम् | ४० |
| ४. स्त्रीप्रत्ययानां तथा लिङ्गविधानव्यवस्थायाः सामान्यकथनम् | ४६ |
| ५. टाप्–ड़प्–चाप्–ऊङ्–ति–प्रत्ययविधायकसूत्राणां विवरणम् | ६६ |
| ६. ङीप्–ङीष्–ङीन्–प्रत्ययविधाकसूत्राणां विवरणम् | ८० |
| ७. कारकलक्षणविचारपूर्वकं कारकविभक्तीनाञ्च सामान्यकथनम् | ९६ |
| ८. द्वितीया–तृतीया–विभक्तिविधानविचारः | ११० |
| ९. चतुर्थी–पञ्चमी–विभक्तिविधानविचारः | १३३ |
| १०. षष्ठी–सप्तमी–विभक्तिविधानविचारः | १५३ |

# प्रथमखण्डः

# ।। अजन्तपुंल्लिङ्गप्रकरणम् ।।

**संरचना**

१.० प्रस्तावना।

१.१ लक्षिताधिगमविशेषाः।

१.२.० अकारान्तपुंल्लिङ्गशब्दाः।

१.३.० आकारान्तपुंल्लिङ्गशब्दाः।

१.४.० इकारान्तपुंल्लिङ्गशब्दाः।

१.५.० ईकारान्तपुंल्लिङ्गशब्दाः।

१.६.० उकारान्तपुंल्लिङ्गशब्दाः।

१.७.० ऊकारान्तपुंल्लिङ्गशब्दाः।

१.८.० ऋकारान्तपुंल्लिङ्गशब्दाः।

१.९.० ओकारान्तपुंल्लिङ्गशब्दाः।

१.१०.० ऐकारान्तपुंल्लिङ्गशब्दाः।

## १.० प्रस्तावना -

एतावत्पर्यन्तमस्माभिः सिद्धान्तकौमुद्यां प्राधान्येन सप्त प्रकरणानि अधीतानि। सञ्ज्ञाप्रकरणम्, परिभाषाप्रकरणम्, तथा पञ्च सन्धिप्रकरणानि। सञ्ज्ञाप्रकरणे **सुप्तिङन्तं पदम् (१.४.१४)** इति सूत्रेण पदसञ्ज्ञा विहिता। तत्र **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ-सोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण प्रातिपदिकात् एकविंशतिः सुप्प्रत्ययाः विहिताः। सर्वेषु शब्देषु प्रकृतिः प्रत्ययश्च भवतः। सुप् = प्रत्ययाः भवन्ति। सुप्प्रत्ययाः प्रातिपदिकात् विधीयन्ते इति प्रातिपदिकं प्रकृतिः भवति। प्रथमा द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी सप्तमी इति सप्त विभक्तयः भवन्ति। एकवचनं द्विवचनं बहुवचनम् इति त्रीणि वचनानि भवन्ति। त्रिषु वचनेषु सप्तसु विभक्तिषु एकविंशतिः प्रत्ययाः विभक्ताः।

वर्णाः द्विधा विभक्ताः। स्वरवर्णाः व्यञ्जनवर्णाः च इति। तत्र स्वरवर्णाः अच्-प्रत्याहारे अन्तर्भवन्ति। व्यञ्जनवर्णाः हल्-प्रत्याहारे अन्तर्भवन्ति। अतः शब्दाः अपि द्विधा विभक्ताः। अजन्तशब्दाः हलन्तशब्दाः च इति। अच् अन्ते येषां ते अजन्ताः, अजन्ताः च ते शब्दाः अजन्तशब्दाः। हल् अन्ते येषां ते हलन्ताः। हलन्ताः च ते शब्दाः हलन्तशब्दाः। अजन्तहलन्तशब्दयोः पुनः लिङ्गमाश्रित्य त्रिधा भेदः भवित। पुंल्लिङ्गः स्त्रीलिङ्गः नपुंसकलिङ्गः इति। येषां शब्दानां व्यवहारः पुंल्लिङ्गे अस्ति ते पुंल्लिङ्गशब्दाः, येषां शब्दानां व्यवहारः स्त्रीलिङ्गे

अस्ति ते स्त्रीलिङ्गशब्दाः, येषां शब्दानां व्यवहारः नपुंसकल्लिङ्गे अस्ति ते नपुंसकलिङ्गशब्दाः भवन्ति। केचन शब्दाः द्वयोः लिङ्गयोः, केचन शब्दाः त्रिषु लिङ्गेषु च वर्तन्ते। तथा व्यवहारसत्त्वात्।

अस्मिन् प्रकरणे अजन्तपुंल्लिङ्गशब्देषु अकारान्त-आकारान्त-इकारान्त-ईकारान्त-ऊकारान्त-ऋकारान्त- एकारान्त-ओकारान्त-ऐकारान्तशब्दानां विषये ससूत्रं ज्ञास्यामः।

## १.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः-

- सुप्प्रत्ययान् ज्ञास्यन्ति।
- अजन्तपुंल्लिङ्गशब्दान् ज्ञास्यन्ति।
- सर्वेषाम् अजन्तपुंल्लिङ्गशब्दानां परिचयं प्राप्नुवन्ति।
- एकं शब्दं ज्ञात्वा बहून् शब्दान् वक्तुं प्रभवन्ति।
- अजन्तपुंल्लिङ्गप्रकरणस्थानि सूत्राणि तेषामर्थं च ज्ञास्यन्ति।
- वाक्यप्रयोगवेलायां विभक्तिपरिवर्तनं ज्ञास्यन्ति।

## १.२.० अकारान्तपुंल्लिङ्गशब्दाः -

### १.२.१ रामशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

अजन्तपुंल्लिङ्गप्रकरणे कौमुद्यां बहूनि सूत्राणि सन्ति आदौ शब्दाधिकारस्य सर्वोपयोगित्वात् कानिचन सूत्राणि तथा रामशब्दस्य साधनार्थं यानि सूत्राणि अपेक्षन्ते तथा प्रकरणवशात् आगतानि यानि सूत्राणि तानि अत्र प्रस्तूयन्ते-

**(१७८) अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१.२.४५)** सूत्रार्थः - धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसञ्ज्ञं स्यात्- इति।

**(१७९) कृत्तद्धितसमासाश्च (१.२.४६)** कृदन्ततद्धितान्तौ समासाश्च प्रातिपदिकसञ्ज्ञाः स्युः।

**(१८०) प्रत्ययः (३.१.१)** पञ्चमाध्यायसमाप्तिपर्यन्तम् अस्य अधिकारः अस्ति।

**(१८१) परश्च (३.१.२)** अस्यापि पञ्चमाध्यायसमाप्तिपर्यन्तम् अधिकारः अस्ति।

**(१८२) ङ्याप्प्रातिपदिकात् (४.१.१)** ङ्यन्तात् आबन्तात् प्रातिपदिकात् इति पञ्चमाध्यायसमाप्तिपर्यन्तम् अधिकारः अस्ति।

इदानीं सुप्प्रत्ययविधायकं सूत्रं कथयति-

**(१८३) स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** सूत्रार्थः - ङ्यन्तात् आबन्तात् प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः- इति। सु-औ-जस्, अम्-औट्-शस्, टा-भ्याम्-भिस्, ङे-भ्याम्-भ्यस्, ङसि-भ्याम्-भ्यस्, ङस्-ओस्-आम्, ङि-ओस्-सुप् इति एकविंशतिः प्रत्ययाः भवन्ति। 'सु' इति आदिमप्रत्ययमारभ्य 'सुप्' इति अन्तिमप्रत्ययस्य पकारपर्यन्तं 'सुप्' इति व्यवहारः।

**(१८४) विभक्तिश्च (१.४.१०४)** सूत्रार्थः - सुप्तिङौ विभक्तिसञ्ज्ञौ स्तः- इति। सुप्प्रत्ययाः ज्ञाताः। तिङ्प्रत्ययाः तिङन्तप्रकरणे वक्ष्यन्ते। तेषां प्रत्ययानां क्रमेण प्रथमा-इत्यादिसप्तमीपर्यन्तं प्राचां सञ्ज्ञाः। ताभिः एव सञ्ज्ञाभिः अत्र व्यवह्रियते।

**(१८५) सुपः (१.४.१०३)** सूत्रार्थः - सुपः त्रीणि त्रीणि वचनानि एकशः एकवचनद्विवचनबहुवचनसञ्ज्ञानि स्युः- इति। सु-औ-जस् इति त्रयाणाम् एकवचनद्विवचनबहुवचनसञ्ज्ञानि स्युः। एवं क्रमेण अम्-औट्-शस् इत्यादीनाम्।

**(१८६) द्व्येकयोर्द्विवचनैकवचने (१.४.२२)** सूत्रार्थः - द्वित्वस्य द्विवचनप्रत्ययः एकत्वस्य एकवचनप्रत्ययश्च भवति- इति।

**(१८७) बहुषु बहुवचनम् (१.४.२१)** सूत्रार्थः - बहुत्वे बहुवचनप्रत्ययः भवति- इति।

**(१८८) सरूपाणामेकशेष एकविभक्तौ (१.२.६४)** सूत्रार्थः - एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते- इति। द्विवचने राम राम इति स्थिते, बहुवचने राम राम राम इति स्थिते तत्र एक एव राम इति शिष्यते इत्यर्थः।

**(१८९) चुटू (१.३.७)** सूत्रार्थः - प्रत्ययस्य आदौ विद्यमानयोः चवर्गटवर्गयोः इत्सञ्ज्ञा भवति - इति।

**(१९०) न विभक्तौ तुस्माः (१.३.४)** सूत्रार्थः - विभक्तिसञ्ज्ञायुक्ताः तवर्गसकारमकाराः इत्सञ्ज्ञां न प्राप्नुवन्ति।

**(१९१) अतो गुणे (६.१.९७)** सूत्रार्थः - अपदान्तात् अकाराद् गुणे परतः पररूपमेकादेशः स्यात्- इति।

**(१९२) एकवचनं सम्बुद्धिः (२.३.४९)** सूत्रार्थः - सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसञ्ज्ञं स्यात्- इति।

**(१९३) एङ्ह्रस्वात्सम्बुद्धेः (६.१.६९)** सूत्रार्थः - एङन्तात् ह्रस्वान्तात् अङ्गात् परस्य सम्बुद्धेः हलः लोपो भवति- इति।

**(१९४) अमि पूर्वः (६.१.१०७)** सूत्रार्थः - अक्वर्णानाम् अम्प्रत्ययस्य अचि परतः पूर्वरूपमेकादेशः स्यात्- इति।

**(१९५) लशक्वतद्धिते (१.३.८)** सूत्रार्थः - तद्धितप्रत्ययान् विहाय अन्येषां प्रत्ययानाम् आदौ विद्यमानाः लकारशकारकवर्गाः इत्सञ्ज्ञां प्राप्नुवन्ति- इति।

**(१९६) तस्माच्छसो नः पुंसि (६.१.१०३)** सूत्रार्थः - पूर्वसवर्णदीर्घकरणानन्तरं शस्प्रत्ययस्य यः सकारः तस्य नकारो भवति पुंल्लिङ्गे- इति।

**(१९७) अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२)** सूत्रार्थः - अट्वर्णाः कवर्गः पवर्गः आङ् नुम् एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे- इति।

**(१९८) पदान्तस्य (८-४-३७)** सूत्रार्थः - पदान्तस्य नस्य णत्वं न स्यात्- इति।

**(१९९) यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१-४-१३)** सूत्रार्थः - यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परेऽङ्गसञ्ज्ञं स्यात्- इति।

**(२००) अङ्गस्य (६-४-१)** इति अधिकारसूत्रम्।

(२०१) **टाङसिङसामिनात्स्याः (७-१-१२)** सूत्रार्थः – अकारान्तात् अङ्गात् परं विद्यमानस्य टाप्रत्ययस्य इन-आदेशः ङसिप्रत्ययस्य आत्-आदेशः ङस्प्रत्ययस्य स्य-आदेशः क्रमात् भवति – इति।

**(२०२) सुपि च (७-३-१०२)** सूत्रार्थः – यञादौ सुपि परे ह्रस्व-अकारान्ताङ्गस्य दीर्घः स्यात् – इति।

**(२०३) अतो भिस् ऐस् (७-१-९)** सूत्रार्थः – अकारान्तादङ्गात् परस्य भिस्प्रत्ययस्य ऐस् आदेशः स्यात् – इति।

**(२०४) ङेर्यः (७-१-१३)** सूत्रार्थः – अकारान्तादङ्गात् परस्य ङेप्रत्ययस्य इत्यस्य यादेशः स्यात् – इति।

**(२०५) बहुवचने झल्येत् (७-३-१०३)** सूत्रार्थः – बहुवचने झलादिसुप्रत्यये परे अकारान्ताङ्गस्य एकारः स्यात् – इति। येषां सुप्रत्ययानाम् आदौ झल्वर्णाः भवन्ति ते झलादिसुप्रत्ययाः।

**(२०६) वाऽवसाने (८-४-५६)** सूत्रार्थः – अवसाने परे झलां चरो वा स्युः – इति।

**(२०७) ओसि च (७-३-१०४)** सूत्रार्थः – ओसि परे अकारान्ताङ्गस्य एकारः स्यात् – इति।

**(२०८) ह्रस्वनद्यापो नुट् (७-१-५४)** सूत्रार्थः – ह्रस्वान्तात् नद्यन्तात् आबन्ताच्च अङ्गात् परस्य आम्प्रत्ययस्य नुडागमः स्यात् – इति।

**(२०९) नामि (६-४-३)** सूत्रार्थः – नामि परे अजन्ताङ्गस्य दीर्घः स्यात् – इति।

**(२१०) अपदान्तस्य मूर्धन्यः (८-३-५५)** आपादपरिसमाप्तेरधिकारोऽयम्।

**(२११) इण्कोः (८-३-५७)** इत्यधिकृत्य।

**(२१२) आदेशप्रत्यययोः (८-३-५९)** सूत्रार्थः – इण्वर्णानां परस्य, कवर्गस्य परस्य, अपदान्तस्य, आदेशः प्रत्ययावयवश्च यः सकारः तस्य मूर्धन्यादेशः स्यात् – इति। सकारस्य मूर्धन्यादेशः इत्युक्ते षकारः भवति।

सुप्रत्ययेषु केषां का विभक्तिः, केषां किं वचनम् इति पट्टिकायां पश्यामः

### १.२.२ विभक्तिवचनैः सह सुप्रत्ययानां पट्टिका -

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सु | औ | जस् |
| द्वितीया | अम् | औट् | शस् |
| तृतीया | टा | भ्याम् | भिस् |
| चतुर्थी | ङे | भ्याम् | भ्यस् |
| पञ्चमी | ङसि | भ्याम् | भ्यस् |
| षष्ठी | ङस् | ओस् | आम् |
| सप्तमी | ङि | ओस् | सुप् |

एवं क्रमेण ज्ञातुं शक्यते।

## १.२.३ इत्सञ्ज्ञानन्तरं सुप्प्रत्ययानां स्थितिः -

इदानीम् एकविंशतिप्रत्ययेषु केषां प्रत्ययानां कस्य वर्णस्य इत्सञ्ज्ञा केन सूत्रेण भवति किं रूपम् अवशिष्यते इति जानीमः।

| प्रत्ययः | इत्सञ्ज्ञकवर्णः | अवशिष्टं रूपम् | सूत्रम् |
|---|---|---|---|
| सु | उकारः | स् | उपदेशेऽजनुनासिक इत् (१.३.२) |
| औ | ——— | औ | |
| जस् | जकारः | अस् | चुटू (१.३.७) |
| अम् | — | अम् | |
| औट् | टकारः | औ | हलन्त्यम् (१.३.३) |
| शस् | शकारः | अस् | लशक्वतद्धिते (१.३.८) |
| टा | टकारः | आ | चुटू (१.३.७) |
| भ्याम् | — | भ्याम् | |
| भिस् | — | भिस् | |
| ङे | ङकारः | ए | लशक्वतद्धिते (१.३.८) |
| भ्याम् | — | भ्याम् | |
| भ्यस् | — | भ्यस् | |
| ङसि | ङकारः इकारः | अस् | लशक्वतद्धिते (१.३.८), उपदेशेऽजनुनासिक इत् (१.३.२) |
| भ्याम् | — | भ्याम् | |
| भ्यस् | — | भ्यस् | |
| ङस् | ङकारः | अस् | लशक्वतद्धिते (१.३.८) |
| ओस् | — | ओस् | |
| आम् | — | आम् | |
| ङि | ङकारः | इ | लशक्वतद्धिते (१.३.८) |
| ओस् | — | ओस् | |
| सुप् | — | सु | हलन्त्यम् (१.३.३) |

सर्वत्र इत्सञ्ज्ञानन्तरं तस्य लोपः (१.३.९) इति सूत्रेण इत्सञ्ज्ञकवर्णानां लोपः भवति इति ज्ञातव्यम्।

## १.२.४ रामशब्दस्य प्रक्रिया -

प्रत्यये इत्सञ्ज्ञकवर्णानां लोपानन्तरं यः भागः अवशिष्यते प्रत्ययस्य स एव भागः प्रक्रियायां शब्दस्य समनन्तरं दीयते। अतः इत्सञ्ज्ञाविधायकसूत्राणि तथा तेषां लोपं विधातुं **तस्य लोपः (१.३.९)** इति सूत्रं च तत्र तत्र स्मर्तव्यं भवति।

**रामः - प्रथमाविभक्त्येकवचनरूपम्**

राम+स्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण सुप्रत्ययः।

राम+र्- **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

रामः इति। **खरवसानयोर्विसर्जनीयः (८.३.१५)** इति सूत्रेण रोः विसर्गः। रामः।

**रामौ - प्रथमाविभक्तिद्विवचनरूपम्**

राम+औ **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण औप्रत्ययः।

रामौ इति। **वृद्धिरेचि (६.१.८८)** इति सूत्रेण वृद्धिः। रामौ। सम्बोधानाविभक्तेः द्विवचनस्य तथा द्वितीयाविभक्तिद्विचनस्यापि एवमेव रूपं प्रक्रिया च।

**रामाः - प्रथमाविभक्तिबहुवचनरूपम्**

राम+अस् **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण जस्प्रत्ययः।

रामा+अस् **प्रथमयोः पूर्वसवर्णः (६.१.१०२)** इति सूत्रेण पूर्वसवर्णदीर्घः।

रामा+अर् **ससजुषो रुः (८.२.६६)** इति सूत्रेण रुत्वम्।

रामाः इति। **खरवसानयोर्विसर्जनीयः (८.३.१५)** इति सूत्रेण रोः विसर्गः। रामाः। सम्बोधनाविभक्तेः बहुवचनस्यापि एवमेव रूपं प्रक्रिया च।

**हे राम - सम्बोधनप्रथमाविभक्त्येकवचनरूपम्**

हे राम+स्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण सुप्रत्ययः।

हे राम+स् **एकवचनं सम्बुद्धिः (२.३.४९)** इति सूत्रेण स्प्रत्ययस्य सम्बुद्धिसञ्ज्ञा।

**हे राम** इति। **एङ्ह्रस्वात्सम्बुद्धेः (६.१.६९)** इति सूत्रेण स्प्रत्ययस्य लोपः। हे राम।

**रामम् - द्वितीयाविभक्त्येकवचनरूपम्**

राम+अम्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण अम्प्रत्ययः।

रामम् इति। **अमि पूर्वः (६.१.१०७)** इति सूत्रेण पूर्वरूपम्। रामम्।

**रामान् - द्वितीयाविभक्तिबहुवचनरूपम्**

राम+अस्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण शस्प्रत्ययः।

रामास् **प्रथमयोः पूर्वसवर्णः (६.१.१०२)** इति सूत्रेण पूर्वसवर्णदीर्घः।

रामान् इति। **तस्माच्छसो नः पुंसि (६.१.१०३)** इति सूत्रेण सकारस्य नकारः। रामान्।

**रामेण - तृतीयाविभक्त्येकवचनरूपम्**

राम+टा, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण टाप्रत्ययः।

राम+इन **टाङसिङसामिनात्स्याः (७-१-१२)** इति सूत्रेण इन-आदेशः।

रामेन **आद्गुणः (६.१.८७)** इति सूत्रेण गुणः।

रामेण इति। **अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२)** इति सूत्रेण नकारस्य णत्वम्। रामेण।

**रामाभ्याम् - तृतीयाविभक्तिद्विवचनरूपम्**

राम+भ्याम् **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण भ्याम्प्रत्ययः।

रामाभ्याम् इति। **सुपि च (७-३-१०२)** इति सूत्रेण अकारस्य दीर्घः। रामाभ्याम्। चतुर्थीपञ्चमीविभक्तिद्विवचनेऽपि एवमेव रूपम्। एषैव प्रक्रिया।

**रामैः - तृतीयाविभक्तिबहुवचनरूपम्**

राम+भिस्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण भिस्प्रत्ययः।

राम+ऐस् **अतो भिस् ऐस् (७-१-९)** इति सूत्रेण भिसः ऐसादेशः।

रामैस् **वृद्धिरेचि (६.१.८८)** इति सूत्रेण वृद्धिः।

रामै+र्, **ससजुषो रुः** (८.२.६६) इति सूत्रेण सकारस्य रुत्वम्।

रामैः इति। **खरवसानयोर्विसर्जनीयः (८.३.१५)** इति सूत्रेण रोः विसर्गः। रामैः।

**रामाय - चतुर्थीविभक्त्येकवचनरूपम्**

राम+ङे, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण ङेप्रत्ययः।

राम+य **ङेर्यः (७-१-१३)** इति सूत्रेण ङेः यादेशः।

रामाय इति। **सुपि च (७-३-१०२)** इति सूत्रेण अकारस्य दीर्घः। रामाय।

**रामेभ्यः - चतुर्थीविभक्तिबहुवचनरूपम्**

राम+भ्यस्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण भ्यस्प्रत्ययः।

रामे+भ्यस्, **बहुवचने झल्येत्** (७-३-१०३) इति सूत्रेण अकारस्य एकारः।

रामेभ्यर् - **ससजुषो रुः** (८.२.६६) इति सूत्रेण सकारस्य रुत्वम्।

रामेभ्यः इति। **खरवसानयोर्विसर्जनीयः (८.३.१५)** इति सूत्रेण रोः विसर्गः। रामेभ्यः। पञ्चमीवभक्तिबहुवचनेऽपि एवमेव रूपम्। एषैव प्रक्रिया।

**रामात् - पञ्चमीविभक्त्येकवचनरूपम्**

राम+ङसि **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण ङसिप्रत्ययः।

राम+आत्, **टाङसिङसामिनात्स्याः** (७-१-१२) इति सूत्रेण आत्-आदेशः।

रामात् **अकः सवर्णे दीर्घः** (६.१.१०१) इति सूत्रेण अकारस्य दीर्घः।

रामात्। **वाऽवसाने** (८.४.५६) इति सूत्रेण विकल्पेन तकारः। रामात्।

रामाद् इति। **झलां जशोऽन्ते** (८.२.३९) इति सूत्रेण पक्षे जश्त्वं दकारः। रामाद्।

**रामस्य - षष्ठीविभक्त्येकवचनरूपम्**

राम+ङस् **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण ङस्प्रत्ययः।

रामस्य इति। **टाङसिङसामिनात्स्याः** (७-१-१२) इति सूत्रेण स्य-आदेशः। रामस्य।

**रामयोः - षष्ठीविभक्तिद्विवचनरूपम्**

राम+ओस्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण ओस्प्रत्ययः।

रामे+ओस्, **ओसि च** (७-३-१०४) इति सूत्रेण अकारस्य एकारः।

रामयोस्, **एचोयवायावः** (६-१-७८) इति सूत्रेण अय्-आदेशः।

रामयोर्, **ससजुषो रुः** (८.२.६६) इति सूत्रेण सकारस्य रुत्वम्।

रामयोः इति। **खरवसानयोर्विसर्जनीयः** (८.३.१५) इति सूत्रेण रोः विसर्गः। रामयोः। सप्तमीद्विवचनेऽपि एवमेव रूपम्। एषैव प्रक्रिया।

**रामाणाम् - षष्ठीविभक्तिबहुचनरूपम्**

राम+आम् **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण आम्प्रत्ययः।

राम+नाम् **ह्रस्वनद्यापो नुट्** (७-१-५४) इति सूत्रेण नुट्-आगमः।

रामा+नाम् **नामि** (६-४-३) इति सूत्रेण नामि परे अकारस्य दीर्घः।

रामाणाम् इति। **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इति सूत्रेण नकारस्य णत्वम्। रामाणाम्।

**रामे - सप्तमीविभक्त्येकवचनरूपम्**

राम+इ, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण ङिप्रत्ययः।

रामे इति। **आद्गुणः** (६.१.८७) इति सूत्रेण गुणः। रामे।

**रामेषु - सप्तमीविभक्तिबहुवचनरूपम्**

राम+सु **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) इति सूत्रेण सुप्रत्ययः।

रामे+सु **बहुवचने झल्येत्** (७-३-१०३) इति सूत्रेण एकारः।

रामेषु इति **आदेशप्रत्यययोः** (८-३-५९) इति सूत्रेण षत्वम्। रामेषु।

### १.२.५ रामशब्दस्य सप्तसु विभक्तिषु त्रिषु वचनेषु रूपाणि -

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| सं प्रथमा | हे राम | हे रामौ | हे रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |

एवमेव कृष्णमुकुन्दगोविन्दादि-अकारान्तशब्दानां प्रक्रिया भवति तथा रूपाण्यपि भवन्ति।

**स्वावलोकनप्रश्नाः -**

(१) प्रातिपदिकसञ्ज्ञाविधायकानि सूत्राणि कति ?

(२) सुप् इति प्रत्याहारे कति प्रत्ययाः भवति ?

(३) वचनानि कति ? केन सूत्रेण वचनानि वधीयन्ते ?

(४) कयोः विभक्तिसञ्ज्ञा भवति ? केन सूत्रेण ?

(५) सम्बुद्धिसञ्ज्ञाविधायकं सूत्रं किम् ?

(६) टाङेङसिङस्प्रत्ययानाम्  अकारान्तशब्देषु इत्सञ्ज्ञा न भवति कुतः ?

(७) रामान् इत्यत्र केन सूत्रेण पूर्वसवर्णदीर्घः ?

(८) रामाणाम् इत्यत्र केन सूत्रेण दीर्घः ?

### १.२.६ सर्वशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

प्रागुक्तानि सूत्राणि अपि अपेक्षन्ते। ततः इमानि सूत्राणि अपि अपेक्षन्ते।

**(२१३) सर्वादीनि सर्वनामानि (१-१-२७)** सूत्रार्थः - सर्वादीनि शब्दस्वरूपाणि सर्वनामसञ्ज्ञानि स्युः- इति।

**(२१४) जसः शी (७-१-१७)** सूत्रार्थः - अकारान्तात् सर्वनाम्नः परस्य जसः स्थाने शी इत्यादेशः स्यात्- इति। अनेकाल्त्वात् सर्वादेशः भवति।

**(२१५) सर्वनाम्नः स्मै (७-१-१४)** सूत्रार्थः - अकारान्तात् सर्वनाम्नः परस्य ङे इत्यस्य स्मै आदेशः स्यात्।

**(२१६) ङसिङ्योः स्मात्स्मिनौ (७-१-१५)** सूत्रार्थः - अकारान्तात् सर्वनाम्नः परस्य ङसि इत्यस्य स्मात्- आदेशः भवति ङि इत्यस्य स्मिन्-आदेशः भवति- इति।

**(२१७) आमि सर्वनाम्नः सुट् (७-१-५२)** सूत्रार्थः - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्य आम्प्रत्ययस्य सुट्-आगमः स्यात्- इति। सुट्-आगमे उकारटकारयोः इत्सञ्ज्ञा। स्-इति अवशिष्यते। स्+आम् = साम् इति भवति।

**सर्वादिगणे पञ्चत्रिंशत् शब्दाः पठिताः -**

सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व नेम, सम, सिम। पूर्व पर अवर दक्षिण उत्तर अपर अधर। स्वम्। अन्तरम्। त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् - इति।

उभशब्दो द्वित्वविशिष्टस्य वाचकः। अत एव नित्यं द्विवचनान्तः। डतरडतमौ प्रत्ययान्तौ स्वीकर्तव्यौ। अन्यतरशब्दः द्वित्वविषये निर्धारणे वर्तते। अन्यतमशब्दः बहुत्वविषये निर्धारणे वर्तते। तत्रान्यतमशब्दस्य गणे पाठाभावान्न सर्वनामसंज्ञा। नेमशब्दः अर्धः इत्यर्थे वर्तते। समः सर्वपर्यायः।

(ग) पूर्व-पर-अवर-दक्षिण-उत्तर-अपर-अधराणि व्यवस्थायाम् असंज्ञायाम्। व्यवस्थायाम् असंज्ञायाम् च एते शब्दाः सर्वनामसञ्ज्ञां प्राप्नुवन्ति।

(ग) स्वम् अज्ञातिधनाख्यायाम्। स्व इति शब्दः ज्ञातिः, धनम् इति अर्थद्वयं विहाय अन्येषु अर्थेषु सर्वनामसञ्ज्ञां प्राप्नोति।

(ग) अन्तरं बहिर्योगोपसंव्यानयोः। अन्तरम् इति शब्दः बाह्यः, परिधानीयः इति अर्थद्वये वर्तते।

**१.२.७ सर्वशब्दस्य प्रक्रिया -**

**सर्वे- प्रथमाविभक्त्येकवचनरूपम्**

सर्व+अस्, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण जस्प्रत्ययः।

सर्व+शी **जसः शी (७.१.१७)** इति सूत्रेण शी-इति आदेशः।

सर्व+ई **लशक्वतद्धिते (१.३.८)** इति सूत्रेण शकारस्य इत्सञ्ज्ञा।

सर्वे इति। **आद्गुणः (६.१.८७)** इति सूत्रेण गुणः। सर्वे।

**सर्वस्मै - चतुर्थीविभक्त्येकवचनरूपम्**

सर्व+ङे **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण ङेप्रत्ययः।

सर्वस्मै इति। **सर्वनाम्नः स्मै (७-१-१४)** इति सूत्रेण स्मै इति आदेशः। सर्वस्मै।

**सर्वस्मात् - पञ्चमीविभक्त्येकवचनरूपम्**

सर्व+स्मात् **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण स्मात्प्रत्ययः।

सर्वस्मात् इति। **ङसिङ्योः स्मात्स्मिनौ (७-१-१५)** इति सूत्रेण स्मात्-आदेशः। सर्वस्मात्।

**सर्वेषाम् - षष्ठीविभक्तिबहुवचनरूपम्**

सर्व+आम् **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण आम्प्रत्ययः।

सर्व+साम्, **आमि सर्वनाम्नः सुट् (७-१-५२)** इति सूत्रेण सुट्-आगमः।

सर्वे+साम्, **बहुवचने झल्येत् (७-३-१०३)** इति सूत्रेण अकारस्य एकारः।

सर्वेषाम् इति। **आदेशप्रत्यययोः (८-३-५९)** इति सूत्रेण षत्वम्। सर्वेषाम्।

**सर्वस्मिन् - सप्तमीविभक्त्येकवचनरूपम्**

सर्व+ङि, **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण ङिप्रत्ययः।

सर्वस्मिन् इति। **ङसिङ्योः स्मात्स्मिनौ (७-१-१५)** इति सूत्रेण स्मिन्-आदेशः। सर्वस्मिन्। अन्यानि रूपाणि रामशब्दवत् एव भवन्ति। एवं सर्वादिगणे अकारान्ताः ये शब्दाः सन्ति तेषां सर्वेषामपि रूपाणि एवमेव भवन्ति। प्रक्रिया अपि एवमेव भवति।

**स्वावलोकनप्रश्नाः -**

(१) सर्वशब्दस्य प्रथमाबहुवचने किं रूपम् ?

(२) सर्वशब्दस्य तृतीयाबहुवचने किं रूपम् ?

(३) स्व-इति शब्दस्य कयोः अर्थयोः सर्वनाम्नसञ्ज्ञा न भवति ?

## १.२.८ सर्वनामसञ्ज्ञायाः विकल्पः -

**(२१८) पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (१-१-३४)** सूत्रार्थः - पूर्व-पर-अवर-दक्षिण-उत्तर- अपर-अधर-इत्येतेषां व्यवस्थायाम् असञ्ज्ञायां च अर्थे सर्वनामसंज्ञा गणपाठात् सर्वत्र या प्राप्ता सा जसि परे वा स्यात्- इति।

उदाहरणम्- पूर्वे। पूर्वाः। स्वाभिधेयापेक्षावधिनियमः व्यवस्था। विकल्पेन शी-इत्यादेशे पूर्वे इति सर्वे इतिवत् रूपम्। शी-इत्यादेशाभावे रामाः इतिवत् पूर्वाः इति च रूपम्।

**(२१९) स्वमज्ञातिधनाख्यायाम् (१-१-३५)** सूत्रार्थः - ज्ञातिः, धनम् इति अर्थद्वयं विहाय अन्येषु अर्थेषु स्वशब्दस्य या प्राप्ता सर्वनामसंज्ञा सा जसि परे वा स्यात्- इति।

उदाहरणम्- स्वे। स्वाः। आत्मीया इत्यर्थः। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोऽर्था वा। विकल्पेन शी-इत्यादेशे स्वे इति सर्वे इतिवत् रूपम्। शी-इत्यादेशाभावे रामाः इतिवत् स्वाः इति च रूपम्।

(२२०) **अन्तरं बहिर्योगोपसंव्यानयोः** (१-१-३६) सूत्रार्थः - बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य या प्राप्ता सर्वनामसंज्ञा सा जसि परे वा स्यात्- इति।

उदाहरणम्- अन्तरे अन्तराः वा गृहाः। बाह्या इत्यर्थः। अन्तरे अन्तराः वा शाटकाः। परिधानीयाः इत्यर्थः। विकल्पेन शी-इत्यादेशे अन्तरे इति सर्वे इतिवत् रूपम्। शी-इत्यादेशाभावे रामाः इतिवत् अन्तराः इति च रूपम्।

### १.२.९ सर्वनामसञ्ज्ञायाः परम् आदेशस्य विकल्पः -

एतावत्पर्यन्तं जसि प्रत्यये परे सर्वनामसञ्ज्ञा एव विकल्पेन भवति इत्युक्तम्। इदानीं सर्वनामसंज्ञायाः विकल्पता न उच्यते। परन्तु सर्वनामशब्देभ्यः परत्वेन स्थितानां प्रत्ययानां स्थाने यः आदेशः भवति तस्य आदेशस्य वैकल्पिकत्वम् उच्यते। अतः उभयत्र भेदः स्मर्तव्यः।

(२२१) **पूर्वादिभ्यो नवभ्यो वा** (७-१-१६) सूत्रार्थः - पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर इत्येतेभ्यो नवभ्यः परस्य ङसि इत्यस्य स्मात्- आदेशः वा भवति, ङि इत्यस्य स्मिन्- आदेशः वा भवति- इति।

उदाहरणम्- पूर्वस्मात् - सर्वस्मात् इतिवत् रूपम्। पूर्वात् - रामात् इतिवत् रूपम्। पूर्वस्मिन् - सर्वस्मिन् इतिवत् रूपम्। पूर्वे - रामे इतिवत् रूपम्। एवं परादीनामपि। शेषं सर्ववत्। एकशब्दः सङ्ख्यायां नित्यैकवचनान्तः।

### १.२.१० सर्वनामसञ्ज्ञायाः निषेधः -

(२२२) **न बहुव्रीहौ** (१-१-२९) सूत्रार्थः - बहुव्रीहौ चिकीर्षिते सर्वनामसञ्ज्ञा न स्यात्- इति।

(२२३) **तृतीयासमासे** (१-१-३०) सूत्रार्थः - सर्वनामशब्दानां तृतीयाविभक्त्यन्तेन समासः यदा क्रियते तदा सर्वनामसंज्ञा न स्यात्- इति।

उदाहरणम्- मासपूर्वाय इति। तृतीयासमासे यथा न भवति। मासेन पूर्वाय इति तृतीयासमासार्थवाक्येऽपि न भवति। केवलं पूर्वशब्दस्य च सर्वनामसञ्ज्ञासत्त्वात् पूर्वस्मै इति भवति।

(२२४) **द्वन्द्वे च** (१-१-३१) सूत्रार्थः - द्वन्द्वसमासे अपि सर्वनामसंज्ञा न भवति- इति।

उदाहरणम्- वर्णाश्रमेतराणाम्। समुदायस्यायं निषेधो न त्ववयवानाम्।

### १.२.११ विकल्पेन सर्वनामसञ्ज्ञाविधानम् -

(२२५) **विभाषा जसि** (१-१-३२) सूत्रार्थः - जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे सर्वनामसंज्ञा वा स्यात्- इति।

उदाहरणम्- वर्णाश्रमेतरे। वर्णाश्रमेतराः।

(२२६) **प्रथमचरमतयाल्पार्धकतिपयनेमाश्च** (१-१-३३) सूत्रार्थः - प्रथम चरम अल्प अर्ध कतिपय नेम इत्येतेषां शब्दानां तथा तयप्प्रत्ययान्तस्य शब्दस्य परस्य जसः शी-इत्यादेशे कर्तव्ये सर्वनामसंज्ञा वा स्युः।

उदाहरणम् - प्रथमे - प्रथमाः। चरमे चरमाः। द्वितये - द्वितयाः। अल्पे - अल्पाः। अर्धे - अर्धाः। कतिपये - कतिपयाः। शेषं रामवत्। नेमे - नेमाः। शेषं सर्ववत्।

**विभाषाप्रकरणे तीयस्य ङित्सूपसङ्ख्यानम् (वा)**। वार्त्तिकार्थः - तीयप्रत्ययान्तस्य शब्दस्य ङे ङसि ङस् ङि इत्येतेषु ङित्प्रत्ययेषु परेषु विकल्पेन सर्वनामसञ्ज्ञा भवति- इति।

उदाहरणम्- द्वितीयस्मै। द्वितीयाय इत्यादि। एवं तृतीयशब्दस्यापि ज्ञेयम्।

### १.२.१२ इदमत्रावधेयम् -

**सर्वनामसञ्ज्ञायाः विकल्पः** तथा **विकल्पेन सर्वनामसञ्ज्ञाविधानम्** इत्यनयोः शीर्षकयोः कश्चन भेदः अस्ति। **सर्वनामसञ्ज्ञायाः विकल्पः** इति शीर्षके- विद्यमानायाः सर्वनामसञ्ज्ञायाः विकल्पः क्रियते। परन्तु **विकल्पेन सर्वनामसञ्ज्ञाविधानम्** इति शीर्षके- येषां सर्वनामसञ्ज्ञा नास्ति तेषां विकल्पेन सर्वनामसञ्ज्ञा विधीयते। नेमशब्दस्य तु जसि परे विद्यमानायाः सर्वनामसञ्ज्ञायाः विकल्पः क्रियते।

**स्वावलोकनप्रश्नाः -**

(१) पूर्वादिशब्दानां रूपेषु कुत्र विकल्पः भवति ?

(२) पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (१-१-३४) इत्यादिभिः त्रिभि सूत्रैः शीभावस्य उत सर्वनामसञ्ज्ञायाः विकल्पः क्रियते ?

(३) पूर्वादिभ्यो नवभ्यो वा (७-१-१६) इति सूत्रेण किमुच्यते ?

(४) सर्वनामसञ्ज्ञानिषेधसूत्राणि कानि ?

### १.२.१३ निर्जरशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

प्रागुक्तानि सूत्राणि अपि अपेक्षन्ते। ततः एतत् सूत्रमपि अपेक्षते।

**(२२७) जराया जरसन्यतरस्याम् (७-२-१०१)** सूत्रार्थः - जराशब्दस्य जरस् इति आदेशः वा स्यात् अजादौ प्रत्यये परे- इति।

### १.२.१४ निर्जरशब्दस्य प्रक्रिया -

निर्जर+औ **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण औप्रत्ययः।

निर्जरस्+औ, **जराया जरसन्यतरस्याम् (७-२-१०१)** इति सूत्रेण निर्जरशब्दस्य जरस्-आदेशः। निर्जरसौ इति रूपम्। एवं निर्जरसः इत्यादि। सूत्रस्य वैकल्पिकत्वात् अजादिप्रत्यये परे पक्षे तथा हलादिप्रत्यये परे रामशब्दवत् रूपं भवति। अध्ययनसौकर्याय निर्जरशब्दस्य रूपाणि अत्र प्रदर्श्यन्ते -

### १.२.१५ निर्जरशब्दस्य सप्तसु विभक्तिषु त्रिषु वचनेषु रूपाणि -

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | निर्जरः | निर्जरौ, निर्जरसौ | निर्जराः, निर्जरसः |
| सं-प्रथमा | हे निर्जर | हे निर्जरौ, हे निर्जरसौ | हे निर्जराः, हे निर्जरसः |
| द्वितीया | निर्जरम्, निर्जरसम् | निर्जरौ, निर्जरसौ | निर्जरान्, निर्जरसः |
| तृतीया | निर्जरेण, निर्जरसा | निर्जराभ्याम् | निर्जरैः, |
| चतुर्थी | निर्जराय, निर्जरसे | निर्जराभ्याम् | निर्जरेभ्यः |
| पञ्चमी | निर्जरात्, निर्जरसः | निर्जराभ्याम् | निर्जरेभ्यः |
| षष्ठी | निर्जरस्य, निर्जरसः | निर्जरयोः, निर्जरसोः | निर्जराणाम्, निर्जरसाम् |
| सप्तमी | निर्जरे, निर्जरसि | निर्जरयोः, निर्जरसोः | निर्जरेषु |

**स्वावलोकनप्रश्नौ –**

(१) जराशब्दस्य जरस्-आदेशः कदा भवति ?

(२) जराशब्दस्य जरस्-आदेशाभावे कानि रूपाणि भविन्ति इति लिखन्तु ?

### १.२.१६ पादशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

प्रागुक्तानि सूत्राणि अपि अपेक्ष्यन्ते। ततः एतत् सूत्रमपि अपेक्ष्यते।

**(२२८) पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** सूत्रार्थः - पाद-शब्दस्य पद् इति, दन्त-शब्दस्य दत्-इति, नासिका-शब्दस्य नस्-इति, मास-शब्दस्य मास्-इति, हृदय-शब्दस्य हृद्-इति, निशा-शब्दस्य निश्-इति, असृज्-शब्दस्य असन्-इति, यूष-शब्दस्य यूषन्-इति, दोष-शब्दस्य दोषन्-इति, यकृत्-शब्दस्य यकन्-इति, शकृत्-शब्दस्य शकन्-इति, उदक-शब्दस्य उदन्-इति, आस्य-शब्दस्य आसन् इति त्रयोदशनां शब्दानां त्रयोदश-आदेशाः विकल्पेन भवन्ति शसादौ- इति।

### १.२.१७ पादशब्दस्य प्रक्रिया -

पादः। पादौ। पादाः। पादम्। पादौ। शसादौ तु पाद+अस् इत्यवस्थायाम् **पद्दनोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण पदादेशे सति पद्+अस् = पदस् इदानीं **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्। पदर् इति। **खरवसानयोर्विसर्जनीयः (८.३.१५)** इति सूत्रेण विसर्गः। पदः इति। पदादेशाभावे पादान्। पदा-पादेन। एवमग्रेऽपि।

**स्वावलोकनप्रश्नौ -**

(१) पादादीनां पदादि-आदेशाः कदा विहिताः ?

(२) पद्दनोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३) इति सूत्रेण कतीनां शब्दानां कति आदेशाः उक्ताः ?

## १.२.१८ दन्त-मासशब्दयोः अपेक्षितानि सूत्राणि -

प्रागुक्तानि सूत्राणि अपि अपेक्ष्यन्ते। ततः इमानि सूत्राणि अपि अपेक्ष्यन्ते।

**(२२९) सुडनपुंसकस्य (१-१-४३)** सूत्रार्थः - सुट् प्रत्याहारः = सु इत्यारभ्य औट्पर्यन्तम्। अत्र सु, औ, जस्, अम्, औट् इति पञ्च प्रत्ययाः भवन्ति। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युः, नपुंसकलिङ्गस्य न भवन्ति- इति।

**(२३०) स्वादिष्वसर्वनामस्थाने (१-४-१७)** सूत्रार्थः - कप्प्रत्ययावधिषु स्वादिषु असर्वनामस्थानेषु = सर्वनामस्थानभिन्नेषु स्वादिप्रत्ययेषु परतः पूर्वं पदसंज्ञं स्यात्- इति।

**(२३१) यचि भम् (१-४-१८)** सूत्रार्थः - यकारादिषु अजादिषु च कप्प्रत्ययावधिषु स्वादिषु असर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्- इति।

## १.२.१९ पदसञ्ज्ञाभसञ्ज्ञाविभागः -

सुप्प्रत्ययेषु- भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप् इत्येतेषु सप्तसु प्रत्ययेषु परतः पूर्वं पदसञ्ज्ञा भवति इत्यर्थः। सुप्प्रत्ययेषु- शस्, टा, ङे ङसि, ङस्, ओस्, आम्, ङि, ओस् इत्येतेषु नवसु प्रत्ययेषु परतः पूर्वं भसञ्ज्ञा भवति इत्यर्थः। अत्र इत्सञ्ज्ञानन्तरं लोपानन्तरं यस्य प्रत्ययस्य अजादित्वं स प्रत्ययः गृह्यते।

**(२३२) आकडारादेका संज्ञा (१-४-१)** सूत्रार्थः - इत ऊर्ध्वं **कडाराः कर्मधारये (२.२.३८)** इत्यतः प्राक् एकस्य एका एव संज्ञा ज्ञेया। या पराऽनवकाशा च। तेन शसादौ अजादिप्रत्यये परे भसंज्ञैव भवति पदसञ्ज्ञा न भवति।

## १.२.२० दन्तशब्दस्य प्रक्रिया -

द्वितीयाबहुवचने दन्तशब्दस्य **पद्दनोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण दत् आदेशः भवति। परत्वात् अनवकाशत्वात् च **यचि भम् (१.४.१८)** इति सूत्रेण भसञ्ज्ञा भवति। अतः पदसञ्ज्ञाऽभावेन **झलां जशोऽन्ते (८.२.३९)** इत्यनेन जश्त्वं न। दतः इत्येव रूपम्। दता-तृतीयैकवचने। तृतीयाद्विवचने दत्-आदेशे भ्याम्प्रत्यये परे पदसञ्ज्ञासत्त्वात् **झलां जशोऽन्ते (८.२.३९)** इत्यनेन जश्त्वम्। दद्भ्याम् इति रूपम्। एवमग्रेऽपि ज्ञेयम्।

## १.२.२१ मासशब्दस्य प्रक्रिया -

मासशब्दस्य मास्-आदेशे द्वितीयाबहुवचने शस्प्रत्यये मास्+अस् इति स्थिते सकारस्य रुत्वे रुत्वस्य विसर्गे च मासः इति रूपम्।

तृतीयाद्विवचने भ्यामि कृते मास्-आदेशे पदसञ्ज्ञा **स्वादिष्वसर्वनामस्थाने (१.४.१७)** इत्यनेन। **ससजुषो रुः (८.२.६६)** इति रुत्वे **भोभगोअघोऽपूर्वस्य योऽशि (८-३-१७)** इति सूत्रेण रोः यत्वे **हलि सर्वेषाम् (८-३-२२)** इति सूत्रेण यलोपः। मा+भ्याम्=माभ्याम्। माभिरित्यादि।

| |
|---|
| **स्वावलोकनप्रश्नाः -** |
| (१) सुट्प्रत्याहारे के प्रत्ययाः भवन्ति ? |
| (२) पदसञ्ज्ञा केषु प्रत्ययेषु परतः अङ्गस्य भवति ? |
| (३) भसञ्ज्ञा केषु प्रत्ययेषु परतः अङ्गस्य भवति ? |
| (४) दतः इत्यत्र भसञ्ज्ञापदसञ्ज्ञयोः का सञ्ज्ञा भवति ? |

### १.२.२२ यूषशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

प्रागुक्तानि सूत्राणि अपि अपेक्षन्ते। ततः इमानि सूत्राणि अपि अपेक्षन्ते।

**(२३३) भस्य (६-४-१२९)** अधिकारोऽयम्।

**(२३४) अल्लोपोऽनः (६-४-१३४)** सूत्रार्थः - अङ्गावयवोऽसर्वनामस्थानयकारादि-अजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात्- इति।

**(२३५) रषाभ्यां नो णः समानपदे (८-४-१)** सूत्रार्थः - एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्- इति।

**(२३६) न लोपः प्रातिपदिकान्तस्य (८-२-७)** सूत्रार्थः - प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्- इति।

**(२३७) विभाषा ङिश्योः (६-४-१३६)** सूत्रार्थः - अङ्गावयवोऽसर्वनामस्थानयकारादि-अजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङि-शी इत्यनयोः परयोः- इति।

### १.२.२३ यूषशब्दस्य प्रक्रिया -

**यूष्णः।** यूषशब्दस्य द्वितीयाबहुवचने शस्-प्रत्यये परे **पद्दनोमास्हृन्निशसन्यूषन्दोषन्-यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण यूषन्-आदेशः। यूषन्+अस् इति स्थिते **अल्लोपोऽनः (६-४-१३४)** इति सूत्रेण षकारोत्तर-अनः अकारस्य लोपः। यूष्न्+अस् इति स्थिते **रषाभ्यां नो णः समानपदे (८-४-१)** इति नकारस्य णत्वे यूष्णस् इति भवति। ततः **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्। यूष्णर् इति। **खरवसानयोर्विसर्जनीयः (८.३.१५)** इति सूत्रेण विसर्गः। यूष्णः इति भवति।

तृतीयैकवचने टाप्रत्यये कृते यूषशब्दस्य **पद्दनोमास्हृन्निशसन्यूषन्दोषन्-यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण यूषन्-आदेशः। यूषन्+आ इति स्थिते

**अल्लोपोऽनः (६-४-१३४)** इति सूत्रेण षकारोत्तर-अनः अकारस्य लोपः। यूष्न्+आ इति स्थिते **रषाभ्यां नो णः समानपदे (८-४-१)** इति नकारस्य णत्वे यूष्ण्+ आ = यूष्णा इति भवति।

तृतीयाद्विवचने भ्याम्प्रत्यये कृते यूषशब्दस्य **पद्दनोमास्हृन्निशसन्यूषन्दोषन्-यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण यूषन्-आदेशः। यूषन्+भ्याम् इति स्थिते **न लोपः प्रातिपदिकान्तस्य (८-२-७)** इति सूत्रेण नकारस्य लोपः। यूष+भ्याम् = यूषभ्याम्। यूषभिः। यूषभ्यः इत्यादिरूपमपि एवमेव।

सप्तम्येकवचने ङिप्रत्यये कृते यूषशब्दस्य **पद्दनोमास्हृन्निशसन्यूषन्दोषन्-यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण यूषन्-आदेशः। यूषन्+इ इति स्थिते **विभाषा ङिश्योः (६-४-१३६)** इति सूत्रेण षकारोत्तर-अनः अकारस्य विकल्पेन लोपः। यूष्न्+इ इति स्थिते **रषाभ्यां नो णः समानपदे (८-४-१)** इति नकारस्य णत्वे यूष्ण्+ इ = यूष्णि इति भवति।

**विभाषा ङिश्योः (६-४-१३६)** इति सूत्रेण षकारोत्तर-अनः अकारस्य विकल्पेन लोपाभावे यूषन् +इ इति स्थिते **रषाभ्यां नो णः समानपदे (८-४-१)** इति नकारस्य णत्वे यूषण्+ इ = यूषणि इति भवति। पक्षे रामवत्।

**स्वावलोकनप्रश्नौ -**

(१) सप्तम्येकवचने अनः अकारस्य विकल्पेन लोपः केन सूत्रेण ?

(२) तृतीयाविभक्तिद्विवचने किं रूपं भवति यूषशब्दस्य ?

### १.२.२४ द्व्यह्नशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम्

**(२३८) सङ्ख्याविसायपूर्वस्याह्नस्याऽहन्नन्यतरस्यां ङौ (६-३-११०)** सूत्रार्थः - सङ्ख्यापूर्वस्य, विपूर्वस्य सायपूर्वस्य अह्नस्य अहन्-आदेशो वा स्यात् ङिप्रत्यये परे। द्वयोरह्नोर्भवो द्व्यह्नः।

### १.२.२५ द्व्यह्नशब्दस्य प्रक्रिया -

द्व्यह्नशब्दस्य सप्तम्येकवचने ङिप्रत्यये परे **सङ्ख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ (६-३-११०)** इति सूत्रेण विकल्पेन अहन्-आदेशे द्व्यहन्+इ इति स्थिते **विभाषा ङिश्योः (६-४-१३६)** इति सूत्रेण विकल्पेन अनः अकारस्य लोपे द्व्यह्न्+इ इति भविति। ततः द्व्यह्नि इति रूपम्।

द्व्यह्नशब्दस्य सप्तम्येकवचने ङिप्रत्यये परे **सङ्ख्याविसायपूर्वस्याह्नस्याऽहन्नन्यतरस्यां ङौ (६-३-११०)** इति सूत्रेण विकल्पेन अहन्-आदेशे द्व्यहन्+इ इति स्थिते **विभाषा ङिश्योः (६-४-१३६)** इति सूत्रेण विकल्पेन अनः अकारस्य लोपाभावे द्व्यहन्+इ इति भविति। ततः द्व्यहनि इति रूपम्।

द्व्यह्नशब्दस्य सप्तम्येकवचने ङिप्रत्यये परे **सङ्ख्याविसायपूर्वस्याह्नस्याऽहन्नन्यतरस्यां ङौ (६-३-११०)** इति सूत्रेण विकल्पेन अहन्-आदेशाभावे द्व्यह्न+इ इति स्थिते **आद्गुण (६-१-८७)** इति सूत्रेण द्व्यह्ने इति रूपम्।

एवमेव विगतमहर्व्यह्नः। व्यह्नि। व्यहनि। व्यह्ने इति रूपाणि भवन्ति। अह्नः सायः सायाह्नः। सायाह्नि। सायाहनि। सायाह्ने इति रूपाणि भवन्ति। एवं प्रकारेण अकारान्ताः शब्दाः ज्ञेयाः।

**स्वावलोकनप्रश्नौ -**

(१) द्व्यह्नशब्दस्य सप्तम्येकवचने कानि रूपाणि भवन्ति ?

(८) सायाह्नि इत्यत्र अहन्-आदेशः केन सूत्रेण ?

## १.३.० आकारान्तपुंल्लिङ्गशब्दाः -

### ८.३.१ विश्वपा-हाहाशब्दयोः अपेक्षिते सूत्रे

**(२३९) दीर्घाज्जसि च (६-१-१०५)** सूत्रार्थः - दीर्घात् जसि प्रत्यये परे इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात् - इति।

**(२४०) आतो धातोः (६-४-१४०)** सूत्रार्थः - आकारान्तो यो धातुस्तदन्तस्य भस्याऽङ्गस्य लोपः स्यात् - इति।

### १.३.२ विश्वपाशब्दस्य प्रक्रिया -

**विश्वपाः -** प्रथमाविभक्त्येकवचने सुप्रत्यये रुत्वे विसर्गे च विश्वपाः इति रूपम्।

**विश्वपौ -** प्रथमाविभक्तिद्विवचने औप्रत्यये विश्वपा+औ इति स्थिते **वृद्धिरेचि (६-१-८८)** इति सूत्रेण वृद्धिः विश्वपौ इति रूपम्।

**विश्वपाः -** प्रथमाविभक्तिबहुवचने जस्प्रत्यये विश्वपा+अस् इति स्थिते **अकः सवर्णे दीर्घः (६.१.१०१)** इत्यनेन दीर्घः रुत्वे विसर्गे च विश्वपाः इति रूपम्।

**विश्वपः -** द्वितीयाबहुवचने शस्प्रत्यये विश्वपा+अस् इति स्थिते **आतो धातोः (६.४.१४०)** इति सूत्रेण पकारोत्तर-आकारस्य लोपः। ततः विश्वपस् स्थिते रुत्वे विसर्गे च विश्वपः इति रूपम्। टा, ङे ङसि,  ङस् ओस्, आम्, ङिप्रत्ययेषु परेषु पकारोत्तर-आकारस्य लोपः। प्रत्ययस्य सकारस्य रुत्वविसर्गौ। हलादिप्रत्यये तु केवलं संयोगः। एवं क्रमेण विश्वपाशब्दस्य प्रक्रिया।

### १.३.३ विश्वपाशब्दस्य रूपाणि -

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | विश्वपाः | विश्वपौ | विश्वपाः |
| सं प्रथमा | हे विश्वपाः | हे विश्वपौ | हे विश्वपाः |
| द्वितीया | विश्वपाम् | विश्वपौ | विश्वपः |
| तृतीया | विश्वपा | विश्वपाभ्याम् | विश्वपाभिः |
| चतुर्थी | विश्वपे | विश्वपाभ्याम् | विश्वपाभ्यः |
| पञ्चमी | विश्वपः | विश्वपाभ्याम् | विश्वपाभ्यः |
| षष्ठी | विश्वपः | विश्वपोः | विश्वपाम् |
| सप्तमी | विश्वपि | विश्वपोः | विश्वपासु |

### १.३.४ हाहाशब्दस्य प्रक्रिया -

**हाहान् -** द्वितीयाबहुवचने शस्प्रत्यये हाहा+अस् इति स्थिते **प्रथमयोः पूर्वसवर्णः (६-१-१०२)** इति सूत्रेण पूर्वसवर्णदीर्घः हाहास् इति भवति। **तस्माच्छसो नः पुंसि (६-१-१०३)** इत्यनेन सकारस्य नकारः हाहान् इति रूपम्।

टा, ङसि, ङस् एतेषु परेषु **अकः सवर्णे दीर्घः (६.१.१०१)** इति सूत्रेण सवर्णदीर्घः, रुत्वविसर्गौ। क्रमात् हाहा, हाहाः, हाहाः इति रूपाणि। ङे-ओस्-प्रत्यये तु **वृद्धिरेचि (६-१-८८)** इत्यनेन वृद्धिः। क्रमात् -हाहै, हाहौः इति रूपे। ङिप्रत्यये **आद्गुणः (६.१.८७)** इत्यनेन गुणः हाहे इति रूपम्। शेषं विश्वपाशब्दवत्।

**स्वावलोकनप्रश्नाः -**

(१) दीर्घाज्जसि च (६-१-१०५) सूत्रेण किं क्रियते ?

(२) विश्वपः इत्यादिरूपेषु पकारोत्तर-आकारस्य लोपः केन सूत्रेण क्रियते ?

(३) हाहाशब्दस्य द्वितीयाबहुवचने किं रूपम् ?

## १.४.० इकारान्तपुंल्लिङ्गशब्दाः -

### १.४.१ हरिशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि

**(२४१) जसि च (७-३-१०९)** सूत्रार्थः - ह्रस्वान्तस्याऽङ्गस्य गुणः स्याज्जसि परे - इति।

**(२४२) ह्रस्वस्य गुणः (७-३-१०८)** सूत्रार्थः - ह्रस्वस्य गुणः स्यात्संबुद्धौ परे - इति।

**(२४३) शेषो घ्यसखि (१-४-७)** सूत्रार्थः - अनदीसंज्ञौ ह्रस्वौ यौ इकारउकारौ तदन्तं घिसंज्ञं स्यात्। सखिशब्दस्य न भवति - इति।

**(२४४) आङो नाऽस्त्रियाम् (७-३-१२०)** सूत्रार्थः - घेः परस्य आङो ना स्यात्। स्त्रीलिङ्गे न भवति - इति। आङ् इति टाप्रत्ययस्य प्राचां सञ्ज्ञा।

**(२४५) घेर्ङिति (७-३-१११)** सूत्रार्थः - घिसंज्ञकस्य ङिति सुपि गुणः स्यात् - इति।

**(२४६) ङसिङसोश्च (६-१-११०)** सूत्रार्थः - एङो ङसिङसोः अति परे पूर्वरूपमेकादेशः स्यात् - इति।

**(२४७) अच्च घेः (७-३-११९)** सूत्रार्थः - इकार-उकाराभ्यामुत्तरस्य ङि प्रत्ययस्य औकारः स्यात् तथा घिसञ्ज्ञकस्य अकारः अन्तादेशः भवति- इति।

### १.४.२ हरिशब्दस्य प्रक्रिया -

**हरिः** - हरिशब्दात् सुप्रत्यये रुत्वे विसर्गे च हरिः इति रूपम्।

**हरी** - हरिशब्दात् औप्रत्यये **प्रथमयोः पूर्वसवर्णः (६-१-१०२)** इति पूर्वसवर्णदीर्घे = इकार-औकारयोः स्थाने ईकारादेशे हरी इति रूपम्।

**हरयः** - हरिशब्दात् जस्प्रत्यये हरि+अस् इति स्थिते **जसि च (७-३-१०९)** इत्यनेन गुणः हरे+अस् इति भवति। **एचोऽयवायावः (६-१-७८)** इत्यनेन अयादेशः हरयस् इति भवति।

**ससजुषो रुः** (८.२.६६) इत्यनेन रुत्वे, **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यनेन रोः विसर्गे हरयः इति रूपम्।

**हे हरे** – सम्बोधनैकवचने सुप्रत्यये हे हरि+स् इति स्थिते **ह्रस्वस्य गुणः (७-३-१०८)** इत्यनेन गुणः। हे हरे+स् इति भवति। ततः **एङ्ह्रस्वात्सम्बुद्धेः (६.१.६९)** इत्यनेन स्लोपः। हे हरे इति रूपम्।

**हरिम्** - अम्प्रत्यये **अमि पूर्व (६-१-१०७)** इत्यनेन पूर्वरूपम्। हरिम् इति रूपम्।

**हरीन्** - शस्प्रत्यये हरि+अस् इति स्थिते **प्रथमयोः पूर्वसवर्णः (६-१-१०२)** इति सूत्रेण पूर्वसवर्णदीर्घः। हरीस् इति भवति। **तस्माच्छसो नः पुंसि (६-१-१०३)** इत्यनेन सकारस्य नकारः हरीन् इति रूपम्।

**हरिणा** – तृतीयैकवचने टाप्रत्यये हरि टा इति स्थिते **शेषो घ्यसखि (१-४-७)** इत्यनेन हरिशब्दस्य घिसंज्ञासत्त्वात् **आङो नाऽस्त्रियाम् (७-३-१२०)** इत्यनेन टाप्रत्ययस्य ना-आदेशः भवति। टकारस्य प्रयोजनाभावात् लोपः न भवति। हरिना इति स्थिते **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८-४-२) इत्यनेन नकारस्य णत्वं हरिणा इति रूपम्।

**हरये** – घिसञ्ज्ञकस्य हरिशब्दस्य चतुर्थ्येकवचने ङेप्रत्यये हरि+ए इति स्थिते **घेर्ङिति** (७-३-१११) इत्यनेन इकारस्य गुणः हरे+ए इति स्थिते **एचोऽयवायावः (६-१-७८)** इत्यनेन अयादेश हरये इति भवति।

**हरेः** – घिसञ्ज्ञकस्य हरिशब्दस्य पञ्चमीषष्ठ्योरेकवचनप्रत्यये परे हरि+अस् इति स्थिते **घेर्ङिति (७-३-१११)** इत्यनेन इकारस्य गुणः। हरे+अस् इति स्थिते **ङसिङसोश्च (६-१-११०)** इत्यनेन पूर्वरूपं भवति। हरेस् इति स्थिते सकारस्य रुत्वे विसर्गे च हरेः इति रूपम्।

**हरौ** – घिसञ्ज्ञकस्य हरिशब्दस्य सप्तम्येकवचने ङिप्रत्यये हरि+इ इति स्थिते **अच्च घेः** (७.३.११९) इत्यनेन प्रत्ययस्य इकारस्य औकारादेशः तथा हरिशब्दस्य इकारस्य अकारादेशः भवति। हर+औ इति स्थिते **वृद्धिरेचि (६-१-८८)** इत्यनेन वृद्धिः हरौ इति रूपं भवति।

भिस्, भ्यस् इत्यत्र रुत्वविसर्गौ भवतः। ओस् इत्यत्र **इको यणचि (६-१-७७)** इत्यनेन यणादेशः कर्तव्यः। रुत्वविसर्गौ भवतः। आम्प्रत्ये नुडागमः, नामि दीर्घः। हरिषु इत्यत्र **आदेशप्रत्यययोः** (८-३-५९) इत्यनेन षत्वम्। एवं हरिशब्दस्य प्रक्रिया।

### १.४.३ हरिशब्दस्य रूपाणि -

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| सं प्रथमा | हे हरे | हे हरी | हे हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |

एवमेव श्रीपति-अग्नि-रवि-कवि-इत्यादिशब्दाः।

**स्वावलोकनप्रश्नाः -**

(१) हरिशब्दस्य प्रथमाबहुवचने केन सूत्रेण गुणः भवति ?

(२) हरिशब्दस्य सम्बुद्ध्येकवचने केन सूत्रेण गुणः भवति ?

(३) हरिशब्दस्य का सञ्ज्ञा अस्ति ?

(४) हरिशब्दस्य चतुर्थ्येकवचने केन सूत्रेण गुणः भवति ?

(५) हरिशब्दस्य पञ्चमीषष्ठ्योरेकवचने केन सूत्रेण पूर्वरूपमागच्छति ?

(६) हरिशब्दस्य सप्तम्येकवचने केन सूत्रेण ङिप्रत्ययस्य औकारः आगच्छति ?

## १.४.४ सखिशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि

**(२४८) अनङ् सौ (७-१-९३)** सूत्रार्थः - सख्युरङ्गस्यानङादेशः स्यात् असम्बुद्धौ सौ परे - इति।

**(२४९) अलोऽन्त्यात्पूर्व उपधा (१-१-६५)** सूत्रार्थः - अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् - इति। अल् इत्युक्ते सम्पूर्णवर्णसमुदायः।

**(२५०) सर्वनामस्थाने चासंबुद्धौ (६-४-८)** सूत्रार्थः - नकारान्तस्य उपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे - इति।

**(२५१) अपृक्त एकाल्प्रत्ययः (१-२-४१)** सूत्रार्थः - एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् - इति। यस्मिन् प्रत्यये एक एव वर्णः भवति सः एकाल्प्रत्ययः भवति।

**(२५२) हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (६-१-६८)** सूत्रार्थः - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते - इति।

**(२५३) सख्युरसंबुद्धौ (७-१-९२)** सूत्रार्थः - सख्युरङ्गात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् - इति।

**(२५४) अचो ञ्णिति (७-२-११५)** सूत्रार्थः - ञिति णिति च प्रत्यये परेऽजन्ताङ्गस्य वृद्धिः स्यात् - इति।

**(२५५) ख्यत्यात्परस्य (६-१-११२)** सूत्रार्थः - खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात् - इति।

**(२५६) औत् (७-३-११८)** सूत्रार्थः - इदुद्भ्यां परस्य ङेरौत्स्यात् - इति।

## १.४.५ सखिशब्दस्य प्रक्रिया -

**सखा-** सखिशब्दात् प्रथमैकवचने सुप्रत्यये सखि+स् इति स्थिते **अनङ् सौ (७-१-९३)** इत्यनेन सखिशब्दान्त्यस्य अनङ् आदेशः। सखन्+स् इति स्थिते **सर्वनामस्थाने चासंबुद्धौ (६-४-८)**

इत्यनेन उपधाया दीर्घः। सखान्+स् इति स्थिते **हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्** **(६-१-६८)** स्प्रत्ययस्य लोपः। सखान् इति स्थिते **न लोपः प्रातिपदिकान्तस्य** (८-२-७) इत्यनेन नलोपः। सखा इति रूपम्।

**सखायौ -** सखिशब्दात् प्रथमाद्विवचने औप्रत्यये सखि+औ इति स्थिते **सख्युरसंबुद्धौ (७-१-९२)** सखिशब्दस्य णिद्वद्भावः। ततः **अचोञ्णिति (७-२-११५)** इत्यनेन वृद्धिः। सखै+औ इति स्थिते **एचोऽयवायावः (६-१-७८)** इत्यनेन आयादेशः। सखायौ इति रूपम्। एवमेव सखायः सखायम् इति रूपे भवतः।

**सख्युः -** सखिशब्दात् पञ्चमीषष्ठ्योरेकवचने सखि+अस् इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यणादेशे सख्यस् इति भवति। तदा **ख्यत्यात्परस्य (६-१-११२)** इत्यनेन यकारोत्तर-अकारस्य उकारादेशः। सख्युस् इति स्थिते सकारस्य रुत्वे विसर्गे च सख्युः इति रूपम्।

**सख्यौ -** सखिशब्दात् सप्तम्येकवचने ङिप्रत्यये सखि+ङि इति स्थिते **औत् (७.३.११८)** इत्यनेन ङि-इत्यस्यैव औकारादेशः। सखि+औ इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यणादेशे सख्यौ इति रूपं भवति। शेषं हरिशब्दवत् भवति।

**स्वावलोकनप्रश्नाः -**

(१) अनङ् सौ (७.१.९३) इत्यनेन कस्य कदा अनङ् आदेशः भवति ?

(२) उपधासञ्ज्ञाविधायकं सूत्रं किम् ?

(३) अपृक्तसञ्ज्ञाविधायकं सूत्रं किम् ?

(४) सखा इत्यत्र केन सूत्रेण स्लोपः क्रियते ?

(५) सखिशब्दस्य णिद्वद्भावः केन सूत्रेण उच्यते ?

(६) औत् (७-३-११८) इति सूत्रेण कस्य औकारादेशः विधीयते ?

### १.४.६ पतिशब्दस्य समासे एव घिसञ्ज्ञा -

इकारान्तपुंल्लिङ्गहरिशब्दस्य घिसञ्ज्ञा अस्ति। अतः हरये हरेः इत्यादिरूपाणि भवन्ति। पतिशब्दस्य घिसञ्ज्ञा नास्ति वा इति सन्देहे समाधानमुक्तम्-

**(२५७) पतिः समास एव (१-४-८)** सूत्रार्थः - पतिशब्दः समास एव घिसंज्ञः स्यात् - इति। अर्थात् केवलं पतिशब्दस्य घिसञ्ज्ञा न भवति। अत एत पत्या, पत्ये, पत्युः, पत्युः, पत्यौ इत्यत्र सखिशब्दवत् भवति। शेषं हरिवत् । समासे एव घिसञ्ज्ञा भवति। भूपतिना, भूपतये इत्यादि रूपाणि हरिशब्दवद्भवन्ति।

### १.४.७ कतिशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि

कतिशब्दो नित्यं बहुवचनान्तः।

**(२५८) बहुगणवतुडति सङ्ख्या (१-१-२३)** सूत्रार्थः - बहुगणशब्दयोः तथा वतु-डतिप्रत्ययान्तयोः सङ्ख्यासंज्ञा भवति - इति।

**(२५९) डति च (१-१-२५)** सूत्रार्थः - डतिप्रत्ययान्ता सङ्ख्या षट्संज्ञा स्यात् - इति।

**(२६०) प्रत्ययस्य लुक्श्लुलुपः (१-१-६१)** सूत्रार्थः - लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं = लोपः क्रमात्तत्तत्संज्ञं स्यात् - इति। लुक्शब्देन लोपः कृतः चेत् लुक्, श्लुशब्देन लोपः कृतः चेत् श्लु, लुप्शब्देन लोपः कृतः चेत् लुप् इति सञ्ज्ञं भवति।

**(२६१) षड्भ्यो लुक् (७-१-२२)** सूत्रार्थः - षड्भ्यः परयोर्जश्शसोर्लुक्स्यात् - इति।

**(२६२) प्रत्ययलोपे प्रत्ययलक्षणम् (१-१-६२)** सूत्रार्थः - प्रत्यये लुप्तेऽपि तदाश्रितं = प्रत्ययाश्रितं कार्यं स्यात् - इति।

**(२६३) न लुमताङ्गस्य (१-१-६३)** सूत्रार्थः - लुक् श्लु लुप् एते लुमन्तः। लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात्- इति।

### १.४.८ कतिशब्दस्य प्रक्रिया -

कति - प्रथमाद्वितीययोर्बहुवचनम्। कतिशब्दात् जस्प्रत्यये कृते कति+जस् इति स्थते कतिशब्दस्य षट्सञ्ज्ञा अस्ति इति हेतोः **षड्भ्यो लुक् (७-१-२२)** इत्यनेन जसः लोपः। कति इति रूपम्। कतिभिः, कतिभ्यः, कतिभ्यः, कतीनाम्, कतिषु इति बहुवचनान्तानि रूपाणि।

### १.४.९ त्रिशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

त्रिशब्दो नित्यं बहुवचनान्तः ।

**(२६४) त्रेस्त्रयः (७-१-५३)** सूत्रार्थः - त्रिशब्दस्य त्रयादेशः स्यात् आमि - इति।

### १.४.१० त्रिशब्दस्य प्रक्रिया -

त्रयः, त्रीन्, त्रिभिः, त्रिभ्यः, त्रिभ्यः त्रिषु इति हरिशब्दवत् रूपाणि

**त्रयाणाम्** - त्रिशब्दस्य षष्ठीबहुवचने आमि कृते **त्रेस्त्रयः (७.१.५३)** इत्यनेन त्रिशब्दस्य त्रय-आदेशः भवति। त्रय+आम् इति स्थिते आमः **ह्रस्वनद्यापो नुट् (७-१-५४)** इत्यनेन नुट् आगमः। त्रय+नाम् इति स्थिते **नामि (६-४-३)** इति सूत्रेण दीर्घः त्रयानाम् इति। ततः **अट्कुप्वाङ्नुम्व्यवायेऽपि (८-४-२)** इत्यनेन णत्वम्। त्रयाणाम् इति रूपम्।

### १.४.११ द्विशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

द्विशब्दो नित्यं द्विवचनान्तः।

**(२६५) त्यदादीनामः (७-२-१०२)** सूत्रार्थः - एषामकारोऽन्तादेशः स्याद्विभक्तौ - इति।

**द्विपर्यन्तानामेवेष्टिः (वा)** वार्तिकार्थः - त्यदादिगणे द्विशब्दपर्यन्तमेव अकारः अन्तादेशः भवति - इति।

### १.४.१२ द्विशब्दस्य प्रक्रिया -

द्विशब्दस्य **त्यदादीनामः (७.२.१०२)** इत्यनेन अकारः अन्तादेशो भवति। अतः अकारान्तवद् भवति।

द्वौ २ । द्वाभ्याम् ३। द्वयोः २। इति रामशब्दवत् रूपाणि।

### १.४.१३ औडुलोमिशब्दस्य प्रक्रियार्थम् अपेक्षितं वार्त्तिकम्

**लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः (वा)** वार्त्तिकार्थः - लोमन्शब्दात् अपत्यर्थे बहुवचने अप्रत्ययः भवति- इति।

### १.४.१४ औडुलोमिशब्दस्य प्रक्रिया -

उडुलोमशब्दस्य अपत्यर्थे इञ्प्रत्यये कृते आदिवृद्धिः औडुलोमि इति इकारान्तं प्रातिपदिकं भवति। परन्तु बहुवचने **लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः (वा)** इति वार्त्तिकेन अप्रत्ययविधानात् आदिवृद्धिः न भवति। अतः उडुलोम इति अकारान्तं प्रातिपदिकं भवति। अतः सप्तसु विभक्तिषु एकवचने द्विवचने हरिशब्दवत् रूपं, बहुवचने तु रामशब्दवत् रूपं भवति इति ज्ञेयम्। औडुलोमिः औडुलोमी उडुलोमाः इति। एवमग्रेऽपि।

**स्वावलोकनप्रश्नाः -**

(१) पतिशब्दस्य कदा घिसञ्ज्ञा भवति ?

(२) कतिशब्दस्य प्रथमाबहुवचने केन सूत्रेण प्रत्ययस्य लोपः भवति ?

(३) त्रिशब्दस्य षष्ठीबहुवचने कः आदेशः भवति ?

(४) द्विशब्दस्य त्यदादीनामः (७.२.१०२) इति सूत्रेण कः आदेशः भवति ?

(५) औडुलोमिशब्दस्य सप्तमीबहुवचने कथं रूपं भवति ?

## १.५.० ईकारान्तपुंल्लिङ्गशब्दाः -

### १.५.१ बहुश्रेयसीशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

**(२६६) यू स्त्र्याख्यौ नदी (१-४-३)** सूत्रार्थः - ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः - इति।
**प्रथमलिङ्गग्रहणं च (वा)।** वार्त्तिकार्थः - पूर्वं स्त्रीलिंङ्गे विद्यमानस्य शब्दस्य सम्प्रति स्त्रीलिंङ्गत्वं नास्ति चेदपि नदीसञ्ज्ञा भवति इति वक्तव्यम्- इति।
**(२६७) अम्बार्थनद्योर्ह्रस्वः (७-३-१०७)** सूत्रार्थः - अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्संबुद्धौ - इति।
**(२६८) आण्नद्याः (७-३-११२)** सूत्रार्थः - नद्यन्तात्परेषां ङिताम् = ङे, ङसि, ङस्, ङि इत्येतेषाम् अडागमः स्यात् - इति।

**(२६९) आटश्च (६-१-९०)** सूत्रार्थः - आटोऽचि परे वृद्धिरेकादेशः स्यात् - इति। बहुश्रेयस्यै। बहुश्रेयस्याः।

**(२७०) ङेराम्नद्याम्नीभ्यः (७-३-११६)** सूत्रार्थः - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात् - इति।

## १.५.२ बहुश्रेयसीशब्दस्य प्रक्रिया -

**हे बहुश्रेयसि** - बहुश्रेयसीशब्दस्य **प्रथमलिंङ्गग्रहणम् (वा)** इति वार्त्तिकेन नदीसञ्ज्ञासत्त्वात् सम्बोधनैकवचने सुप्रत्यये कृते बहुश्रेयसी+स् इति स्थिते **अम्बार्थनद्योर्ह्रस्वः (७-३-१०७)** इत्यनेन ह्रस्वः बहुश्रेयसि=स् इति स्थिते **एङ्ह्रस्वात् सम्बुद्धेः (६-१-६९)** इत्यनेन स्लोपे बहुश्रेयसि इति रूपम्।

**बहुश्रेयस्यै** - बहुश्रेयसीशब्दस्य **प्रथमलिंङ्गग्रहणम् (वा)** इति वार्त्तिकेन नदीसञ्ज्ञासत्त्वात् चतुर्थ्यैकवचने ङेप्रत्यये कृते बहुश्रेयसी+ए इति स्थिते **आण्नद्याः (७.३.११२)** इत्यनेन एकारस्य आट्आगमः। बहुश्रेयसी+आऐ इति स्थिते आऐ इत्यनयोः **आटश्च (६.१.९०)** इत्यनेन वृद्धिः। बहुश्रेयसी+ऐ इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यणि कृते बहुश्रैयस्यै इति रूपम्।

**बहुश्रेयस्याः** - बहुश्रेयसीशब्दस्य **प्रथमलिंङ्गग्रहणम् (वा)** इति वार्त्तिकेन नदीसञ्ज्ञासत्त्वात् पञ्चमीषष्ठ्योरेकवचने  बहुश्रेयसी+अस् इति स्थिते **आण्नद्याः (७.३.११२)** इत्यनेन अकारस्य आट्आगमः। बहुश्रेयसी+आअस् इति स्थिते आअ इत्यनयोः **आटश्च (६.१.९०)** इत्यनेन वृद्धिः। बहुश्रेयसी+आस् इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यणि कृते बहुश्रैयस्यास् रुत्वे विसर्गे बहुश्रैयस्याः इति रूपम्।

**बहुश्रेयस्याम्** - बहुश्रेयसीशब्दस्य **प्रथमलिंङ्गग्रहणम् (वा)** इति वार्त्तिकेन नदीसञ्ज्ञासत्त्वात् सप्तम्येकवचने  बहुश्रेयसी+इ इति स्थिते **ङेराम्नद्याम्नीभ्यः (७-३-११६)** इति सूत्रेण ङेः आम् आदेशः। बहुश्रेयसी+आम् इति स्थिते **आण्नद्याः (७.३.११२)** इत्यनेन आकारस्य आट् आगमः। बहुश्रेयसी+आआम् इति स्थिते आआ इत्यनयोः **आटश्च (६.१.९०)** इत्यनेन वृद्धिः। बहुश्रेयसी+आम् इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यणि कृते बहुश्रैयस्याम् इति रूपम्।

बहुश्रेयसीशब्दे एषु स्थलेषु एव नूतनसूत्राणां प्रवेशः। अन्येषु रूपेषु पूर्वं ज्ञातैः सूत्रैरेव रूपसिद्धिः भवति।

**स्वावलोकनप्रश्नाः -**

(१) बहुश्रेयसीशब्दस्य नदीसञ्ज्ञा सूत्रेण उत वार्त्तिकेन भवति ?

(२) आटश्च (६.१.९०) इति सूत्रेण बहुश्रेयसीशब्दस्य चतुर्थ्येकवचने कयोः वृद्धिः क्रियते ?

(३) ङेराम्नद्याम्नीभ्यः (७-३-११६) इति सूत्रेण कस्य आम् आदेशः विधीयते ?

### १.५.३ कुमारीशब्दस्य अपेक्षिते सूत्रे -

**(२७१) अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६-४-७७)** सूत्रार्थः – श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः 'भ्रू' इत्यस्य चाङ्गस्य इयङुवङौ स्तोऽजादौ प्रत्यये परे – इति। ङिच्च इति सूत्रेण अन्तादेशः भवति। अङ्गस्य अन्ते इकारः अस्ति चेत् तस्य इयङ् उकारः अस्ति चेत् तस्य उवङ् आदेशः भवति इत्यर्थः।

**(२७२) एरनेकाचोऽसंयोगपूर्वस्य (६-४-८२)** सूत्रार्थः – धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण्स्यादजादौ प्रत्यये परे – इति।

### १.५.४ कुमारीशब्दस्य प्रक्रिया -

**कुमार्यौ** - कुमारीशब्दात् प्रथमाद्विवचने औप्रत्यये कृते कुमारी+औ इति स्थिते **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६-४-७७)** इति सूत्रेण रेफोत्तर-ईकारस्य इयङ्-आदेशः प्राप्तः। तं बाधित्वा **एरनेकाचोऽसंयोगपूर्वस्य (६-४-८२)** इति सूत्रेण यण् भवति। कुमार्यौ इति रूपं भवति।

कुमारीशब्दे अजादिप्रत्ययेषु परेषु एतयोः सूत्रयोः प्रवेशः। अन्येषु रूपेषु पूर्वं ज्ञातैः सूत्रैरेव रूपसिद्धिः भवति।

**स्वावलोकनप्रश्नौ -**

(१) अचिश्नुधातुभ्रुवां य्वोरियङुवङौ (६-४-७७) इति सूत्रेण कस्य वर्णस्य इयङ् आदेशः भवति ?

(२) एरनेकाचोऽसंयोगपूर्वस्य (६-४-८२) इति सूत्रेण किं विधीयते ?

### १.५.५ सुधीशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(२७३) न भूसुधियोः (६-४-८५)** सूत्रार्थः – एतयोर्यण्न स्यादचि सुपि – इति।

### १.५.६ सुधीशब्दस्य प्रक्रिया -

**सुधियौ** - सुधीशब्दस्य प्रथमाद्विवचने औप्रत्यये कृते सुधी+औ इति स्थिते **एरनेकाचोऽसंयोगपूर्वस्य (६-४-८२)** इति सूत्रेण यण् प्राप्तः। तदा **न भूसुधियोः (६-४-८५)** इति सूत्रेण यणः निषेधः क्रियते। तथा सति **अचिश्नुधातुभ्रुवां य्वोरियङुवङौ (६-४-७७)** इति सूत्रेण धकारोत्तर-ईकारस्य इयङ् आदेशः भवति। सुधिय्+औ= सुधियौ इति रूपम्।

सुधीशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) केन सूत्रेण प्राप्तस्य यणः निषेधः न भूसुधियोः (६-४-८५) इति सूत्रेण क्रियते ?

(२) सुधियौ इत्यत्र केन सूत्रेण इयङ्-आदेशः भवति ?

## १.६.० उकारान्तपुंल्लिङ्गशब्दाः -

शम्भुशब्दस्य हरिशब्दवत्। एवं विष्णुवायुभान्वादयः।

### १.६.१ क्रोष्टुशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

(२७४) **तृज्वत्क्रोष्टुः (७-१-९५)** सूत्रार्थः - क्रोष्टुशब्दस्तृजन्तेन तुल्यं वर्तते असम्बुद्धौ सर्वनामस्थाने परे - इति। क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः।

(२७५) **ऋतो ङिसर्वनामस्थानयोः (७-३-११०)** सूत्रार्थः - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् - इति।

(२७६) **ऋदुशनस्पुरुदंसोऽनेहसां च (७-१-९४)** सूत्रार्थः - ऋदन्तानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ परे - इति।

(२७७) **अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् (६-४-११)** सूत्रार्थः - अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे - इति।

(२७८) **विभाषा तृतीयादिष्वचि (७-१-९७)** सूत्रार्थः - अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् - इति।

(२७९) **ऋत उत् (६-१-१११)** सूत्रार्थः - ऋदन्तान्ङसिङसोरति परे उकार एकादेशः स्यात् - इति। रपरत्वम्।

(२८०) **रात्सस्य (८-२-२४)** सूत्रार्थः - रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य - इति।

**नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वा)** एषु स्थानेषु पूर्वविप्रतिषेधेन नुट् भवति।

### १.६.२ क्रोष्टुशब्दस्य प्रक्रिया -

**क्रोष्टा** - क्रोष्टुशब्दस्य प्रथमैकवचने क्रोष्टु+स् इति स्थिते **तृज्वत्क्रोष्टुः (७-१-९५)** इति सूत्रेण क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयुज्यते। क्रोष्टृ+स् इति स्थिते **ऋतो ङिसर्वनामस्थानयोः (७-३-११०)** इति सूत्रेण ऋवर्णस्य गुणः प्राप्तः। तद्बाधित्वा **ऋदुशनस्पुरुदंसोऽनेहसां च (७-१-९४)** इति सूत्रेण ऋवर्णस्य अनङ् आदेशः। अनङि अनुबन्धलोपे अन् इति अवशिष्यते। क्रोष्टन्+स् इति स्थिते **अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् (६-४-११)** इति सूत्रेण उपाधायाः = अवर्णस्य दीर्घः। क्रोष्टान्+स् इति स्थिते **हल्ङ्याभ्यो दीर्घात् सुतिस्यपृक्तं हल् (६-१-७८)** इत्यनेन स्लोपः। क्रोष्टान् इति स्थिते **न लोपः प्रातिपदिकान्तस्य** (८-२-७) इत्यनेन नकारस्य लोपः क्रोष्टा इति रूपम्।

**क्रोष्ट्रा** - क्रोष्टुशब्दस्य तृतीयैकवचने क्रोष्टु+आ इति स्थिते **विभाषा तृतीयादिष्वचि (७-१-९७)** इत्यनेन विकल्पेन क्रोष्टृशब्दस्य प्रयोगे क्रोष्टृ+आ इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यण् भवति। क्रोष्ट्रा इति रूपम्।

**क्रोष्टुः** - क्रोष्टुशब्दस्य पञ्चमीषष्ठ्योरेकवचने क्रोष्टु+अस् इति स्थिते **विभाषा तृतीयादिष्वचि (७-१-९७)** इत्यनेन विकल्पेन क्रोष्टृशब्दस्य प्रयोगे क्रोष्टृ+अस् इति स्थिते **ऋत उत् (६-१-१११)** इत्यनेन उकारस्य एकादेशः। रेफसहितः भवति। तदा क्रोष्टुर्स् इति स्थिते **रात्सस्य** (८-२-२४) इत्यनेन सकारस्य लोपः। ततः **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यनेन रेफस्य विसर्गः। क्रोष्टुः इति रूपम्।

क्रोष्टूनाम् - क्रोष्टुशब्दस्य षष्ठी बहुवचने क्रोष्टु+आम् इति स्थिते नुटः अपेक्षया तृज्वद्भावस्य परत्वात् **विभाषा तृतीयादिष्वचि (७-१-९७)** इति सूत्रेण क्रोष्टृशब्दस्यैव प्रयोगः स्यात्। तदा **नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वा)** इति वार्त्तिकेन नुट् एव भवति, तृज्वद्भावो न भवति। क्रोष्टु+नाम् इति स्थिते **नामि (६-४-३)** इत्यनेन दीर्घः क्रोष्टूनाम् इति रूपम्।

क्रोष्टुशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति। क्रोष्टृशब्दस्य प्रयोगाभावे तथा हलादिप्रत्यये परे शम्भुशब्दवत् रूपाणि भवन्ति।

**स्वावलोकनप्रश्नौ -**

(१) सर्वनामस्थानेषु परतः क्रोष्टुशब्दस्य स्थाने कस्य शब्दस्य प्रयोगः भवति ?

(२) क्रोष्टुशब्दस्य षष्ठीबहुवचने तृज्वद्भावः भवति उत नुट् आगमः भवति ?

## १.७.० ऊकारान्तपुंल्लिङ्गशब्दाः -

### १.७.१ खलपूशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम्

**(२८१) ओः सुपि (६-४-८३)** सूत्रार्थः - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि - इति।

### १.७.२ खलपूशब्दस्य प्रक्रिया -

**खलप्वौ** - खलपूशब्दस्य प्रथमाविभक्तिद्विवचने औप्रत्यये खलपू+औ इति स्थिते **ओः सुपि (६-४-८३)** इति सूत्रेण यण्। खलप्वौ इति रूपम्।

खलपूशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

### १.७.३ वर्षाभूशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम्

**(२८२) वर्षाभ्वश्च (६-४-८४)** सूत्रार्थः - अस्योवर्णस्य यण् स्यादचि सुपि - इति।

### १.७.४ वर्षाभूशब्दस्य प्रक्रिया -

वर्षाभ्वौ - वर्षाभूशब्दस्य प्रथमाविभक्तिद्विवचने औप्रत्यये वर्षाभू+औ इति स्थिते **वर्षाभ्वश्च (६-४-८४)** इति सूत्रेण यण् भवति। वर्षाभ्वौ इति रूपम्।

वर्षाभूशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

### १.७.५ दृन्भूशब्दस्य प्रक्रियार्थम् अपेक्षितं वार्त्तिकम् -

दृन्निति नान्ते हिंसार्थेऽव्यये भुवः क्विप् दृन्भू।

**दृन्करपुनःपूर्वस्य भुवो यण्वक्तव्यः (वा)।** वार्त्तिकार्थः - दृन्-कर-पुनःपूर्वस्य भुवः अजादौ सुपि परे यण् स्यात् - इति।

### १.७.५ दृन्भूशब्दस्य प्रक्रिया-

**दृन्भ्वौ** - दृन्भूशब्दस्य प्रथमाद्विवचने औप्रत्यये दृन्भू+औ इति स्थिते **दृन्करपुनःपूर्वस्य भुवो यण्वक्तव्यः (वा)** इति वार्त्तिकेन यण् भवति। दृन्भ्वौ इति रूपं भवति।

दृन्भूशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) खलप्वौ इत्यत्र केन सूत्रेण यण् भवति ?

(२) वर्षाभ्वौ इत्यत्र केन सूत्रेण यण् भवति ?

(३) दृन्भ्वौ इत्यत्र केन वार्त्तिकेन यण् भवति ?

## १.८.० ऋकारान्तपुंल्लिङ्गशब्दाः -

### १.८.१ धातृशब्दस्य प्रक्रियार्थम् अपेक्षितं वार्त्तिकम् -

**ऋवर्णान्नस्य णत्वं वाच्यम् (वा)** वार्त्तिकार्थः - ऋवर्णात् परस्य नकारस्य णत्वं भवति- इति।

### १.८.२ धातृशब्दस्य प्रक्रिया -

**धातॄणाम् -** धातृशब्दस्य षष्ठीबहुवचने आम् प्रत्यये कृते धातृ+आम् इति स्थिते **ह्रस्वनद्यापो नुट् (७-१-५४)** इति सूत्रेण आमः नुट् आगमः। धातृ+नाम् इति स्थिते **नामि (६-४-३)** इत्यनेन दीर्घः। धातॄनाम् इति स्थिते **ऋवर्णान्नस्य णत्वं वाच्यम् (वा)** इति वार्त्तिकेन नकारस्य णत्वे धातॄणाम् इति रूपम्।

धातृशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

### १.८.३ नृशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(२८३) नृ च (६-४-६)** सूत्रार्थः - 'नृ' इत्येतस्य नामि वा दीर्घः स्यात् - इति।

### १.८.४ नृशब्दस्य प्रक्रिया -

**नृणाम् - नॄणाम् -** नृशब्दस्य षष्ठीबहुवचने आम्प्रत्यये कृते नृ+आम् इति स्थिते **ह्रस्वनद्यापो नुट् (७-१-५४)** इति सूत्रेण आमः नुट् आगमः। नृ+नाम् इति स्थिते **नृ च (६.४.६)** इत्यनेन विकल्पेन दीर्घः। नृनाम् -नॄनाम् इति स्थिते **ऋवर्णान्नस्य णत्वं वाच्यम् (वा)** इति वार्त्तिकेन नकारस्य णत्वे नृणाम् -नॄणाम् इति रूपद्वयं भवति।

नृशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) धातॄणाम् इत्यत्र केन वार्त्तिकेन णत्वं भवति ?

(२) नृशब्दस्य षष्ठीबहुवचने कति रूपाणि भवन्ति ?

## १.९.० ओकारान्तपुंल्लिङ्गशब्दाः -

### १.९.१ गोशब्दस्य प्रक्रियार्थम् अपेक्षिते सूत्रे -

**(२८४) गोतो णित् (७-१-९०)** सूत्रार्थः - गोशब्दात्परं सर्वनामस्थानं णिद्वत् स्यात् - इति।

**(२८५) औतोऽम्शसोः (६-१-९३)** सूत्रार्थः - आ ओत इति छेदः । ओकारादम्शसोरचि परे आकार एकादेशः स्यात् - इति।

### १.९.२ गोशब्दस्य प्रक्रिया -

**गौः -** गोशब्दस्य प्रथमैकवचने सुप्रत्यये कृते गो+स् इति स्थिते **गोतो णित् (७-१-९०)** इति सूत्रेण सुप्रत्ययस्य णिद्वद्भावः भवति। ततः गो-इत्यत्र ओकारस्य **अचो ञ्णिति (७-२-११५)** इत्यनेन वृद्धिः। गौस् इति स्थिते रुत्वे विसर्गे गौः इति रूपम्।

**गाम् -** गोशब्दस्य द्वितीयैकवचने अम्प्रत्यये कृते गो+अम् इति स्थिते **औतोऽम्शसोः (६-१-९३)** इति सूत्रेण ओ-अ इत्यनयोः आकारः एकादेशः भवति। गाम् इति रूपं भवति।

गोशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

### १.९.३ सुद्योशब्दस्य प्रक्रियार्थम् अपेक्षितं वार्त्तिकम्

**ओतो णिदिति वाच्यम् (वा) ।** वार्त्तिकार्थः – ओकारान्तात् शब्दात्परं सर्वनामस्थानं णिद्वत् स्यात् इति वक्तव्यम्- इति।

### १.९.४ सुद्योशब्दस्य प्रक्रिया -

**सुद्यौः -** सुद्योशब्दस्य प्रथमैकवचने सुप्रत्यये कृते सुद्यो+स् इति स्थिते **ओतो णिदति वाच्यम् (वा)** इति वार्त्तिकेन सुप्रत्ययस्य णिद्वद्भावः भवति। ततः सुद्यो-इत्यत्र ओकारस्य **अचो ञ्णिति (७-२-११५)** इत्यनेन वृद्धिः। सुद्यौस् इति स्थिते रुत्वे विसर्गे सुद्यौः इति रूपम्।

सुद्योशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) गोशब्दात् परस्य सर्वनामस्थानस्य णिद्वद्भावः केन सूत्रेण ?

(२) सुद्योशब्दात् परस्य सर्वनामस्थानस्य णिद्वद्भावः केन वार्त्तिकेन ?

## १.१०.० ऐकारान्तपुंल्लिङ्गशब्दाः -

### १.१०.१ रैशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(२८६) रायो हलि (७-२-८५)** सूत्रार्थः – रैशब्दस्य आकारोऽन्तादेशः स्याद्धलि विभक्तौ – इति।

### १.१०.२ रैशब्दस्य प्रक्रिया -

**राः -** रैशब्दस्य प्रथमैकवचने सुप्रत्यये कृते रै+स् इति स्थिते **रायो हलि (७-२-८५)** इत्यनेन रेफोत्तर-ऐकारस्य आकारः भवति। रा+स् इति स्थिते रुत्वे विसर्गे च राः इति रूपं भवति।

रैशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

एवमेव ज्ञातैः सूत्रैरेव उकारान्त-एकारान्त-औकारान्तशब्दानामपि रूपाणि सिद्ध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) रायो हलि (७-२-८५) इति सूत्रेण रैशब्दस्य कः वर्णः अन्तादेशो भवति ?

(२) रैशब्दस्य प्रथमैकवचने किं रूपं भवति ?

प्रकरणेऽस्मिन् रुत्वे इत्युक्ते **ससजुषोः रुः (८-२-६६)** इति सूत्रेण, विसर्गे इत्युक्ते **खरवसानयोर्विसर्जनीयः (८.३.१५)** इति सूत्रेण इति मन्तव्यम्।

**।। इति अजन्तपुलिङ्गप्रकरणम् ।।**

## द्वितीयखण्डः

# ।। अजन्तस्त्रीलिङ्गप्रकरणम् ।।

**संरचना**

२.० प्रस्तावना।
२.१ लक्षिताधिगमविशेषाः।
२.२.० आकारान्तस्त्रीलिङ्गशब्दाः।
२.३.० इकारान्तस्त्रीलिङ्गशब्दा।
२.४.० ईकारान्तस्त्रीलिङ्गशब्दाः।
२.५.० उकारान्तस्त्रीलिङ्गशब्दाः।
२.६.० ऊकारान्तस्त्रीलिङ्गशब्दाः।
२.७.० ऋकारान्तस्त्रीलिङ्गशब्दाः।

## २.० प्रस्तावना -

एतावत्पर्यन्तम् अस्माभिः शब्दाधिकारे अजन्तपुंल्लिङ्गप्रकरणमधीतम्। इदीनीम् अजन्तस्त्रीलिंङ्गशब्दानां विषये ज्ञास्यामः। येषां शब्दानां व्यवहारः स्त्रीलिङ्गे अस्ति ते स्त्रीलिङ्गशब्दाः। अस्मिन् प्रकरणे अजन्तस्त्रीलिङ्गशब्देषु आकारान्त-इकारान्त-ईकारान्त-उकारान्त-ऊकारान्त-ऋकारान्तशब्दानां विषये ससूत्रं ज्ञास्यामः।

## २.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः-

- अजन्तस्त्रीलिङ्गशब्दान् ज्ञास्यन्ति।
- सर्वेषाम् अजन्तस्त्रीलिङ्गशब्दानां परिचयं प्राप्नुवन्ति।
- एकं शब्दं ज्ञात्वा बहून् शब्दान् वक्तुं प्रभवन्ति।
- अजन्तस्त्रीलिङ्गप्रकरणस्थानि सूत्राणि तेषामर्थं च ज्ञास्यन्ति।
- वाक्यप्रयोगवेलायां स्त्रीलिङ्गशब्दानां विभक्तिपरिवर्तनं ज्ञास्यन्ति।

## २.२.० आकारान्तस्त्रीलिङ्गशब्दाः -

### २.२.१ रमाशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

**(२८७) औङ आपः (७-१-१८)** सूत्रार्थः - आबन्तादङ्गात्परस्यौङः शी इति आदेशः भवति- इति। औङित्यौकारविभक्तेः = औ, औट् इत्यनयोः संज्ञा।

**(२८८) संबुद्धौ च (७-३-१०६)** सूत्रार्थः - आबन्तस्य एकारः स्यात्संबुद्धौ- इति।

**(२८९) आङि चापः (७-३-१०५)** सूत्रार्थः - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्- इति।

(२९०) **याडापः** (७-३-११३) सूत्रार्थः - आपः परस्य ङिद्वचनस्य (ङे, ङसि, ङस्, ङि) याडागमः स्यात्- इति।

## २.२.२ रमाशब्दस्य प्रक्रिया -

**रमे** - रमाशब्दस्य प्रथमाविभक्तिद्विवचने औप्रत्यये रमा+औ इति स्थिते **औङ आपः** (७-१-१८) इति सूत्रेण औकारस्य शी-इत्यादेशः भवति। रमा+शी इति स्थिते स्थानिवद्भावेन शी-इत्यस्य प्रत्ययत्वम्। ततः **लशक्वतद्धिते** (१.३.८) इत्यनेन शकारस्य इत्सञ्ज्ञायां रमा+ई इति स्थिते **आद्गुणः** (६.१.८७) इति सूत्रेण गुणः रमे इति रूपम्।

**रमाः** - रमाशब्दस्य प्रथमाविभक्तिबहुवचने जस्प्रत्यये रमा+अस् इति स्थिते **अकः सवर्णे दीर्घः** (६.१.१०१) इत्यनेन सवर्णदीर्घः। रमास् इति स्थिते रुत्वे विसर्गे च रमाः इति रूपम्।

**हे रमे** - रमाशब्दस्य सम्बुद्ध्येकवचने स्प्रत्यये हे रमा+स् इति स्थिते **सम्बुद्धौ च** (७.३.१०६) इत्यनेन आकारस्य एकारे हे रमे+स् इति भवति। तदा **एङ्ह्रस्वात् सम्बुद्धिः** (६-१-६९) इति सूत्रेण स्प्रत्ययस्य लोपे हे रमे इति रूपम्।

**रमया** - रमाशब्दस्य तृतीयैकवचने टाप्रत्यये रमा+आ इति स्थिते **आङि चापः** (७.३.१०५) इत्यनेन रमाशब्दान्तस्य आकारस्य एकारः भवति। रमे+आ इति स्थिते **एचोऽयवायावः** (६-१-७८) इत्यनेन अय्-आदेशेः रमय् + आ = रमया इति रूपम्।

**रमायै** - रमाशब्दस्य चतुर्थ्येकवचने ङेप्रत्यये रमा+ए इति स्थिते **याडापः** (७.३.११३) इत्यनेन एकारस्य याट्-आगमः। तदा रमा+या+ए इति स्थिते **वृद्धिरेचि** (६-१-८८) इत्यनेन यकारोत्तर-आकारस्य तथा प्रत्ययस्य एकारस्य च ऐकारः एकादेशः भवति। रमा + यै = रमायै इति रूपं भवति।

रमाशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

## २.२.३ सर्वाशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

(२९१) **सर्वनाम्नः स्याड्ढ्रस्वश्च** (७-३-११४) सूत्रार्थः – आबन्तात्सर्वनाम्नः परस्य ङितः (ङे, ङसि, ङस्, ङि) स्याट् स्यादापश्च ह्रस्वः- इति। आकारस्य अकारः भवति इत्यर्थः।

## २.२.४ सर्वाशब्दस्य प्रक्रिया -

**सर्वस्यै** - सर्वाशब्दस्य चतुर्थ्येकवचने ङेप्रत्यये कृते सर्वा + ए इति स्थिते **सर्वनाम्नः स्याड्ढ्रस्वश्च** (७-३-११४) इति सूत्रेण एकारस्य स्याट् आगमः आकारस्य ह्रस्वः। सर्व + स्या + ए इति स्थिते **वृद्धिरेचि** (६-१-८८) इत्यनेन आकार-ऐकारयोः वृद्धिः। सर्व + स्यै = सर्वस्यै इति रूपम्।

सर्वाशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति। एवं विश्वादय आबन्ताः सर्वनामशब्दाः।

**स्वावलोकनप्रश्नाः -**

(१) औङ् इत्युक्ते कयोः सञ्ज्ञा ?

(२) सुप्प्रत्ययेषु ङित्प्रत्ययाः के ?

(३) आकारान्तसर्वनामशब्दात् परस्य ङित्प्रत्ययस्य कः आगमः भवति ?

### २.२.५ सर्वनामसञ्ज्ञाविकल्पः -

**(२९२) विभाषा दिक्समासे बहुव्रीहौ (१-१-२८)** सूत्रार्थः - दिग्वाचकशब्दैस्सह बहुव्रीहिसमासे सर्वनामता वा स्यात् - इति । अनेन सूत्रेण सर्वनामसञ्ज्ञा विकल्पेन विधीयते।

### २.२.६ द्वितीयातृतीयाशब्दयोः प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(२९३) विभाषा द्वितीयातृतीयाभ्याम् (७-३-११५)** सूत्रार्थः - आभ्यां ङितः स्याड्वा स्यादापश्च ह्रस्वः- इति।

### २.२.७ द्वितीयातृतीयाशब्दयोः प्रक्रिया -

यदा स्याट्-आगमः तदा आकारस्य ह्रस्वः भवति। चतुर्थ्येकवचने ङेप्रत्यये कृते द्वितीयस्यै तृतीयस्यै इति रूपं भवति। सर्वस्यै रूपवत् प्रक्रिया। स्याडागमाभावे ह्रस्वाभावश्च। द्वितीयायै तृतीयायै इति रूपं भवति। रमायै रूपवत् प्रक्रिया।

### २.२.८ अम्बार्थवाचकशब्दानाम् प्रक्रियार्थम् अपेक्षितं वार्त्तिकम् -

**असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न (वा)** वार्त्तिकार्थः - असंयुक्ता- ये डलकान्ताः अम्बार्थाः तेषां ह्रस्वः न भवति सम्बुद्धौ।

### २.२.९ अम्बार्थवाचकशब्दानां प्रक्रिया -

हे अम्बाडे - अम्बाडाशब्दस्य सम्बोधनैकवचने सुप्रत्यये हे अम्बाडा+स् इति स्थिते **अम्बार्थनद्योर्ह्रस्वः (७-३-१०७)** इत्यनेन आकारस्य ह्रस्वः प्राप्तः। तदा **असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न (वा)** इत्यनेन वार्त्तिकेन ह्रस्वस्य निषेधे सति **संबुद्धौ च (७-३-१०६)** इत्यनेन आकरस्य एकारः हे अम्बाडे इति रूपम्। एवमेव हे अम्बाले हे अम्बिके इति रूपे।

अम्बार्थवाचकशब्दानाम् अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

### २.२.१० निशाशब्दस्य प्रक्रियार्थम् अपेक्षिते सूत्रे -

**(२९४) व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (८-२-३६)** सूत्रार्थः - व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च।

**(२९५) षढोः कः सि (८-२-४१)** सूत्रार्थः - षस्य ढस्य च कः स्यात्सकारे परे ।

## २.२.११ निशाशब्दस्य प्रक्रिया -

**निड्भ्याम्** - निशाशब्दस्य तृतीयाविभक्तिद्विवचने भ्याम्प्रत्यये कृते निशा+भ्याम् इति स्थिते **पद्दन्नोमास्हृन्निशसन् यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण निशाशब्दस्य निश्-आदेशे **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (८-२-३६)** इति सूत्रेण शकारस्य षकारः। निष्+भ्याम् इति स्थिते **झलां जशोऽन्ते (८.२.३९)** इत्यनेन षस्य जश्त्वेन डकारः। निड्भ्याम् इति रूपम्।

**निट्त्सु** - निशाशब्दस्य सप्तमीबहुवचने सुप्प्रत्यये कृते निशा+सुप् इति स्थिते **पद्दन्नोमास्हृन्निशसन् यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण निशाशब्दस्य निश्-आदेशे **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (८-२-३६)** इति सूत्रेण शकारस्य षकारः। निष्+सु इति स्थिते **झलां जशोऽन्ते (८.२.३९)** इत्यनेन षस्य जश्त्वेन डकारः। **ङः सि धुट् (८.३.२९)** इत्यनेन सुप्प्रत्ययस्य धुड्-आगमः। निड्+ध्सु इति स्थिते **खरि च (८-४-५५)** इत्यनेन डकारधकारयोः चर्त्वम्। निट्+त्सु=निट्त्सु इति रूपम्।

**निट्सु**- निशाशब्दस्य सप्तमीबहुवचने सुप्प्रत्यये कृते निशा+सु इति स्थिते **पद्दन्नोमास्हृन्निशसन् यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६-१-६३)** इति सूत्रेण निशाशब्दस्य निश्-आदेशे **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (८-२-३६)** इति सूत्रेण शकारस्य षकारः। निष्+सु इति स्थिते **झलां जशोऽन्ते (८.२.३९)** इति सूत्रदृष्ट्या **षढोः कः सि (८.२.४१)** इत्यस्य असिद्धत्वात् **झलां जशोऽन्ते (८.२.३९)** सूत्रमेव प्रवर्तते। तथा च जश्त्वेन डकारादेशे निड्+सु इति स्थिते षकारस्य अभावात् **षढोः कः सि (८.२.४१)** इति सूत्रं न प्रवर्तते। डकारस्य **खरि च (८-४-५५)** इत्यनेन चर्त्वे निट्सु इति रूपम्।

निशाशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

## २.२.१२ पृतनाशब्दस्य प्रक्रियार्थम् अपेक्षितं वार्तिकम् -

**मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा (वा)** वार्तिकार्थः - मांस-इत्यस्य मांस्-आदेशः पृतना -इत्यस्य पृत्-आदेशः सानु-इत्यस्य स्नु-आदेशः विकल्पेन भवति शसादौ प्रत्यये परे- इति।

## २.२.१३ पृतनाशब्दस्य प्रक्रिया -

**पृतः** - पृतनाशब्दस्य द्वितीयाबहुवचने शस्प्रत्यये कृते पृतना+अस् इति स्थिते **मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा (वा)** इति वार्तिकेन पृत्-आदेशे पृत्+अस्=पृतस् इति स्थिते रुत्वे विसर्गे पृतः इति रूपम्।

पृतनाशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नाः -**

(१) विभाषा दिक्समासे बहुव्रीहौ (१-१-२८) इति सूत्रेण सर्वनामसञ्ज्ञा नित्यं विधीयते उत विकल्पेन विधीयते ?

(२) द्वितीयाशब्दस्य आकारस्य ह्रस्वः केन सूत्रेण विधीयते ?

(३) अम्बालाशब्दस्य सम्बोधनैकवचने आकारस्य ह्रस्वः भवति उत न ?

(४) निशाशब्दस्य सप्तम्येकवचने षढोः कः सि (८-२-४१) इति सूत्रस्य प्रवृत्तिः भवति उत न ?

(५) पृतनाशब्दस्य द्वितीयैकवचने किं रूपम् ?

## २.३.० इकारान्तस्त्रीलिङ्गशब्दाः -

### २.३.१. मतिशब्दस्य प्रक्रियार्थम् अपेक्षिते सूत्रे -

**(२९६) ङिति ह्रस्वश्च (१-४-६)** सूत्रार्थः - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।

**(२९७) इदुद्भ्याम् (७-३-११७)** सूत्रार्थः - नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात्।

### २.३.२ मतिशब्दस्य प्रक्रिया -

**मत्यै** - चतुर्थ्येकवचने मतिशब्दात् ङेप्रत्यये मति+ए इति स्थिते **ङिति ह्रस्वश्च (१-४-६)** इत्यनेन नदी सञ्ज्ञा भवति। **आण्नद्याः (७-३-११२)** इत्यनेन एकारस्य आट्-आगमः। मति+आ+ए इति स्थिते **वृद्धिरेचि (६-१-८८)** इत्यनेन आए-इत्यनयोः वृद्धिरेकादेशः। मति+ऐ इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यण् भवति मत्यै इति रूपम्।

**मतये** - नदीसञ्ज्ञाभावे हरिशब्दवत् प्रक्रिया।

**मत्याम्** - सप्तम्येकवचने मतिशब्दात् ङिप्रत्यये मति+इ इति स्थिते **ङिति ह्रस्वश्च (१-४-६)** इत्यनेन नदी सञ्ज्ञा भवति। **इदुद्भ्याम् (७-३-११७)** इत्यनेन सूत्रेण इकारस्य आम्-आदेशः। मति+आम् इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यण् भवति। मत्याम् इति रूपम्। नदीसञ्ज्ञाभावे हरिशब्दवत् प्रक्रिया। मतौ इति रूपम्।

मतिशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

### २.३.३ त्रिचतुर्शब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

**(२९८) त्रिचतुरोः स्त्रियां तिसृचतसृ (७-२-९९)** सूत्रार्थः - स्त्रीलिङ्गस्य त्रिशब्दस्य तिसृ-आदेशः चतुर्शब्दस्य चतसृ-आदेशः भवति विभक्तौ परतः- इति।

**(२९९) अचि र ऋतः (७-२-१००)** सूत्रार्थः - तिसृचतसृ-एतयोर्ऋकारस्य रेफादेशः स्यादचि- इति।

**(३००) न तिसृचतसृ (६-४-४)** सूत्रार्थः - एतयोर्नामि दीर्घो न स्यात्- इति।

### २.३.४ त्रिचतुर्शब्दस्य प्रक्रिया -

**तिस्रः -** त्रिशब्दात् प्रथमाबहुवचने जस्प्रत्यये त्रि+अस् इति स्थिते **त्रिचतुरोः स्त्रियां तिसृचतसृ (७-२-९९)** इत्यनेन त्रिशब्दस्य तिसृादेशः। तिसृ+अस् इति स्थिते **अचि र ऋतः (७-२-१००)** इत्यनेन ऋवर्णस्य रेफादेशः। तिस्रस् इति स्थिते रुत्वे विसर्गे च तिस्रः इति रूपम्। एवमेव चतस्रः इत्यपि भवति।

**तिसृणाम् -** त्रिशब्दात् षष्ठीबहुवचने आम्प्रत्यये त्रि+आम् इति स्थिते **त्रिचतुरोः स्त्रियां तिसृचतसृ (७-२-९९)** इत्यनेन त्रिशब्दस्य तिसृादेशः। तिसृ+आम् इति स्थिते **नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वा)** इति वार्त्तिकेन आमः नुडागमः। तिसृ+नाम् इति स्थिते **नामि (६-४-३)** इत्यनेन दीर्घे प्राप्ते **न तिसृचतसृ (६-४-४)** इत्यनेन दीर्घनिषेधः। ततः **ऋवर्णान्नस्य णत्वं वाच्यम् (वा)** इति वार्त्तिकेन नस्य णत्वम्। तिसृणाम् इति रूपं भवति।

त्रिचतुर्शब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) मतिशब्दस्य सप्तम्येकवचनस्य प्रत्ययस्य कः आदेशः भवति ?

(२) तिसृशब्दस्य षष्ठीबहुवचने किं रूपम् ?

## २.४.० ईकारान्तस्त्रीलिङ्गशब्दाः -

### २.४.१ स्त्रीशब्दस्य प्रक्रियार्थम् अपेक्षिते सूत्रे -

**(३०१) स्त्रियाः (६-४-७९)** सूत्रार्थः - स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे- इति।

**(३०२) वाऽम्शसोः (६-४-८०)** सूत्रार्थः - अमि शसि च स्त्रिया इयङ् वा स्यात्- इति।

### २.४.२ स्त्रीशब्दस्य प्रक्रिया -

**स्त्रियौ -** स्त्रीशब्दस्य प्रथमाद्विवचने औप्रत्यये कृते स्त्री+औ इति स्थिते **स्त्रियाः (६-४-७९)** इति सूत्रेण ईकारस्य इयङ्-आदेशः भवति। स्त्रिय्+औ=स्त्रियौ इति रूपम्।

**स्त्रियम् -** स्त्रीशब्दस्य द्वितीयैकवचने अम्प्रत्यये कृते स्त्री+अम् इति स्थिते **वाऽम्शसोः (६.४.८०)** इत्यनेन ईकारस्य विकल्पेन इयङ्-आदेशः। स्त्रिय्+अम्=स्त्रियम् इति रूपम्।

**स्त्रीम् -** स्त्रीशब्दस्य द्वितीयैकवचने अम्प्रत्यये कृते स्त्री+अम् इति स्थिते **वाऽम्शसोः (६.४.८०)** इत्यनेन ईकारस्य विकल्पेन इयङ्-आदेशाभावः। स्त्री+अम् इति स्थते **अमि पूर्वः (६-१-१०७)** इत्यनेन पूर्वरूपम्। स्त्रीम् इति रूपं भवति।

स्त्रीशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

### २.४.३ श्रीशब्दस्य प्रक्रियार्थम् अपेक्षिते सूत्रे -

**(३०३) नेयङुवङ्स्थानावस्त्री (१-४-४)** सूत्रार्थः - इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री- इति।

**(३०४) वामि (१-४-५)** सूत्रार्थः - इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री।

### २.४.४ श्रीशब्दस्य प्रक्रिया -

**हे श्रीः** - श्रीशब्दस्य सम्बोधनैकवचने सुप्रत्यये हे श्री+स् इति स्थिते **नेयङुवङ्स्थानावस्त्री (१-४-४)** इत्यनेन नदीसञ्ज्ञानिषेधे **अम्बार्थनद्योर्ह्रस्वः (७-३-१०७)** इत्यनेन ईकारस्य ह्रस्वः न भवति। हे श्रीस् इति स्थिते सकारस्य रुत्वे विसर्गे हे श्रीः इति रूपम्।

**श्रीणाम्** - श्रीशब्दस्य षष्ठीबहुवचने आम्प्रत्यये श्री+आम् इति स्थिते **वामि (१-४-५)** इत्यनेन विकल्पेन नदीसञ्ज्ञायां **ह्रस्वनद्यापो नुट् (७-१-५४)** इत्यनेन आमः नुट्-आगमः। श्री+नाम् इति स्थिते **अट्कुप्वाङ्नुम्व्यवायेऽपि (८-४-२)** इत्यनेन नकारस्य णत्वे श्रीणाम् इति रूपम्।

**श्रियाम्** - श्रीशब्दस्य षष्ठीबहुवचने आम्प्रत्यये श्री+आम् इति स्थिते **वामि (१-४-५)** इत्यनेन विकल्पेन नदीसञ्ज्ञाभावे **अचिश्नुधातुभ्रुवां य्वोरियङुवङौ (६-४-७७)** इत्यनेन ईकारस्य इयङ्-आदेशे श्रिय्+आम्=श्रियाम् इति रूपम्।

श्रीशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) स्त्रीशब्दस्य कदा केन सूत्रेण इयङ्-आदेशः भवति ?

(२) श्रीशब्दस्य सम्बोधनैकवचने अम्बार्थनद्योर्ह्रस्वः (७-३-१०७) इत्यस्य प्रवृत्तिः भवति वा न वा ?

## २.५.० उकारान्तस्त्रीलिङ्गशब्दाः -

### २.५.१ क्रोष्टुशब्दस्य प्रक्रियार्थम् अपेक्षिते सूत्रे -

**(३०५) स्त्रियां च (७-१-९६)** सूत्रार्थः - स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते। अर्थात् क्रोष्टृ-इत्येव रूपं लभते।

**(३०६) ऋन्नेभ्यो ङीप् (४-१-५)** सूत्रार्थः - ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप्स्यात्।

### २.५.२ क्रोष्टुशब्दस्य प्रक्रिया -

**क्रोष्ट्री** - क्रोष्टुशब्दस्थाने स्त्रीलिङ्गे क्रोष्टृशब्दस्य प्रयोगः। **ऋन्नेभ्यो ङीप् (४-१-५)** इत्यनेन क्रोष्टृशब्दात् ङीप्रत्ययः। क्रोष्टृ+ई इति स्थिते **इको यणचि (६-१-७७)** इत्यनेन यणादेशे क्रोष्ट्री इति भवति। ततः प्रथमैकवचने सुप्रत्यये कृते **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६-१-७८)** इत्यनेन सुलोपे क्रोष्ट्री इति रूपम्।

क्रोष्टुशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) क्रोष्टुशब्दस्य स्थाने स्त्रीलिङ्गे कस्य शब्दस्य प्रयोगः भवति ?

(२) क्रोष्टुशब्दस्य स्त्रीलिङ्गे प्रथमैकवचने स्प्रत्ययस्य लोपः केन सूत्रेण ?

## २.६.० ऊकारान्तस्त्रीलिङ्गशब्दाः -

### ९.६.१ पुनर्भूशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३०७) एकाजुत्तरपदे णः (८-४-१२)** सूत्रार्थः - एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्- इति।

### २.६.१ पुनर्भूशब्दस्य प्रक्रिया -

**पुनर्भूणाम्-** पुनर्भूशब्दस्य षष्ठीबहुवचने आम्प्रत्यये पुनर्भू+आम् इति स्थिते **ह्रस्वनद्यापो नुट् (७-१-५४)** इत्यनेन आमः नुट्-आगमः। पुनर्भू+नाम्=पुनर्भूनाम् इति स्थिते **एकाजुत्तरपदे णः (८-४-१२)** इत्यनेन सूत्रेण नस्य णत्वं भवति। पुनर्भूणाम् इति रूपं भवति।

पुनर्भूशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) पुनर्भूशब्दस्य षष्ठीबहुवचने णत्वं केन सूत्रेण ?

(२) एकाजुत्तरपदे णः (८-४-१२) इति सूत्रेण णत्वं नित्यं भवति उत विकल्पेन ?

## ९.७.० ऋकारान्तस्त्रीलिङ्गशब्दाः -

### २.७.१ स्वसृशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३०८) न षट्स्वस्रादिभ्यः (४-१-१०)** सूत्रार्थः - षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः।

### २.७.२ स्वसृशब्दस्य प्रक्रिया -

**स्वसा-** स्वसृशब्दस्य प्रथमैकवचने **न षट्स्वस्रादिभ्यः (४-१-१०)** इत्यनेन ङीप्टापौ न स्तः इत्युक्तत्वात् स्वसृशब्दात् एव स्त्रीलिङ्गे स्प्रत्ययः। स्वसृ+स् इति स्थिते **ऋदुशनस्पुरुदंसोऽनेहसां च (७-१-९४)** इत्यनेन ऋवर्णस्य अनङ्-आदेशः। स्वसन्+स् इति स्थिते **अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् (६-४-११)** इत्यनेन उपधायाः दीर्घः। स्वसान्+स् इति स्थिते **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६-१-७८)** इत्यनेन स्लोपः। स्वसान् इति स्थिते **न लोपः प्रातिपदिकान्तस्य (८-२-७)** इत्यनेन नलोपेः स्वसा इति रूपं भवति।

स्वसृशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) स्वसृशब्दात् ङीप्रत्ययः भवति उत न ?

(२) स्वसृशब्दस्य प्रथमैकवचने उपधादीर्घः केन सूत्रेण ?

**।। इति अजन्तस्त्रीलिङ्गप्रकरणम् ।।**

## तृतीयखण्डः

# ।। अजन्तनपुंसकलिङ्गप्रकरणम् ।।

**संरचना**

३.० प्रस्तावना।
३.१ लक्षिताधिगमविशेषाः।
३.२.० अकारान्तनपुंसकलिङ्गशब्दाः।
३.३.० आकारान्तनपुंसकलिङ्गशब्दाः
३.४.० इकारान्तनपुंसकलिङ्गशब्दाः।
३.५.० ओकारान्तनपुंसकलिङ्गशब्दाः।

## ३.० प्रस्तावना -

एतावत्पर्यन्तम् अस्माभिः शब्दाधिकारे अजन्तपुंल्लिङ्गप्रकरणम् अजन्तस्त्रीलिङ्गप्रकरणञ्चाधीतम्। इदानीम् अजन्तनपुंसकलिङ्गशब्दानां विषये ज्ञास्यामः। येषां शब्दानां व्यवहारः नपुंसकलिङ्गे अस्ति ते नपुंसकलिङ्गशब्दाः। अस्मिन् प्रकरणे अजन्तनपुंसकलिङ्गशब्देषु अकारान्त-आकारान्त-इकारान्त-ओकारान्तशब्दानां विषये ससूत्रं ज्ञास्यामः।

## ३.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः-

- अजन्तनपुंसकलिङ्गशब्दान् ज्ञास्यन्ति।
- सर्वेषाम् अजन्तनपुंसकलिङ्गशब्दानां परिचयं प्राप्नुवन्ति।
- एकं शब्दं ज्ञात्वा बहून् शब्दान् वक्तुं प्रभवन्ति।
- अजन्तनपुंसकलिङ्गप्रकरणस्थानि सूत्राणि तेषामर्थं च ज्ञास्यन्ति।
- वाक्यप्रयोगवेलायां नपुंसकलिङ्गशब्दानां विभक्तिपरिवर्तनं ज्ञास्यन्ति।

## ३.२.० अकारान्तनपुंसकलिङ्गशब्दाः -

### १०.२.१ ज्ञानशब्दस्य प्रक्रियार्थम् अपेक्षितानि सूत्राणि -

**(३०९) अतोऽम् (७-१-२४)** सूत्रार्थः - अतोऽङ्गात् क्लीबात्स्वमोरम् स्यात्- इति।

**(३१०) नपुंसकाच्च (७-१-१९)** सूत्रार्थः - क्लीबात्परस्यौङः = औ,औट्-इत्यनयोः शी स्यात् - इति।

**(३११) यस्येति च (६-४-१८४)** सूत्रार्थः - भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे- इति।

**औङः श्यां प्रतिषेधो वाच्यः (वा)** वार्त्तिकार्थः - औ-ओट्-इत्यनयो स्थाने यः शी-इत्यादेशः भवति तस्मिन् शी-आदेशे परे भस्य इवर्णस्य उवर्णस्य च लोपः न भवति।

**(३१२) जश्शसोः शिः (७-१-२०)** सूत्रार्थः - क्लीबात् परयोः जस्-शस्-इत्यनयोः शि-इत्यदेशः स्यात्- इति।

**(३१३) शि सर्वनामस्थानम् (१-१-४२)** सूत्रार्थः - 'शि'इत्येतस्य सर्वनामस्थानसंज्ञा स्यात्- इति।

**(३१४) नपुंसकस्य झलचः (७-१-७२)** सूत्रार्थः - झलन्तस्य अजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे- इति।

## ३.२.२ ज्ञानशब्दस्य प्रक्रिया -

**ज्ञानम्** - ज्ञानशब्दात् प्रथमाविभक्त्येकवचने सुप्रत्यये कृते ज्ञान+स् इति स्थिते **अतोऽम् (७.१.२४)** इत्यनेन सुप्रत्ययस्य अम् आदेशः। ज्ञान+अम् इति स्थिते **अमि पूर्वः (६-१-१०७)** इत्यनेन पूर्वरूपं भवति। ज्ञानम् इति रूपं भवति।

**ज्ञाने** - ज्ञानशब्दात् प्रथमाविभक्तिद्विवचने औप्रत्यये कृते ज्ञान+औ इति स्थिते **नपुंसकाच्च (७-१-१९)** इत्यनेन औकारस्य शी-आदेशः। शकारस्य **लशक्वतद्धिते (१-३-८)** सूत्रेण इत्सञ्ज्ञा। ज्ञान+ई इति स्थिते **यस्येति च (६-४-१८४)** इति सूत्रेण नकारोत्तर-अकारस्य लोपे प्राप्ते **औङः श्यां प्रतिषेधो वाच्यः (वा)** इति वार्त्तिकेन तस्य निषेधः क्रियते। **आद्गुणः (६.१.८७)** इति सूत्रेण ज्ञाने इति रूपं भवति।

**ज्ञानानि** - ज्ञानशब्दात् प्रथमाविभक्तिबहुवचने जस्प्रत्यये कृते ज्ञान+जस् इति स्थिते **जश्शसोः शिः (७-१-२०)** इति सूत्रेण जसः स्थाने शि-इत्यादेशो भवति। शकारस्य **लशक्वतद्धिते (१-३-८)** इति सूत्रेण इत्सञ्ज्ञा। **शि सर्वनामस्थानम् (१-१-४२)** इति सूत्रेण 'शि'इत्येतस्य = इकारस्य सर्वनामस्थानसंज्ञा भवति। **नपुंसकस्य झलचः (७-१-७२)** इति सूत्रेण नकारोत्तर-अकारानन्तरं नुम् आगमः भवति। ज्ञानन्+इ इति स्थिते **सर्वनामस्थाने चासम्बुद्धौ (६-४-८)** इत्यनेन उपधादीर्घः = नकारोत्तर-अकारस्य दीर्घः। ज्ञानानि इति रूपं भवति।

ज्ञानशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) अकारान्तनपुंसकलिङ्गात् परयोः स्वमोः कः आदेशः स्यात् ?

(२) ज्ञानानि इत्यत्र नुम्-आगमः कस्य भवति ?

## ३.२.३ सर्वनामशब्दस्य प्रक्रियार्थम् अपेक्षिते सूत्रे -

**(३१५) अद्ड्डतरादिभ्यः पञ्चभ्यः (७-१-२५)** सूत्रार्थः - डतर-डतम-प्रत्ययान्तात् शब्दात्, अन्यशब्दात् अन्यतरशब्दात् इतरशब्दात् परयोः सु-अम्-प्रत्यययोः अद्ड् आदेशः स्यात्- इति।

**(३१६) टेः (६-४-१४३)** सूत्रार्थः - डिति परे भस्य टेर्लोपः स्यात्- इति।

**एकतरात्प्रतिषेधो वक्तव्यः (वा)** वार्त्तिकार्थः - एकतरशब्दात् परयोः स्वमोः अद्ड् आदेशः न भवति इति वक्तव्यम् - इति।

## ३.२.४ सर्वनामशब्देषु कतरशब्दस्य प्रक्रिया -

**कतरद् - कतरत्** - कतरशब्दात् प्रथमाविभक्त्येकवचने कतर+स् इति स्थिते **अद्ड्डतरादिभ्यः**

**पञ्चभ्यः (७-१-२५)** इति सूत्रेण स्प्रत्ययस्य अद्ड् आदेशः। अद्डि इत्सञ्ज्ञकवर्णयोः लोपानन्तरं कतर+अद् इति स्थिते **टेः (६-४-१४३)** इति सूत्रेण रेफोत्तर-अकारस्य लोपः। कतर्+अद्= कतरद् इति रूपम्। कतरद् इत्यवस्थायां **वाऽवसाने (८-४-५६)** इति सूत्रेण विकल्पेन चर्त्वे दकारस्य तकारः। कतरत् इति रूपम्।

कतरशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

## ३.२.५ सर्वनामशब्देषु एकतरशब्दस्य प्रक्रिया -

**एकतरम् -** एकतरशब्दात् प्रथमाविभक्त्येकवचने एकतर+स् इति स्थिते **अद्ड्डतरादिभ्यः पञ्चभ्यः (७-१-२५)** इति सूत्रेण स्प्रत्ययस्य अदड्-आदेशे प्राप्ते **एकतरात्प्रतिषेधो वक्तव्यः (वा)** इति वार्त्तिकेन अदड्-आदेशस्य निषेधः क्रियते। तदा **अतोऽम् (७-१-२४)** इत्यनेन स्प्रत्ययस्य अम्-आदेशे **अमि पूर्वः (६-१-१०७)** इत्यनेन पूर्वरूपम्। एकतरम् इति रूपं भवति।

एकतरशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) कतरत् इत्यत्र केन सूत्रेण चर्त्वं भवति ?

(२) एकतरम् इत्यत्र अदड् आदेशः कुतः न भवति ?

## ३.२.६ अजरशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३१७) सान्तमहतः संयोगस्य (६-४-१०)** सूत्रार्थः - सकारान्तसंयोगस्य महतश्च यो नकारस्तस्योपधायाः दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे- इति।

## ३.२.७ अजरशब्दस्य प्रक्रिया -

**अजरांसि -** अजरशब्दस्य प्रथमाबहुवचने जस्प्रत्यये कृते **जश्शसोः शि (७.१.२०)** इत्यनेन जसः शि-इत्यादेशः। **शि सर्वनामस्थानम् (१-१-४२)** इति सूत्रेण शि इत्यस्य सर्वनामस्थानसञ्ज्ञा भवति। अजर+इ इति स्थिते **जराया जरसन्यतरस्याम् (७-२-१०१)** इत्यनेन जराशब्दस्य जरस्-आदेशः अजरस्+इ इति स्थिते **नपुंसकस्य झलचः (७-१-७२)** इत्यनेन रेफोत्तर-अकारात् परं नुम्-आगमः भवति। अजरन्स्+इ इति स्थिते **सान्तमहतः संयोगस्य (६-४-१०)** इति सूत्रेण उपधादीर्घः = रेफोत्तर-अकारस्य दीर्घः। अजरान्स्+इ इति स्थिते **नश्चापदान्तस्य झलि (८-४-२४)** इत्यनेन नकास्य अनुस्वारः। अजरांस्+इ=अजरांसि इति रूपम्।

**अजराणि -** अजरशब्दस्य प्रथमाबहुवचने जरस्-आदेशाभावे ज्ञानानि रूपवत् प्रक्रिया भवति।

अजरशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) अजरांसि इत्यत्र नुम्-आगमः कुत्र भवति ?

(२) सान्तमहतः संयोगस्य (६-४-१०) इत्यनेन किं विधीयते ?

## ३.३.० आकारान्तनपुंसकलिङ्गशब्दाः -

### ३.३.१ श्रीपाशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३१८) ह्रस्वो नपुंसके प्रातिपदिकस्य (१-२-४७)** सूत्रार्थः - क्लीबे प्रातिपदिकस्य अजन्तस्य ह्रस्वः स्यात्- इति।

### ३.३.२ श्रीपाशब्दस्य प्रक्रिया -

**श्रीपम् -** श्रीपाशब्दस्य प्रथमैकवचने सुप्रत्यये कृते **ह्रस्वो नपुंसके प्रातिपदिकस्य (१-२-४७)** इत्यनेन आकारस्य ह्रस्वे श्रीप+स् इति स्थिते **अतोऽम् (७-१-२४)** इत्यनेन स्-इत्यस्य अम्-आदेशः। श्रीप+अम् इति स्थिते **अमि पूर्वः (६-१-१०७)** इत्यनेन पूर्वरूपं भवति। श्रीपम् इति रूपं भवति।

श्रीपाशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) श्रीपाशब्दस्य आकारस्य ह्रस्वः केन सूत्रेण भवति ?

(२) श्रीपाशब्दस्य प्रथमाविभक्त्येकवचनरूपं किम् ?

## ३.४.० इकारान्तनपुंसकलिङ्गशब्दाः -

### १०.४.१ वारिशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३१९) स्वमोर्नपुंसकात् (७-१-२३)** सूत्रार्थः - क्लीबादङ्गात्स्वमोर्लुक् स्यात्- इति।

**(३२०) इकोऽचि विभक्तौ (७-१-७३)** सूत्रार्थः - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ- इति।

**वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेन (वा)** वार्त्तिकार्थः - वृद्धि-औत्त्व-तृजवद्भाव-गुणानाम् अपेक्षया पूर्वविप्रतिषेधेन नुम् भवति।

### ३.४.२ वारिशब्दस्य प्रक्रिया -

**वारि -** वारिशब्दस्य प्रथमाविभक्त्येकवचने वारि+स् इति स्थिते **स्वमोर्नपुंसकात् (७-१-२३)** इति सूत्रेण सुप्रत्ययस्य लुक् (लोपः)। वारि इति रूपम्।

**वारिणे -** वारिशब्दस्य चतुर्थीविभक्त्येकवचने वारि+ए इति स्थिते **घेर्ङिति (७-३-१११)** इत्यनेन गुणे प्राप्ते **वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेन (वा)** इति वार्त्तिकेन गुणं बाधित्वा

नुम् एव भवति इत्युच्यते। अतः **इकोऽचि विभक्तौ (७-१-७३)** इत्यनेन रेफोत्तर-अकारात् परं नुम् आगमः भवति। वारिन्+ए = वारिने इति स्थिते **अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२)** इत्यनेन णत्वे वारिणे इति रूपम्।

वारिशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

## ३.४.३ अनादिशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३२१) तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (७-१-७४)** सूत्रार्थः – प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि- इति।

## १०.४.४ अनादिशब्दस्य प्रक्रिया -

**अनादये -** अनादिशब्दस्य चतुर्थ्येकवचने अनादि+ए इति स्थिते **तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (७-१-७४)** इत्यनेन विकल्पेन पुंस्त्वम्। ततः **घेर्ङिति (७-३-१११)** इत्यनेन गुणः। अनादे+ए इति स्थिते एचोऽयवायावः इत्यनेन अयादेशः अनादय्+ए=अनादये इति रूपम्।

**अनादिने -** अनादिशब्दस्य चतुर्थ्येकवचने अनादि+ए इति स्थिते **तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (७-१-७४)** इत्यनेन विकल्पेन पुंस्त्वाभावे सति **इकोऽचि विभक्तौ (७-१-७३)** इत्यनेन दकारोत्तर-अकारात् परं नुम् आगमः भवति। अनादिन्+ए = अनादिने इति रूपम्।

अनादिशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

## ३.४.५ दधिशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३२२) अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः (७-१-७५)** सूत्रार्थः - एषामनङ् स्याट्टादावचि स चोदात्तः- इति।

## ३.४.६ दधिशब्दस्य प्रक्रिया -

**दध्ना -** दधिशब्दस्य तृतीयैकवचने टाप्रत्यये कृते दधि+आ इति स्थिते **अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः (७-१-७५)** इत्यनेन दधिशब्दस्य अन्त्य-अकारस्य अनङ्-आदेशः भवति। दधन्+आ इति स्थिते **अल्लोपोऽनः (६-४-१३४)** इत्यनेन धकारोत्तर-अकारस्य लोपे दध्न् + आ = दध्ना इति रूपम्।

दधिशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नाः -**

(१) वारिशब्दात् परस्य स्प्रत्ययस्य लुक् (लोपः) केन सूत्रेण ?

(२) वारिणे इत्यत्र नुम् कथं भवति ?

(३) अनादिशब्दस्य चतुर्थ्येकवचने अनादये अनादिने इति रूपद्वयं कथं भवति ?

(४) अनादिने इत्यत्र नुम् केन सूत्रेण ?

(५) दधिशब्दस्य अनङ्-आदेशः कुत्र भवति ?

(६) दधन्+आ इत्यवस्थायाम् अल्लोपोऽनः (६-४-१३४) इति सूत्रेण कस्य लोपः भवति ?

## ३.५.० ओकारान्तनपुंसकलिङ्गशब्दाः -

### ३.५.१ प्रद्योशब्दस्य प्रक्रियार्थम् अपेक्षितं सूत्रम् -

**(३२३) एच इग्घ्रस्वादेशे (१-१-४८)** सूत्रार्थः - आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात्- इति।

### ३.५.२ प्रद्योशब्दस्य प्रक्रिया -

**प्रद्यु -** प्रद्योशब्दस्य प्रथमैकवचने सुप्रत्यये प्रद्यो+स् इति स्थिते **ह्रस्वो नपुंसके प्रातिपदिकस्य (१-२-४७)** इत्यनेन प्रातिपदिकस्य ह्रस्वे प्राप्ते ओकारस्य ह्रस्वाभावात् **एच इग्घ्रस्वादेशे (१-१-४८)** इति सूत्रेण इक् भवति। तत्र उत्पत्तिस्थानसाम्यात् ओकारस्य उकारः भवति। प्रद्यु+स् इति स्थिते **स्वमोर्नपुंसकात् (७-१-२३)** इत्यनेन सुप्रत्ययस्य लोपः। प्रद्यु इति रूपम्।

प्रद्योशब्दस्य अन्यानि रूपाणि पूर्वं ज्ञातैः सूत्रैरेव सिध्यन्ति।

**स्वावलोकनप्रश्नौ -**

(१) प्रद्योशब्दस्य ओकारस्य ह्रस्वः केन सूत्रेण ?

(२) एच्वर्णानां ह्रस्वत्वे इक्वर्णाः भवन्ति चेत् ओकारस्य स्थाने कः वर्णः आगच्छति ?

**।। इति अजन्तनपुंसकलिङ्गप्रकरणम् ।।**

# ।। चतुर्थखण्डः ।।

## स्त्रीप्रत्ययानां तथा लिङ्गविधानव्यवस्थायाः सामान्यकथनम्

### ४.१. प्रस्तावना

लिङ्गं किम् ? इति निर्वचनावसरे उपायद्वयमाविष्करणीयं जायते । एकं व्युत्पत्तिमूलकम्, अपरञ्च लक्षणात्मकं निर्वचनम् । व्युत्पत्तौ 'लिङ्गि चित्रणे' इति चुरादिगणीयधातोः घञ्प्रत्यये एतस्य शब्दस्य निष्पत्तिः सङ्केतविशेषस्तदर्थः । कोषादिषु तदेव उपस्थापितं विद्यते । लिङ्गं = चिह्नम्, अनुमानम्, शेफः .... इति शब्दकल्पद्रुमः लक्षणद्वारा लिङ्गस्य निर्वचनं शास्त्रकृद्भिरुपायत्रयेण कृतं दृश्यते । तद्विचारानुरोधात् सत्त्व–रजस्तमोगुणानामस उपचय–अपचयादिव्यवहारः लिङ्गनिरूपणे क्षेमः । अयमत्र निष्कर्षः यत् लिङ्गस्य विधानं प्राचीनऋषितः आरभ्य प्रवृत्तं वर्त्तते । तद्विचारेण सत्त्वादिगुणपरिणामः शास्त्रीयं लिङ्गम् । तद्विशेषः वृद्धिपरिणामः पुंस्त्वम्, ह्रासपरिणाम स्त्रीत्वम्, समभावेन परिणामः नपुंसकतवम् । गु.णळपषक्षिरणामसामान्यधर्मः लिङ्गत्वम् । लोकव्यवहारक्रमेण अस्य नियमस्य विपर्य्यासः जातस्तदनुरोधेन स्त्री, पुमान्, नपुंसकम् इति शब्दमर्य्यादया लिङ्गस्य विवेचनं प्रारब्धं जातश्च । एवञ्च लोकव्यवहारमादाय व्यवहारमहिम्ना शब्दव्यवहारे लिङ्गचर्च्चा सिद्धान्तिताः । लिङ्गस्य किं लक्षणम ? यथार्थम् इति निश्चिततया उपस्थापयितुं न शक्यते, केवलं विवेचनया प्रयोगात्मकविधिना च निर्द्धारयितुं शक्यते । प्रयोगे शब्दभेदसाधने लिङ्गस्य नियामकता विचारे प्रवृत्ता भवति ।

प्रातिपदिकस्य शास्त्रीयविचारवेलायां जाति–व्यक्ति–लिङ्ग–संख्या–कारकमिति पञ्चकं प्रातिपदिकार्थः स्वीकृतो विद्यते । शब्दनिष्पत्तिमात्रे तु अर्थाः निर्मीयन्ते निष्पद्यन्ते च । अयं खलु पारिभाषिकः अर्थविशेषः । प्रातिपदिकस्यायमेको धर्मः, येन एकस्मात् अपरं भिद्यते । तद्विधौ शब्दोपपादने अनेके उपायाः

१. निर्दिष्टे तस्मिन् शब्दे टावादिप्रत्ययद्वारा स्त्रीत्वस्य प्रकाशनम् ।
२. शब्दान्तरकल्पनया स्त्रीत्वस्य प्रकाशनम् ।
३. शब्दानां नित्यस्त्रिलिङ्गताप्रदर्शनम् ।
४. शब्दानां नित्यपुँल्लिङ्गताप्रदर्शनम् ।
५. शब्दानां नित्यक्लीवादिलिङ्गसन्धानम् ।

लिङ्गं शब्दनिष्ठमर्थनिष्ठं वेति विचारमादाय शास्त्रकारेषु बहुधा विवेचनमवाप्तं दृश्यते । पाणिनीयव्याकरणे लिङ्गविचारस्य कृते स्वतन्त्रतया किमपि प्रकरणात्मकं निर्वचनमुपपादनं वा कृतं न दृश्यते । किन्तु प्रातिपदिकनिष्ठस्य लिङ्गस्य द्योतने टावादिप्रत्ययव्यवस्था उपजायते । तदर्थमेकं प्रकरणम् स्त्रीप्रत्यय–प्रकरणम् । अस्मिन् प्रकरणे टाप्–डाप्–चाप्–ङीप्–ङीष्–ङीन्–ऊङ् इत्येतेषां प्रत्ययानां समुपस्थापनं कृतं विद्यते । तत्र प्रकरणे ७९ सूत्राणि ३६ वार्त्तिकवचनानि अभिलषितानि प्रोक्तानि च विद्यन्ते । अष्टाध्याय्यां तानि सूत्राणि चतुर्थाध्यायस्य प्रथमपादे पठितानि विद्यन्ते । तत्तत्सूत्रैः प्रत्ययानां विधानं,

निषेधः, वैकल्पिकविधानमिति उपायत्रयेण प्रतिपादनं लक्षीकृतं विद्यते । सूत्रसंघटने यत् कौशलं पाणिनिनाऽवलम्ब्यते तत्सर्वमवधीयते ।

१. अधिकारसंयोजनम् २. अनुवृत्तिनिर्द्देशः ३. चादिनिपातानां निर्द्देशः ४. आदिशब्दनिर्द्देशः ५. प्राक्पाणिनीयानामाचार्य्याणां नामनिर्द्देशः ६. बहुवचननिर्द्देशः ७. प्रकृतिनिर्देशः, ८. प्रत्ययनिर्द्देशश्चेति इमे पाणिनीयाः उपायाः । सिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे रूपसाधने संघटने च गणपाठादिव्यवस्थामादाय २५३ संख्यकाः शब्दाः प्रतिपादनीयाः दृश्यन्ते । इत्थञ्च तस्याकलनम्

| | | |
|---|---|---|
| १. | टाप् | १६० |
| २. | ड़ाप् | ०४ |
| ३. | चाप् | ०४ |
| ४. | ङीप् | ५९ |
| ५. | ङीष् | २४१ |
| ६. | ङीन् | २० |
| ७. | ऊङ् | १४ |
| ८. | ति | ०१ |
| | | २५३ रूपाणि |

ये च शब्दाः पुंसि स्त्रियां च पुनः विपरिणामयितव्याः, तेषां कृते एषा व्यवस्था व्युत्पाद्यते । किं बहुना उत्सर्गापवादविधिः, विकल्पविधिः नित्यविधि, विकल्पविधिः नित्यविधिश्चेति भावेन सूत्राणि वार्त्तिकवचनानि तद्दिशा पाणिनीयं कौशलं गृह्णन्ति ।

टावादिप्रत्ययाः सप्त, यत्रानुबन्धवर्णानां निर्द्देशः, विभिन्नोद्देश्येन तस्य फलम्, प्रक्रियात्मकं कार्य्यं वाऽपेक्षितं वर्त्तते । गृहीताः प्रकृतयः सकौशलमुपपादिताः १. साक्षात् प्रातिपदिकोपपादनपुरस्सरं प्रकृतयः २. गणनिर्द्देशः ३. प्रत्ययान्तनिर्द्देशः ४. वर्णग्रहणम् ५. अनुबन्धनिर्द्देशः ६. समासनिर्द्देशः ७. अङ्गवाचकशब्दनिर्द्देशः ८. उपधानिर्द्देशः ९. जातिवाचि-शब्दनिर्द्देशः १०. निपातनसिद्धिव्यवस्था ११. प्रकृतिभागे आगमव्यवस्था १२. प्रकृतिभागे आदेशव्यवस्था चेति ।

इत्थं विभिन्नैरुपायैः प्रकृतिप्रत्ययनिर्द्देशपुरस्सरं शब्दानां स्त्रीप्रत्यये रूपाणि साधितानि सन्ति । एषा पाणिनीयव्याकरणे प्रतिपन्ना व्यवस्था । शब्दानां वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टावादिप्रत्ययाः उपतिष्ठन्ते ।

## ४.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

. किं नाम लिङ्गम् ? तस्य भेदाः ।

- . शब्दस्य लिङ्गविधानव्यवस्था ।
- . प्रातिपदिकनिष्पत्तौ स्त्रीप्रत्यया: ।
- . पाणिनीयव्याकरणे स्त्रीप्रत्ययविधानव्यवस्था ।
- . स्त्रीप्रत्ययविधानोद्दिष्टानि पाणिनीयसूत्राणि वार्त्तिकवचनानि च ।
- . स्त्रीप्रत्ययोद्दिष्टसूत्राणां सञ्चरणोपाय: ।
- . सूत्रेषु गृहीता: प्रकृतय: ।
- . सूत्रेषु गृहीता: प्रत्यया: ।
- . प्रकृतिभागे आगमादेशादिकार्य्यम् ।
- . निपातनसिद्धव्यवस्थाकल्पनम् ।

## ४.३. लिङ्गम्, तस्य भेदा:

लिङ्गं किम् ? इति निर्वचनावसरे उपायद्वयमाविष्करणीयं जायते । एकं व्युत्पत्तिमूलकम्, अपरञ्च लक्षणात्मकम् । व्युत्पत्तौ 'लिङ्ग'चित्रणे इति चुरादिगणीयधातो: घञ्प्रत्यये एतस्य शब्दस्य निष्पत्ति: । सङ्केतविशेषस्तदर्थ: । कोशवचनेषु तदेव संस्थापितं वर्त्तते । लिङ्गम् = चिह्नम्, अनुमानम् शब्दकल्पद्रुम: / वाचस्पत्यम् लिङ्ग्यते = गम्यतेऽतीन्द्रियार्थोऽनेनेति, अथवा लीनं तीरोहितमर्थे गमयतीति, लिङ्ग्यते विशेषेण ज्ञायतेऽनेनेति लिङ्गम् ।

लक्षणद्वारा लिङ्गस्य निर्वचनं कृतं दृश्यते । प्राचीनानां तत्त्वज्ञानां विचारानुरोधात् सत्त्व-रजस्तमोगुणानाम् उपचय-अपचयादिव्यवहारलौकिकस्वरूपम् । महाभाष्यकार-कैयट-भर्त्तृहरि-हेलाराज-नागेशप्रभृतय: तस्यावधानं साधयन्ति । तदुक्त्या 'गुणानां सत्वरजस्तम: परिणामरूपाणां शब्दादीनां वृद्धिह्रासमध्यमावस्था: शब्दैकगोचना: लिङ्गत्वेन परिगृह्यन्ते । लिङ्गस्य स्वरूपं किमपि नास्ति । व्यवहारे काल्पनिकता एतस्य विशेष: । पाणिनीयव्याकरणे प्रयोगानुसारं लिङ्गस्य भेदत्रयम् । साक्षात् सूत्रेषु पुंसि, स्त्रियाम्, नपुंसकमिति पदोपपादनपुरस्सरं पाणिन्यादय: आचार्य्या: अस्य भेदत्रयं साधितवन्त: । कस्यचिच्छब्दस्य कृते द्विलिङ्गस्य त्रिलिङ्गस्य वाऽऽधानं विचारितम् । परवर्त्तिवैयाकरणेषु लिङ्गस्य चत्वार: भेदा: विवक्षिता: वर्त्तन्ते । स्त्रिलिङ्गम्, नपुंसकलिङ्गम्, स्त्री/पुं/नपुंसकलिङ्गम् इति परिकल्पनम् । इत्थं शब्दानुशासनप्रक्रियाचिन्तनानुसारं लिङ्गस्य भेदत्रयं विवक्षितं वर्त्तते । स च भेद: पुँल्लिङ्ग-स्त्रीलिङ्ग-क्लिवलिङ्गादिभेदेन त्रिविधम् । एवं भावेन तस्य नामकरणं पुनरन्वर्थसंज्ञामादाय जातम् । एषु स्वभावान्नपुंसकलिङ्गस्य प्राधान्यम् । महाभाष्यकार: नपुंसकलिङ्गस्य लिङ्गान्तरापेक्षया प्राधान्यं विमृश्याभिहितवान् । तदुक्त्या ''प्रधाने कार्यसम्प्रत्ययाच्छेष: किञ्च प्रधानम् ? नपुंसकम् । एवं हि दृश्यते लोके अनिर्ज्ञातेऽर्थे गुणसन्देहे च नपुंसकलिङ्गं प्रयुज्यते'' । केन कारणेन इयं भेदव्यवस्था प्रकल्पिता वर्त्तत इति निर्द्धारयितुं न शक्यते । केवलं व्यवहारविज्ञानमादाय इयं व्यवस्था प्रतीतौ आगच्छतीति विवेक: ।

**स्वावलोकनप्रश्नाः**

१. किं नाम लिङ्गम् ?

२. लिङ्गशब्दस्य का व्युत्पत्तिः ?

३. लिङ्गस्य के भेदाः ?

४. पाणिनिना सूत्रेषु लिङ्गस्य के भेदाः उपपादिताः ?

५. लिङ्गेषु कस्य प्राधान्यम् ?

६. लिङ्गव्यवस्था केन नियन्त्रिता जायते ?

## ४.४. शब्दस्य लिङ्गविधानव्यवस्था

शब्दानां लिङ्गव्यवस्था यदा विचार्य्यते तदा एषा प्रतीतिः यत् सत्त्वरजस्तमसां साम्यावस्था एव प्रकृतिः प्रधानं वा । सत्त्वरजस्तमाख्यानां गुणानां साम्यावस्था एव प्रकृतिः, गुणत्रयेषु केनापि रूपेण उपचयापचयावस्थाकारणात् लिङ्गभेदस्य विवक्षा आगच्छति । शब्दस्यापि प्रकृतिव्यतिरिक्तत्वं नास्ति । गुणाख्यं कार्य्यं शब्दार्थयोरपि प्रकाश्यते । अतः अर्थे गुणगतं वैशिष्ट्यमवलोक्य प्राक्तने काले तत्त्वदर्शिनः ऋषयः शब्देऽपि विभिन्नलिङ्गव्यवस्थां सिद्धान्तयन्ति । ब्रह्मशब्दः तेनैव मार्गेण प्रह्म, ब्रह्मा, ब्रह्माणी, यदा किमपि गुणगतं वैशिष्ट्यं न भवति तदा ब्रह्मशब्दः नपुंसकलिङ्गम् प्रविलयः = तिरोभावः इति पुंस्त्वम् । न स्त्रीपुंसौ नपुंसकम् । एतदेवादाय कौण्डभट्टेन वैयाकरणभूषणे प्रोक्तम् सत्वस्तमोगुणानां साम्यावस्था नपुंसकत्वम्, आधिक्यं पुंस्त्वम्, अपचयः स्त्रीत्वम् । तत्त्वज्ञैः ऋषिभिः एवमेव विचारमादाय शब्दानां लिङ्गनिर्णयः कृतः । किन्तु परवर्त्तिनि काले अस्मिन्निर्णये बहुधा विपर्य्ययोऽपि जातः । तेनैव कारणेन वृद्धव्यवहारं शब्दसंस्कारञ्च परित्यज्य अनेकेषु प्रयोगेषु लिङ्गव्यवस्था विभिन्नेन प्रकारेण अधिगता । महाभाष्यकृताऽपि लिङ्गविपर्य्ययस्य समर्थनं विहितम् ''तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम् । एवं लिङ्गमशिष्यं लोकाश्रयत्वात् लिङ्गस्य लिङ्गनिर्णयस्य दुःसाध्यत्वसाधनम्'' । इदं लिङ्गं शब्दनिश्ठमर्थनिष्ठमिति भावेन अपराऽपि विचारणा । केचन आचार्य्याः शब्दनिष्ठवादिनः केचन अर्थनिष्ठवादिनः । महाभाष्ये अर्थनिष्ठत्वं सिद्धान्तितम् । प्रातिपदिकार्थस्य शास्त्रीयविचारवेलायां जाति-व्यक्ति-लिङ्ग-संख्या-कारकमिति पञ्चकं

प्रातिपदिकार्थ: स्वीकृतो विद्यते । तत्र लिङ्गरूपस्यार्थस्य द्योतनाय प्रत्ययव्यवस्था स्वीक्रियते । एतद्विहाय लिङ्गानुशासनव्यवस्था पाणिनौ विचारिता विद्यते । शब्द: लिङ्गद्वारा भिन्नतामादाय रूपसंघटनविधावुपतिष्ठते प्रवर्त्तते च । अयं शब्द: पुँल्लिङ्ग:, अयं शब्द: स्त्रीलिङ्ग:, अयं शब्द: क्लीवलिङ्ग इति लोकव्यवहारमादाय निश्चयपथे प्रतिष्ठते । लोकव्यवहारेण इयं व्यवस्था नियम्यत इति सिद्धान्त: ।

**स्वावलोकनप्रश्नाः**

१. शब्दे लिङ्गव्यवस्था कथं नियम्यते ?

२. सत्वगुणस्याधिक्ये शब्द: किँल्लिङ्गक: ?

३. रजोगुणस्याधिक्ये शब्द: किंल्लिङ्क: ?

४. 'लिङ्गमशिष्यं लोकाश्रयत्वात्' इति कस्य सिद्धान्त: ?

५. के प्रातिपदिकार्था: ?

६. लिङ्गविधानव्यवस्था केन नियम्यते ?

७. स्त्रीप्रत्यय: लिङ्गरूपस्यार्थस्य द्योतक: वाचको वा ?

## ४.५. प्रतिपदिकनिष्पत्तौ स्त्रीप्रत्यया:

पदं द्विविधम्, सुवन्तं तिङन्तश्च । सुवन्तपदे य: प्रकृतिभाग: स शब्द इति प्रातिपदिक इति वा नाम्ना अभिधीयते । तस्यैव प्रातिपदिकस्य निष्पत्तिविचारे पाणिनिव्याकरणे कृत्प्रक्रिया, तद्धित-प्रक्रिया, समासप्रक्रिया चेति भावेन उपायत्रयं निर्दिष्टं जायते । 'कृत्तद्धितसमासाश्च' इति सूत्रमेव तत्र कृते प्रमाणम् । इदं सूत्रं व्युत्पन्नानां प्रातिपदिकानां कृते समुपदिष्टम् । कृत्प्रक्रिया यत्र धात्वधिकारे प्रत्ययविधानम् । प्रातिपदिकाधिकारे शब्दात् प्रत्ययोत्पत्ति: तद्धितप्रक्रिया इति नाम्ना ज्ञायते । अनेकेशां पदानां यत्र एकपदीभवनं स समास: । भिन्नार्थवाचकतां प्राप्त: अनेकपदसमूह: समास: । प्रातिपदिकाधिकारेऽपि प्रातिपदिकात् स्त्रीप्रत्ययोत्पत्ति: । स्त्रीप्रत्ययान्तस्य निष्पन्नस्य शब्दस्यापि प्रातिपदिकत्वम् । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषावचनस्याश्रयणात् तत् साध्यते । इयं लिङ्गानुशासनव्यवस्थायामन्तर्भवति । पाणिनीयव्याकरणे सर्वथा उपायत्रयमवलम्बितं

विद्यते। एकं स्त्रीप्रत्ययप्रकरणम्, यत्र स्त्रियामित्यधिकारे टाप्-डाप्-चाप्-ङीप्-ङीष्-ङीन्-ऊङ्प्रत्यया: गृहीता: । एवञ्च विशिष्टप्रत्ययव्यवस्था 'णच: स्त्रियाम्' इति भावेन । पुनश्च केचन प्रत्यया: सन्ति येषां व्यवहार: तत्तल्लिङ्गे प्रवर्त्तते । यथा 'स्त्रियां क्तिन्' इत्यधिकारे प्रोक्ता: प्रत्यया: । यदस्तु ये च शब्दा: पुंसि स्त्रियां च पुन: विपरिणामयितव्या:, तेषां कृते टावादिप्रत्ययव्यवस्था समधिगम्यते अङ्गीक्रियते च ।

**स्वावलोकनप्रश्नाः**

१. प्रातिपदिकनिष्पत्तौ का प्रक्रिया उद्दिष्टा विद्यते ?

२. टावादिप्रत्ययान्तशब्दानां कया परिभाषया प्रातिपदिकत्वम् ?

३. णच्प्रत्ययान्तशब्दस्य किं लिङ्गम् ?

४. 'स्त्रियां क्तिन्' इत्यधिकारे प्रोक्ता: प्रत्यया: कस्मिन् लिङ्गे विधीयन्ते ?

५. स्त्रीप्रत्ययप्रकरणे के प्रत्यया: प्रोक्ता: भवन्ति ?

## ४.६. पाणिनीयव्याकरणे स्त्रीप्रत्ययविधानव्यवस्था

पाणिनीयव्याकरणे स्त्रीत्वविधानार्थमेकं स्वतन्त्रतया प्रकरणं निर्दिष्टं निरूपितञ्च वर्त्तते । यत्र प्रकरणे प्रातिपदिकनिष्ठस्य लिङ्गस्य द्योतने टावादिप्रत्यया: व्यवस्थाद्वारा उपजायन्ते । अतएव दीक्षितेन अजादीनाम् अकारान्तस्य वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यादित्युक्तम् । निर्दिष्टे तस्मिन् शब्दे टावादिप्रतय्ययोगेन स्त्रीत्वरूपसाधनप्रकरणस्यास्य लक्ष्यम् । संघटनविधौ विभिन्नमुपायं पुरस्कृत्य सूत्रकार: प्रकृतिनिर्द्देशं साधयति । गृहीतस्य तस्यैव प्रकृतिभूतस्य प्रातिपदिकस्य रूपसंघटने वर्णविपरिणामद्वारा संघटनं संसाध्यते । 'स्त्रियाम्' इत्यधिकारे टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति इत्येते प्रत्यया: अभिहिता: सन्ति । इमे प्रत्यया: सानुबन्धका: भवन्ति । टाप्, डाप्, चाप्, इत्यस्मात् 'आ'कार: अवशिष्यते । ङीप्, ङीष्, ङीन् इत्यस्मात् 'ई'कार: अवशिष्यते । ऊङ् इत्यस्मात् 'ऊ'कार: अवशिष्यते । सिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे रूपसाधने संघटने च गणपाठादिव्यवस्थामादाय २५३ संख्याका: शब्दा: स्त्रीप्रत्ययान्ता: सम्पन्ना: भवन्ति । तथाहि

| | | |
|---|---|---|
| १. | टाप् | १६० |
| २. | ड़ाप् | ०४ |
| ३. | चाप् | ०४ |

४. ङीप् ५९
५. ङीष् २४१
६. ङीन् २०
७. ऊङ् १४
८. ति ०१
२५३ रूपाणि

**स्वावलोकनप्रश्नाः**

१. सिद्धान्तकौमुद्यां स्त्रीप्रत्ययविधानार्थमुद्दिष्टस्य प्रकरणस्य नाम किम् ?

२. ङीप्-ङीष्-ङीन् इति प्रत्ययात् किमवशिष्यते ?

३. स्त्रीप्रत्ययप्रकरणेन निष्पन्नानां शब्दानां संख्या कति ?

४. कस्मिन् अधिकारे टावादिप्रत्यया: विधीयन्ते ?

## ४.७. स्त्रीप्रत्ययविधानोद्दिष्टानि पाणिनीयसूत्राणि वार्त्तिकवचनानि च

सूत्रात्मके पाणिनीयव्याकरणे स्त्रीप्रत्ययान्तशब्दानामनुशासनविधौ ७९ सूत्राणि ५० वार्त्तिकवचनानि निर्द्दिष्टानि सन्ति । तानि सर्वाणि सूत्राणि अष्टाध्याय्या: चतुर्थाध्यायस्य प्रथमपादे प्रवृत्तानि विद्यन्ते । तत्रापि वार्त्तिकवचनानामुपकल्पनम् । तथा हि

**सूत्राणि**

१. स्त्रियाम् ४/१/३
२. अजाद्यतष्टाप् ४/१/४ टाप्
३. ऋन्नेभ्यो ङीप् ४/१/५ ङीप्
४. अगतिश्च ४/१/६ ङीप्
५. वनोरच ४/१/७ ङीप्
६. पादोन्यतरस्याम् ४/१/८ ङीप्
७. टावृचि ४/१/९ टाप्
८. नषट्स्वस्रादिभ्य: ४/१/१०
स्त्रीप्रत्ययनिषेध टाप् ङीप्
९. मन: ४/१/११ ङीप् निषेध:
१०. अनो बहुब्रीहे ४/१/१२ ङीप् निषेध:
११. डावुभाभ्यामन्यतरस्याम् ४/१/१३ ङीप्

१२. अनुपसर्जनात् ४/१/१४

१३. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठ-
कठञ्कञ्क्वरप: ४/१/१५ ङीप्

१४. यञश्च ४/१/१६ ङीप्

१५. प्राचां एफ तद्धित: ४/१/१७ ष्फ

१६. सर्वत्र लोहितादिकतन्तेभ्य:
४/१/१८ ष्फ

१७. कौरमाण्डुकाभ्यां च ४/१/१९ ष्फ

१८. वयसि प्रथमे ४/१/२० ङीप्

१९. द्विगो: ४/१/२१ ङीप्

२०. अपरिमाणविस्ताचित कम्वल्येभ्यो
न तद्धित लुकि ४/१/२२
ङीप् न भवति

२१. काण्डान्तात्क्षेत्रे ४/१/२३
ङीप् निषेध:

२२. पुरुणात्प्रमाणेऽन्यतरस्याम्
४/१/२४ ङीप् निषेध:

२३. बहुब्रीहेरुधसो ङीप् ४/१/२५ ङीप्

२४. संख्याव्ययादे ङीप् ४/१/२६ ङीप्

२५. दामहायनान्ताच्च ४/१/२७ ङीप्

२६. अन उपधालोपिनोऽन्यतरस्याम्
४/१/२८ ङीप्

२७. नित्यं संज्ञाच्छन्दसी ४/१/२९ ङीप्

२८. केवलमामक भागधेयपापारसमानार्थ-
कृतसुमङ्गभेषजाच्च ४/१/१३ ङीप्

२९. रात्रेश्चाजसौ ४/१/३१ ङीप्

३०. अन्तर्वत्पतिवतोर्नुक् ४/१/३२ ङीप्

३१. पत्युर्नो यज्ञसंयोगे ४/१/३३ ङीप्

३२. विभाषा सपूर्वस्य ४/१/३४ ङीप्

३३. नित्य सपत्न्यादिषु ४/१/३५ ङीप्

३४. पूतक्रतोरै च ४/१/३६ ङीप्

३५. वृषाकप्यग्निकुसितकुसिदानामुदात्तः
४/१/३७ ङीप्

३६. मनोरौ वा ४/१/३८ ङीप्

३७. वर्णानुदात्तात्तोपधातो नः
४/१/३९ ङीप्

३८. अन्यतो ङीष् ४/१/४० ङीष्

३९. षिद् गौरादिभ्यश्च ४/१/४१ ङीष्

४०. जानपदकुण्डगोणस्थलभाजनागकाल- नीलकुशकामुककबरादृत्यमत्रावपना-
कृत्रिमाश्राणास्थाल्यवर्णनाच्छादनायो विकार मैथुनेच्छाकेशवेशेषु
४/१/४२ ङीष्

४१. शोणात्प्राचाम् ४/१/४३ ङीष्

४२. वोतो गुणवचनात् ४/१/४४ ङीष्

४३. वह्वादिभ्यश्च ४/१/४५ ङीष्

४४. नित्यं छन्दसि ४/१/४६ ङीष्

४५. भुवश्च ४/१/४७ ङीष्

४६. पुंयोगदाख्यायाम् ४/१/४८ ङीष्

४७. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययव-
यवनमातुलाचार्याणामानुक् -
४/१/४९ ङीष्

४८. क्रीतात्करणपूर्वात् ४/१/५० ङीष्

४९. क्तादल्पाख्यायाम् ४/१/५१ ङीष्

५०. बहुब्रीहेश्चान्तोदात्तात् ४/१/५२ ङीष्

५१. अस्वाङ्गपूर्वपदाद्वा ४/१/५३ ङीष्

५२. स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्
४/१/५४ ङीष्

५३. नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाश्च
४/१/५५ ङीष्

५४. न क्रोडादिबह्वचः ४/१/५६
ङीष् निषेधः

५५. सहनं ञ्विद्यमानपूर्वाच्च ४/१/५७
ङीष् निषेधः
५६. नखमुखात्संज्ञायाम् ४/१/५८
ङीष् निषेधः
५७. दीर्घजीह्वो च च्छन्दसि ४/१/५९
ङीष् प्रत्यये न निपातनसिद्धः
५८. दिक् पूर्वपदान्ङीप् ४/१/६० ङीष्
५९. वाहः ४/१/६१ ङीष्
६०. सख्यशिखीति भाषायाम् ४/१/६२
ङीष् प्रत्यये निपातनसिद्ध
६१. जातेरस्त्रीविषयादयोपधात्
४/१/६३ ङीष्
६२. पाककर्णपर्णपुष्पफलमूलवालोत्तर–
पदाच्च ४/१/६४ ङीष्
६३. इतो मनुष्यजातेः ४/१/६५ ऊङ्
६४. ऊङुतः ४/१/६६ ऊङ्
६५. वाहवन्तात्संज्ञायाम् ४/१/६७ ऊङ्
६६. पङ्गोश्च ४/१/६८ ऊङ्
६७. ऊरुत्तरपदादौपम्ये ४/१६९ ऊङ्
६८. संहितशफलक्षणवामोदाश्च
४/१/७० ऊङ्
६९. कदुकमण्डलूवोश्छन्दसि
४/१/७१ ऊङ्
७०. संज्ञायाम् ४/१/७२ ऊङ्
७१. शार्ङ्गखाद्यञो ङीन् ४/१/७३ ङीन्
७२. यङश्चाप् ४/१/७४ चाप
७३. आवटयाच्च ४/१/७५ चाप
७४. तद्धिताः ४/१/७६
७५. युनस्तिः ४/१/७७ ति
७६. अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्गोत्रे
४/१/७८ ष्यङ
७८. क्रौडयादिभ्यश्च ४/१/८० ष्यङ्
७९. दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डे–
सिद्धिभ्योऽन्यतरस्याम् ४/१/८१ ष्यङ्

७७. गोत्रावयवात्   ४/१/७९   ष्यङ्

**वार्त्तिकवचनानि**

वार्त्तिकानामनुशीलनेन प्रतिभाति यत् वार्त्तिककार स्वाशयदृष्ट्या उद्देश्यं साधयितुं अनेकविधं पदं वार्त्तिकेषु विनियुक्तवान् । 'उपसंख्यानम्','वाच्यम्'/'वाच्यः', ' वक्तव्यम्'/'वक्तव्यः', 'कर्त्तव्यम्', 'प्रतिषेध' न इति पदेन वा इति पदेन नित्यम् इति पदेन । यत्र उपसंख्यानम् इति पदं उपस्थापितं तत्र सूत्रकारेण अनभिलषितस्य पदस्य साधुत्वं वार्त्तिककृता स्वचिन्तनेन अभिलष्यते प्रारभ्यते च ।एवं च यत्र वाच्यम् वक्तव्यम् इत्यादि पदानां संयोजनं कृतं तत्र आक्षेपः विहितः ।अक्षेप प्रायशः त्रिविधः दृश्यते

१. सूत्रोपरि आक्षेपः

२. सूत्रोपात्तपदोपरि आक्षेपः

३. सिद्धपदोपरि आक्षेपः

अष्टाध्यायां प्रकृतप्रकरणे स्त्रीत्वरूपसाधनदिशा वार्त्तिकवचनानि उपलब्धानि दृश्यन्ते ।

**अजाद्यतष्टाप्** ४/१/३ — १. शूद्राचामहत्पूर्वा जातिः   टाप्

**वनोरच** (४/१/७) — २. वनो न हश इति वक्तव्यम्   ङीप्

३. बहुब्रीहौ वा   ङीप्

**टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयफकठञ्कञ् कवरपः** (४/१/१५)

४. नञ्स्नञीककख्युंस्तरुण तुलनानामुपसंख्यानम्   ङीप्

**यञश्च** (४/१/१६) — ५. अनपत्याधिकारस्थान्न ङीप्

**प्राचां ष्फ तद्धितः** (४/१/१७) ६. आसुरेरूपसंख्यानम्   ष्फ

**वयसि प्रथमे** (४/१/२०) — ७. वयस्यचरम इति वाच्यम्   ङीप्

**दामहायनान्ताच्च** (४/१/२७)

८. वयोवाचकस्यैव हायनशब्दस्य ङीप् णत्वं चेष्यते   ङीप्

९. त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्   ङी

**वर्णादनुदात्तात्तोपधत्ततो न (४/१/३९)**

१०. असति पलितयोर्न   ङीप्

११. छन्दसि कनमेके   ङीप्

१२. पिशङ्गादुपसंख्यानम्   ङीप्

**जानपद कुण्डगोगस्थल भाजनागकालतोलकुशकामुक कवरां दृत्यमत्राव पनाकृत्रिमाश्राणा स्थौल्य वर्णनाच्छादनायो विकारमैथुने च्छाकेशवेशेषु**(४/१/४२)

१३. नीलादोषधौ प्राणिनि च   ङीष्

१४. संज्ञायां वा   ङीष्

**वोतो गुण वचनात्** (४/१/४४)

१५. स्वरूपसंयोगेपधान्न ङीष्

**पुंयोगादाख्यायाम्** (४/१/४८) १६. पालकान्तान्न ङीष्

१७. सूर्याद्देवतायां चाप् ङीष्

**इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्** (४/१/४९)

१८. हिमारण्ययोर्महत्त्वे ङीष्

१९. यावाद्दोषे ङीष्

२०. यवनाल्लिप्याम् ङीष्

२१. मातुलोपाध्याययौरानुग्वा ङीष्

२२. मुद्रलाच्छन्दसि लिच्च ङीष्

२३. आचार्यादणत्वं च ङीष्

२४. अर्यक्षत्रियाभ्यां वा ङीष्

**बहुब्रीहे श्चान्तोदात्तात्** (४/१/५२)

२५. जातान्तान्न ङीष्

२६. पाणिगृहीतो भार्यायाम् ङीष्

२७. जातिपूर्वादिति वक्तव्यम् ङीष्

**नासिकोदरौष्ठजङ्गादन्तकर्णशृङ्गाच्च** (४/१/५५)

२८. पृच्छाच्च ङीष्

२९. कवरमणि विषशरेभ्यो नित्यम् ङीष्

३०. उपमानात्पक्षाच्च पृच्छाच्च ङीष्

**जातेरस्त्रीविषयादयोपधात्** (४/१/६३)

३१. योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानाम् प्रतिषेधः ङीष्

३२. मत्स्यस्य ङ्याम् ङीष्

**उङुतः** (४/१/६६) ३३. अप्राणिजातेश्चारज्डवादीनामुपसंख्यानम् ऊङ्

**पङ्गोश्च** (४/१/६८) ३४. श्वशुरस्योकाराकार लोपश्च ऊङ्

**संहितशफलक्षणवामादेश्च** (४/१/७०)

३५. सहितसहाभ्यां चेति वक्तव्यम् ऊङ्

**यङश्चाप्** (४/१/७४) ३६. षाद्यञश्चाप् वक्तव्यः चाप्

| | |
|---|---|
| उपसंख्यानं पदेन | ५ वार्त्तिकानि |
| वक्तव्यं पदेन | ७ वार्त्तिकानि |

| | |
|---|---|
| वाच्यं पदेन | २ वार्त्तिकानि |
| प्रतिषेधपदेन | ३ वार्त्तिकानि |

सूत्रवत् वार्त्तिकवचनानि उपनिबद्धानि वर्त्तन्ते । येषामुपयोगेन स्त्रीत्वसाधनं त्रिमुनिव्याकरणे जातं विद्यते ।

**स्वावलोकनप्रश्नाः**

१. स्त्रीप्रत्ययान्तशब्दानुशनविधौ कति सूत्राणि सन्ति ?

२. स्त्रीप्रत्ययान्तशब्दानुशासनविधौ कति वार्त्तिकानि सन्ति ?

३. 'स्त्रियाम्' इति सूत्रेण किं विधीयते ?

४. 'वाच्यम्' 'वक्तव्यम्' इति पदेन वार्त्तिककृतां किं कार्य्यं बोध्यते ?

५. 'उपसंख्यानम्' इति पदेन स्त्रीप्रत्ययप्रकरणे कति वार्त्तिकानि सन्ति ?

## ४.८. स्त्रीप्रत्ययोद्दिष्टसूत्राणां सञ्चरणोपायः

टावादिस्त्रीप्रत्ययविधानार्थं सूत्रकृता सूत्रेषु इमे उपाया: अवलम्बिता:

**१. अधिकारसंयोजनम्**

स्त्रीप्रकरणे अधिकारसूत्रचतुष्टयं प्रवर्त्तते । शब्दाधिकारतया सूत्रद्वयं 'ङ्याप्प्रातिपदिकात्' 'तद्धिता:' इति अर्थाधिकारतया 'स्त्रियाम्', 'अनुपसर्जनात्' । शब्दाधिकारे प्रातिपदिकव्यवस्था या प्रकृति इत्यभिधीयते तद्बोधनम् । अर्थाधिकारे स्त्रीत्वरूपस्यार्थस्य द्योतनम्, अनुपसर्जनात् प्रातिपदिकात् इति द्योतनम् ।

**२. अनुवृत्तिनिर्देश:** अदृष्टस्य पदस्य संस्थापनाय अनुवृत्ति: स्वीक्रियते ।

**३. चादिनिपातानां निर्देश:**

**४. आदिशब्दनिर्देश:**

**५. विभक्तिविपरिणामव्यवस्था** वनोरच (४/१/७) इत्यत्र विभक्ते: पञ्चमीविभक्तित्वेन विपरिणाम: ।

**६. लुप्तविभक्तिनिर्देश:** वनोरच (४/१/७) र – इति लुप्तप्रथमान्तनिर्देश: ।

**७. प्राक्पाणिनीयानामाचार्य्याणां नामनिर्देश:** प्राचां स्फतद्धित: (४/१/१७)
शोणात् प्राचाम् (४/१/४३)

**८. बहुवचननिर्देश:** षिद्गौरादिभ्यश्च (४/१/४१), नित्यं सपत्न्यादिषु (४/१/३५)

**९. प्रत्ययसन्धाने विभक्तिनिर्देश:** सर्वत्र प्रथमाविभक्तिद्वारा निर्देश: ।

**स्वावलोकनप्रश्नाः**

१. स्त्रीप्रत्ययप्रकरणे कति अधिकारसूत्राणि सन्ति ?

२. 'अनुपसर्जनात्' इति शब्दाधिकार: अर्थाधिकारो वा ?

३. 'वनो र च' इत्यत्र किं लुप्तविभक्त्यन्तं पदम् ?

४. स्त्रीप्रत्ययविधानाय प्रकृतिसन्धाने का विभक्ति: निर्दिश्यते ?

५. स्त्रीप्रत्ययप्रकरणे सूत्रार्थबोधने सूत्रसञ्चरणे च कति उपाया: अवलम्बिता: ?

## ४.९. सूत्रेषु गृहीता: प्रकृतय:

स्त्रीत्वरूपसाधनार्थमनेकविधव्यवस्था व्युत्पन्ना विद्यते । प्रातिपदिकस्य प्रातिपदिकान्तरकल्पनया स्त्रीत्वसाधनं प्रातिपदिकात् प्रत्ययोत्पत्तिविचारपुरस्सरं प्रातिपदिकनिष्पत्तिः । केचन शब्दात् स्त्रीलिङ्गे व्यवहृता: न भवन्ति । केचन अभाषितपुंस्का केचन भाषितपुंस्का इत्यादिना विचार: प्रवर्तते । स्त्रीप्रत्ययप्रकरणे प्रकृति: प्रातिपदिकात् टाप्, डाप्, इत्यादिप्रत्ययोत्पत्तिपुरस्सरं स्त्रीत्वसाधनम् । तत्कृते अनेकविधम् उपपादनं सूत्रशैल्या बोधनीयं जायते । आकलनेन द्वादश(१२)संख्यका: उपाया: पाणिनिना उपपादिता: विद्यन्ते । तत् च वैचित्र्यं सूत्रकृतां सूत्रसंघटनान्नातिरिच्यते । ते च उपाया:, तत्र प्रत्येकमेकैकमुदाहरणम्

१. साक्षात् प्रातिपदिकोपपादनपुरस्सरं गृहीता: प्रकृतय: ।
 उदा. कौरव्यमाण्डूकाभ्यां च (पा.सू.४/१/१९) ।
२. गणनिर्देशपुरस्सरं गृहीता: प्रकृतय: । उदा. अजाद्यतष्टाप् (पा.सू. ४/१/४)
३. प्रत्ययेन प्रत्ययान्तशब्दनिर्देशपुरस्सरं गृहीता: प्रकृतय: । उदा. यङश्चाप् (पा.सू. ४/१/७४)
४. वर्णग्रहणेन प्रकृतिनिर्देश: । उदा. ऋन्नेभ्यो ङीप् (पा.सू. ४/१/५)
५. अनुबन्धनिर्देशपुरस्सरं प्रकृतिनिर्देश: । उदा. उगितश्च (पा.सू. ४/१/६)
६. समासानामग्रहणपुरस्सरं प्रकृतिनिर्देश: । उदा. द्विगो: (पा.सू. ४/१/२१)
७. अङ्गवाचकशब्दग्रहणपुरस्सरं प्रकृतिनिर्देश: । उदा. अस्वाङ्गपूर्वपदाद्वा (पा.सू. ४/१/५३)
८. उपधानिर्देशपुरस्सरं प्रकृतिनिर्देश: । उदा. वर्णादनुदात्तात्तोपधात्तो न: (पा.सू. ४/१/३९)
९. जातिवाचिशब्दनिर्देश: । उदा. जातेरस्त्रीविषयादयोपधात् (पा.सू. )
१०. अर्थनिर्देशपुरस्सरं प्रकृतिनिर्देश: । उदा. जानपद ...केशवेशेषु (पा.सू. ४/१/४१)
११. तदन्तविधि: । उदा. डाबुभ्यामन्यतरस्याम् (पा.सू. ४/१/१३)

१२. निपातनसिद्धिव्यवस्था । उदा. दीर्घजिह्वी च च्छन्दसि (पा.सू. ४/१/५९)

**स्वावलोकनप्रश्नाः**

१. स्त्रीप्रत्ययविधानाय सूत्रेषु कति उपायाः पाणिनिना गृहीताः ?

२. 'ऋन्नेभ्यः ङीप्' इति सूत्रे किम्भूतः प्रकृतिनिर्देशो विहितः ?

३. 'डावुभ्यामन्यतरस्याम्' इति सूत्रे किम्भूतः प्रकृतिनिर्देशो विहितः ?

४. 'समासनामग्रहणपुरस्सरं प्रकृतिनिर्देशः' सूत्रमेकमुदाहरत ?

५. 'अनुबन्धनिर्देशपुरस्सरं प्रकृतिनिर्देशः इत्यब सूत्रमेकमुदाहरत ?

## ४.१०. सूत्रेषु गृहीताः प्रत्ययाः

प्रातिपदिकनिष्पत्तिप्रकारेषु स्त्रीप्रत्ययसंघटनमन्यतमम् । केषाञ्चिच्छब्दानां लिङ्गविचार–दृष्ट्या तस्मादेव शब्दात् प्रत्ययसन्नियोगेन लिङ्गव्यवस्था उपस्थाप्यते । लिङ्गरूपार्थः यद्यपि प्रातिपदिकनिष्ठस्तथापि प्रत्ययद्वारा तस्य द्योतनं जायते । ते च प्रत्ययाः टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति इति भावेन अष्टौ निर्द्धारिताः सन्ति । इमे 'स्त्रियाम्' (पा.सू. ४/१/३) इत्यधिकारे विहिताः । इमे प्रत्ययविभागेषु न विभक्तयः न धात्वंशाः, नापि कृतः, नापि तद्धिताः । किन्तु 'प्रत्ययः' इत्यधिकारे विहितत्वात् ते प्रत्ययाः । तत्र 'ति' इति प्रत्ययं विहाय सर्वे सानुबन्धकाः प्रत्ययाः । इत्सञ्ज्ञालोपाभ्यामपहारादनन्तरमवशिष्टो यो वर्णः स वस्तुगत्या प्रत्ययस्य वर्णः स्वरूपं वा । तथाहि

| | | |
|---|---|---|
| १. | टाप् | ट् + आ + प् |
| | | ट् + आ + प् = आ |
| | डाप् | ड् + आ + प् |
| | | ड् + आ + प् = आ |
| | चाप् | च + आ + प् = आ |
| २. | ङीप् | ङ् + ई + प् |
| | | ङ् + ई + प् = ई |
| | ङीष् | ङ् + ई + ष् |

ङ् + ई + ष् = ई

ङीन् ङ् + ई + न्

ङ् + ई + न् = ई

३. ऊङ् ऊ + ङ्

ऊ + ङ् = ऊ

प्रत्ययाद्यावयवानां ट् ङ् च् इत्येतेषां वर्णानामित्संज्ञा 'चुटू' (पा.सू. १/३/७) इति सूत्रेण तथैव 'ङ'कारस्य 'लशक्वतद्धिते' (पा.सू. १/३/८) इति सूत्रेण, प्, ष्, न्, ङ्, इत्येतेषां प्रत्ययानामन्त्ये विद्यमानानां वर्णानां 'हलन्त्यम्' (पा.सू. १/३/३) इति सूत्रेण च इत्सज्ञा ततश्च 'तस्य लोप:' इति सूत्रेण तेषां लोप: । इत्संज्ञावत्वमनुबन्धत्वमिति व्यवहारात् ते अनुबन्धवर्णा: भवन्ति । प्रत्येकमनुबन्धवर्णस्य प्रक्रियात्मककार्य्ये शास्त्रीयं फलं विद्यते ।

**'ङ'कारानुबन्ध:**

'ऊङस', 'ङीप्', 'ङीष्', 'ङीन्' इत्येतेषु चतुर्षु प्रत्ययेषु ङकारानुबन्ध: निर्दिष्टो विद्यते। 'ऊङ्' इत्यत्र ङकारानुबन्ध: 'नोङ् धातो:' (पा.सू. ६/१/१७५) इत्यत्र विशेषणार्थ: ङीप्, ङीष्, ङीन् इत्यत्र ङकारानुबन्धानां तु 'ङ्याप्प्रातिपदिकात्' (पा.सू. ४/१/१) इत्यादौ सामान्यग्रहणसम्पादनमेव प्रयोजनं विद्यते । तेन वैदी (वेद + ङीन्), कुमारी (कुमार + ङीप्) इत्यादौ ङमन्तत्वात् स्वाद्युत्पत्ति: ।

**च्कारानुबन्ध:**

चाप् इति प्रत्यये 'च'कारानुबन्ध: । तत्र प्रयोजनद्वयम् । चित: (पा.सू. ६/१/१६३) इति सूत्रेणान्तोदात्तस्वरविधानम् । टाप्डाप्प्रत्ययापेक्षया भिन्नत्वसाधनम् ।

**ट्कारानुबन्ध:**

टाप् इत्यत्र 'ट'कारानुबन्ध: । 'ट'कारानुबन्धस्य सामान्यग्रहणाविघात एव प्रयोजनम् । 'डाप्–चाप्' इत्यपेक्षया पृथक्ताप्रतिपादनम् ।

**डकारानुबन्ध**

डाप् इत्येक एव प्रत्यय: यत्र डकारानुबन्ध: । तस्य फलद्वयम् सामान्यग्रहणाविघात: टिलोपश्च । बहुराजा (बहुराजन् + डाप्) डित्वात् अभस्य 'अन' इत्यस्य लोप: ।

**'न'कारानुबन्ध:**

'ङीन्' इत्यत्र 'न'कारानुबन्ध: । आद्युदात्वस्वरसिद्धिरेव तस्य प्रयोजनम् । 'ञ्नित्यादिर्नित्यम्' (पा.सू. ५/१/१९७) इति सूत्रेण आद्युदात्तस्वर: ।

**'प'कारानुबन्ध:**

ङीप्–चाप्–टाप्–डाप् इत्येते चत्वार: पकारानुबन्धा: । तेन प्रयोजनत्रयम् । 'अनुदात्तो सुप्पितौ' इति सूत्रेणानुदात्तस्वर: । 'ङ्याप्प्रातिपदिकात्' इति सूत्रोक्त–आप्पदेन पित्वानुबन्धकारणात् टाप्, डाप्, चाप् इति त्रयाणां ग्रहणं यथा स्यात् । एवञ्च 'ङ्याप्प्रातिपदिकात्' इत्यत्र ङीष् ङीन् इति

ग्रहणार्थः ।

**'ष'कारानुबन्धः**

डीष् इत्यत्र 'ष'कारानुबन्धः । षित्वात् प्रयोजनद्वयम् सामान्यग्रहणाविघातार्थः । आद्युदात्तश्च (पा.सू. ३/१/३) इति आद्युदात्तस्वरविधानार्थः ।

इत्थं प्रत्ययेषु अनुबन्धवर्णानां फलं प्रयोजनीयं विद्यते ।

**स्वावलोकनप्रश्नाः**

१. स्त्रीप्रत्ययेषु के अनुबन्धवर्णा सन्ति ?

२. 'ट', 'ड', 'च' इत्यनुबन्धवर्णानां केन सूत्रेण इत्सञ्ज्ञा ?

३. 'ङीप्', 'ङीष्', 'ङीन्' इत्यत्र ङकारस्य इत्संज्ञाविधायकं सूत्रं किम् ?

४. 'च'कारानुबन्धस्य प्रयोजनं किम् ?

५. डकारानुबन्धस्य प्रयोजनं किम् ?

६. 'न'कारानुबन्धस्य प्रयोजनं किम् ?

७. 'प'कारानुबन्धस्य प्रयोजनं किम् ?

८. 'ष'कारानुबन्धसाधनात् कः स्वरः साधनीयः दृश्यते ?

## ४.११. प्रकृतिभागे आगमादेशादिकार्य्यम्

प्रातिपदिकनिष्पत्तये पदनिष्पत्तये च प्रक्रियान्तरकार्यवत् आगमविधानम् अन्यतमम् उपपादनम् उपस्थापनं च । तदर्थं टित् कित् मित् इति विचारपुरस्सरं सूत्रानुसारं आगमिन आदौ अन्ते च विधानमिष्यते । स्त्रीप्रत्ययप्रकरणेऽस्मिन् नुक् आगम आनुक् आगमश्च इति आगमद्वयं किदुबन्धविशिष्टं विचार्यते ।

१. अन्तर्वत्पतिवतोर्नुक् ४/१/३२ ङीष् प्रत्ययः । उदा. अन्तर्वत्नी, पतिवत्नी ।

२. इन्द्रवरुण भवसर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ४/१/४९
ङीष् प्रत्ययः । उदा. इन्द्राणी, भवानी, शर्वाणी ।

## आदेशव्यवस्था

प्रक्रियासाधने सर्वेषु प्रकरणेषु आदेशव्यवस्था पदसाधुत्वसम्पादनाय प्रवर्त्तते। स च आदेश प्रकृतिभागे प्रत्ययभागे च उपतिष्ठते । स च आदेश अनेकविध: । सम्पूर्णस्य स्थाने अन्त्यवर्णस्य स्थाने एकदेशस्य स्थाने प्रवर्तते इति सूत्रानुसारं व्यवस्था पाणिनौ अभिलक्ष्यते । स्त्रीप्रत्ययप्रकरणे प्रकृतिभागे एव आदेशव्यवस्था उपपद्यते । वर्णस्य स्थाने स च आदेश षड्भि: सूत्रै: सम्पद्यते । तथाहि

१. पत्युर्नो यज्ञसंयोगे ४/१/३३ ङीष् प्रत्यय: । उदा. पत्नी ।

२. विभाषा स पूर्वस्य ४/१/३४ ङीप् प्रत्यय: । उदा. वृद्धपत्नी, वृद्धपति: ।

३. नित्यं सपत्न्यादिषु ४/१/३५ ङीप् प्रत्यय: । उदा. सपत्नी, एकपत्नी ।

४. पूतक्रतोरै च ४/१/३६ ङीप् प्रत्यय: । उदा. पूतक्रतायी ।

५. वृषाकप्यग्नि कुसितकुसिदानामुदात्त: ४/१/३७ ङीप् प्रत्यय: ।
उदाहरणम् वृषाकपायी, अग्नायी ।

६. मनोरौ वा ४/१/३८ ङीप् प्रत्यय: । उदा. मानवी, मनायी ।

**स्वावलोकनप्रश्नाः**

१. स्त्रीप्रत्ययप्रकरणे विधीयमानमागमद्वयं किम् ?

२. स्त्रीप्रत्ययप्रकरणे कति सूत्रै: आदेशव्यवस्था नियम्यते ?

## ४.१२. निपातनसिद्धिव्यवस्थाकल्पनम्

निपातनविद्धिव्यवस्था एकमन्यतमम् उपपादनम् । यत्र प्रकृतिप्रत्ययस्य निर्देश कर्त्तव्यो न जायेत तत्र निपातनसिद्धिव्यवस्था अवधार्यते । प्रकृतिनिपातनम्, प्रत्ययनिपातनम्, आदेशनिपातनम्, आगमनिपातनम्, सिद्धनिपातनञ्चेत्यादिभावेन व्यवस्था अवधार्यते । प्रकृत सूत्रद्वयेन निपातनसिद्धिव्यवस्था अवधार्यते । यत्र सिद्धपदं निपात्यते।

१. दीर्घजिह्वी च च्छन्दसि ४/१/५९ ङीष् प्रत्यय: । उदा. दीर्घजिह्वो ।

२. सख्यशिक्श्वीति भाषायाम् ४/१/६२ ङीष् प्रत्यय: । उदा. ब्राह्मणी ।

**स्वावलोकनप्रश्नाः**

१. का नाम निपातनसिद्धव्यवस्था ?

२. स्त्रीप्रत्यये निपातनसिद्धव्यवस्थाविधानाय कति सूत्राणि ?

## ४.१३. सारांश:

प्रियपाठका: ! अस्मिन् खण्डे स्त्रीप्रत्ययानां तथा लिङ्गविधानव्यवस्थाया: विषये पर्य्यालोचनं विहितम् । लिङ्गस्य परिभाषा, शब्दस्य तस्य व्युत्पतिगतरहस्यम्, लाक्षणिकं निर्वचनं कृतम् । लिङ्गं सङ्केतविशेष:, सत्वरजस्तमोगुणानां चयापचयकारणात् तेषां निरूपणविधि: प्रदर्शित: । तच्च लिङ्गं शब्दनिश्टमर्थनिष्टमिति भावेन शास्त्रीयाभिमतम्, भाष्यकारस्य अर्थनिष्ठत्वविषये सिद्धान्त: प्रदर्शित: । जाति-व्यक्ति-लिङ्ग-संख्या-कारकविवेचनात् प्रातिपदिकार्थ: । तत्र लिङ्गरूपस्यार्थस्य द्योतनाय टा-डाप्-चाप्-ङीप्-ङीष्-ङीन्-ऊङ् प्रत्ययानां विधानव्यवस्था उपपादिता । एतदर्थं पाणिनौ ७९ सूत्राणि ५० वार्त्तिकवचनानि उपनिवद्धानि । प्रकृतिग्रहणव्यवस्थायां पाणिनीयं कौशलम्, यत्र गणपाठादिव्यवस्था प्रदर्शिता। सूत्रसञ्चरणे ये पाणिनीयविधय: अनुवृत्त्याधिकाराद्याश्रयणं तस्य उपपादनं जातम् । पुनश्च टावादिप्रत्ययेषु ये अनुबन्धवर्णा: विद्यन्ते तेषां प्रक्रियात्मककार्य्यदिशा प्रयोजनम् एवञ्च प्रकृतिभागे आगमादेशव्यवस्थासाधनं प्रदर्शितम् । कौमुद्यां सूत्रोक्तोदाहरणद्वारा २५३ संख्याका: प्रयोगा: अवधेया: जायन्ते । ये च शब्दा: पुंसि स्त्रियाञ्च पुन: विपरिणामयितव्या, तेषां कृते टावादिप्रत्ययव्यवस्था समधिगम्यते।

## ४.१४. आदर्शप्रश्ना:

I. **निबन्धात्मकप्रश्ना: (प्रत्येकं १५/२० अङ्का:)**

१. लिङ्गस्य लिङ्गविधानव्यवस्थायाश्च कृते उपायान् प्रतिपादयत ?

२. स्त्रीप्रत्ययप्रकरणे सूत्रोक्तप्रत्ययव्यवस्थामुपस्थापयत ?

३. स्त्रीप्रत्ययप्रकरणे सूत्रोक्तप्रकृतिनिर्द्देशव्यवस्थां विवृणत ?

II. **विश्लेषणात्मकप्रश्ना: (प्रत्येकं १२/१० अङ्का:)**

१. कौमुद्या: स्त्रीप्रत्ययप्रकरणम् एकं विश्लेषणं विधेयम् ?

२. स्त्रीप्रत्ययेषु अनुबन्धकारणस्य प्रयोजनं प्रतिपादितम् ?

३. स्त्रीप्रत्ययप्रकरणे आगमादेशव्यवस्थां प्रतिपादयत ?

III. **लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)**

१. लिङ्गम् इत्यस्य व्युत्पत्तिं लक्षणञ्च लिखत ?

२. स्त्रीप्रत्ययान् उपस्थापयत ?

३. स्त्रीप्रत्ययप्रकरणे अधिकारसूत्राणि उपपादयत ?

IV. **एकङ्कप्रश्ना: (प्रत्येकं १ अङ्क:)**

१. पाणिनिना सूत्रेषु लिङ्गस्य के भेदा: प्रदर्शिता: ?

२. लिङ्गं कतिविधम् ?

३. सत्वगुणस्याधिक्ये शब्द: किँल्लिङ्गक: ?

४. स्त्रीप्रतयय: लिङ्गरूपस्यार्थस्य द्योतक: वाचको वा ?
५. णच्प्रत्ययान्तशब्दस्य किं लिङ्गम् ?
६. 'स्त्रिया' 'क्तिन्' इत्यधिकारे प्रोक्ता: प्रत्यया: कस्मिन् लिङ्गे विधीयन्ते ?
७. ङीप्-ङीष्-ङीन्- इति प्रत्ययात् किमवशिष्यते ?
८. स्त्रीप्रत्ययप्रकरणे कति सूत्राणि सन्ति ?
९. 'वनो रच' इति सूत्रे किं लुप्तविभक्त्यन्तं पदम् ?
१०. ऋन्नेभ्यो ङीप्' इति सूत्रे किम्भूत: प्रकृतिनिर्देश: ?
११. ट्, ड्, च् इत्यनुबन्धवर्णानां केन सूत्रेण इत्सज्ञा:
१२. 'न'कारानुबन्धस्य किं प्रयोजनम् ?
१३. स्त्रीप्रत्ययप्रकरणे विधीयमानमागमद्वयं किम् ?
१४. निपातनसिद्धव्यवस्थाया: कृते कति सूत्राणि सन्ति ?
१५. 'च'कारानुबन्धस्य किं फलम् ?

## ४.१३. एकाङ्कप्रश्नानामुत्तराणि

१. चत्वार: (पुं, स्त्री, नपुं, पुं/नपुं) २. त्रिविधम् ३. पुं. ४. द्योतक: ५. स्त्री ६. स्त्री ७. ई ८. ७९ ९. २ १०. वर्ण ११. चुटू १२. ङीप् १३. नुक्, आनुक् १४. द्वयम् १५. अन्तोदात्तस्वर ।

********

## ।। पञ्चमखण्डः ।।

## टाप्-ड़प्-चाप्-ऊङ्-ति-प्रत्ययविधायकसूत्राणां विवरणम्

### ५.१. प्रस्तावना

प्रयोगे 'आ'कारान्तस्त्रीत्ववाचकशब्दा:'ऊ'कारान्तस्त्रीत्ववाचकशब्दा: 'ति'प्रत्ययान्त-स्त्रीत्ववाचकशब्दाश्च व्यवहृता: दृश्यन्ते । एतेषां शब्दानां अन्तिमवर्ण: 'आ'कार:, 'ऊ'कार:, 'ति' इति स्वरूपात् इमे शब्दा: परिचीयन्ते । 'टाप्'-'ड़ाप्'-'चाप्' इति प्रत्ययेभ्य: आकार: अवशिष्यते । ऊङ् प्रत्ययात् 'ऊ'कार: एवञ्च 'ति' प्रत्ययात् ति इत्यवशिष्यते । ति-प्रत्ययं विहाय सर्वे सानुबन्धका: प्रत्यया: इमे भवन्ति । इत्सञ्ज्ञालोपाभ्यामपहारादनन्तरं तेभ्य: प्रत्ययेभ्य: आकारस्य ऊकाररूप भावशेषो जायते । तेषां शब्दानां प्रकृतिनिरूपणे कस्मादेव शब्दात् ते प्रत्यया: उत्पद्यन्ते इति विवेचनसाधने पाणिनीयव्याकरणे सकौशलं प्रतिपादनं लक्ष्यीकृतं जायते । तदर्थं त्रयोदशसूत्राणि अष्टौ वार्त्तिकवचनानि संघटितानि सन्ति ।

शब्दानां वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये विधीयमानेषु स्त्रीप्रत्ययेषु इमे प्रत्यया: ग्रहणीया: जायन्ते । प्रत्ययविधानार्थं सूत्रेषु प्रकृतिग्रहणं विभिन्नोपायेनोपजायते । प्रत्ययेषु असारूप्यं विभिन्नेनोद्देश्येन अवधार्य्यते । 'स्त्रियाम्' इत्यधिकारे इमे प्रत्यया: प्रातिपदिकाद् विधीयन्ते । दीर्घलोपादिप्रक्रियात्मकं कार्य्यं, ततश्च निष्पन्नं प्रातिपदिकम् ।

### ५.२. उद्देश्यम्

प्रियपाठका: ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- 'टाप्'प्रत्यय-विधायकसूत्रं वार्त्तिकवचनं तदनुरोधेन लक्ष्यसिद्धिमवगमिष्यन्ति ।
- 'ड़ाप्'प्रत्ययविधायकसूत्रं वार्त्तिकवचनं तदनुरोधेन लक्ष्यसिद्धिं ज्ञास्यन्ति ।
- 'चाप्'प्रत्ययविधायकसूत्रं वार्त्तिकवचनं तदनुरोधेन लक्ष्यसिद्धिमधिगमिष्यन्ति ।
- 'ति'प्रत्ययविधायकसूत्रं तदनुरोधेन लक्ष्यसिद्धिमवगमिष्यन्ति ।
- 'ऊङ्'प्रत्ययविधायकसूत्रं वार्त्तिकवचनं तदनुरोधेन लक्ष्यसिद्धिमवाप्स्यन्ति ।

### ५.३. स्त्रीत्वविवक्षायां 'टाप्'प्रत्यय:

शब्दानां वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये विधीयमानेषु स्त्रीप्रत्ययेषु 'टाप्'प्रत्यय: अन्यतम: । अकारान्तप्रातिपदिकात् प्रत्ययस्यास्य विधानं दृश्यते । तदर्थं सूत्रद्वयं वार्त्तिकवचनचतुष्टयं कौमुद्यां प्राप्यन्ते । तथाहि

सूत्रम् १. अजाद्यतष्टाप् (पा.सू. ४/१/४)
२. टावृचि (पा.सू. ४/१/९)

वार्त्तिकम् १. शूद्राचामहत्पूर्वा जातिः ।
२. सम्भस्त्राजिनशणपिण्डेभ्यः फलात् ।
३. सदच्काण्ड्प्रान्तशतैकेभ्यः पुष्पात् ।
४. मूलान्नञः ।

**सूत्रार्थावगमनम्**

१. अजाद्यतष्टाप् (पा.सू. ४/१/४)

अज आदिर्येषां ते अजादयः । अजादयश्च अत् च अजाद्यत् तस्मात् अजाद्यतः, बहुब्रीहिगर्भसमाहारो द्वन्द्वः । 'ङ्याप्प्रातिपदिकात्' इति सूत्रात् 'प्रातिपदिकात्' इत्यनुवृत्तिः । स्त्रियाम्, प्रत्ययः, परश्च इत्येतेषां पदानामधिकारादुपस्थितिः । अतः अजादीनामकारान्तस्य वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् । अजादिगणः यत्र अज, एड्क, कोकिल, चटक, अश्व, मूषिक, बाल, वत्स, मन्द, ज्येष्ठ, कनिष्ठ, मध्यम प्रभृतयः शब्दाः पठिताः विद्यन्ते । तेषाम् अकारान्तशब्दानां ग्रहणमत्र विधौ विचार्य्यते । अज + टाप् = अजा, चटका, मूषिका, इति । अयमाकृतिगणः ।

अजशब्दं आदिर्यस्य सोऽजादिः, नत्वजादिर्यस्येति । 'अजादि' इति लुप्तषष्ठीकं पृथक्पदम् । अनुवर्त्तमानस्य 'प्रातिपदिकात्' इति पदस्य अजादि इत्यनेन सह नान्वयः । किन्तु अजादीत्यस्य 'स्त्रियाम्' इत्यनेन सह सम्बन्धः । अतः अजादीनामकारान्तस्य वाच्यं यत् स्त्रीत्वमित्येवमर्थः आकाङ्क्षितः । तुरगशब्दात् ङीप्प्रत्ययः तुरग + ङीप् = तुरगी । टाप्प्रत्ययो भवितुं नार्हति । यतो हि टाप्प्रत्ययविधानार्थं यत् प्रातिपदिकमभिलषितं तत्र तुरगशब्दो नास्ति । 'अजाद्यतः' इति विशिष्टं पञ्चम्यन्तं स्यात्तदा अजाद्यन्तादन्ताच्च प्रातिपदिकात् इत्यर्थो भवेत् येन 'पञ्चाज'शब्दादपि टाप्प्रत्ययः स्यात् । पञ्चाज + टाप् = पञ्चाजा इति न भवति पञ्चाजी इति रूपं भवति । 'समासप्रत्ययविधौ प्रतिषेधः' इति तदन्तविधिः न स्यात् । तदयुक्तम् । 'शूद्राचाऽमहत्पूर्वा जातिः' इत्यत्र अमहत्ग्रहणम् पुनश्च 'अनुपसर्जनात्' इत्यधिकारे तदन्तविधिः भवतीति भाष्यकृतां वचनमत्र प्रमाणम् ।

लिङ्गं प्रातिपदिकार्थः न तु प्रत्ययार्थः । अतः प्रत्ययः लिङ्गरूपस्यार्थस्य द्योतकः न तु वाचकः वैयाकरणानमेषः सिद्धान्तः ।

२. टावृचि (पा.सू. ४/१/९)

टाप् + ऋचि = टावृचि । टाप् प्रथमान्तम् । ऋचि सप्तम्यन्तम् । स्त्रियाम्, पादः, प्रतिपदिकात्, प्रत्ययः, परश्च इत्येतेषां पदानामनुवृत्त्याऽधिकारेण चोपस्थितिः । अर्थः ऋचि वाच्यायां पादन्तात् प्रातिपदिकात् स्त्रियां टाप्प्रत्ययो भवति । द्वौ पादौ यस्याः ऋचः = द्विपदा, एवम् एकपदा, चतुष्पदा इत्युदाहरणम् । 'पादोऽन्यतरस्याम्' इति विकल्पेन ङीप्विधायकस्य सूत्रस्य अपवादभूतमिदम् ।

१. शूद्रा चामहत्पूर्वा जातिः (वा)

'अजाद्यतष्टाप्' इति सूत्रे वार्त्तिकमिदं पठितम् । शूद्र जातिः वाच्या चेत् अमहत्पूर्वः

शूद्रशब्द: स्त्रियां टापं लभते । शूद्र + टाप् = शूद्रा । 'जातेरस्त्रीविषयादयोपधात्' इति प्राप्तस्य ङीषोऽपवाद: । शूद्रस्य स्त्री इत्यादेशये 'पुंयोगादाख्यायाम्' इति सूत्रेण 'ङीष्'प्रत्यये शूद्री । महती चासौ शूद्रा इति विग्रहे जातिलक्षणङीष्प्रत्ययो भवति, न तु टाप् । प्रकृते 'पुंवत् कर्मधारय:' इति पुंवत्वम् । ततश्च ङीष्प्रत्यये महाशूद्री ।

२. शम्भस्त्राजिनशणपिण्डेभ्य: फलात् (वा)

सम् - भस्त्र, अजिन, शण, पिण्ड इत्येतेभ्य: परो य: फलशबदस्तदन्तादपि टाप्प्रत्यय: ।

सम् + फल + टाप् = सम्फला .... ।

३. सदच्काण्डप्रान्तशतैकेभ्य: पुष्पात् (वा)

सत् अच् (अच्क्विन्नन्त) काण्ड, प्रान्त, शत, एक, एतेभ्य: परो य: पुष्पशब्द-स्तदन्तादपि टाप् एव ।

सत् + पुष्प + टाप् = सत्पुष्पा ।

४. मूलान्नय: (वा)

नञ: परो यो मूलशब्दस्ततो जातिलक्षणो ङीष् न इत्यर्थ: ।

ङीषो निषेधेऽदन्तत्वात् टाप् । अमूला ।

सम्भस्त्र, सदच्, मूला इति वार्त्तिकत्रयं 'पाककर्ण' इति सूत्रे भाष्ये पठितम् ।

**टाप्-प्रत्यय:**

ट् + आ + प् = टाप् । 'ट्''प्' इत्यनुबन्धवर्णद्वयम् । 'चुटू' इत्यनेन 'ट' इत्यस्य 'हलन्त्यम्' इत्यनेन 'प' इत्यस्य लोप: । ओंकार: अवशिष्यते । प्रक्रियात्मककार्य्यदृष्ट्या अनुबन्धवर्णानां समावेश: । प्रकृते स्वरविधानार्थं पुनश्च ड़ाप्-चाबादिप्रत्ययापेक्षया पृथक्त्वप्रतिपादनं भवति लक्ष्यम् ।

**प्रयोगसिद्धि:**

अज + टाप्

अज + आ

अजा = अक: सवर्णे दीर्घ: ।

'अज'शब्दस्य स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' इति सूत्रेण टाप्प्रत्यये अनुबन्धलोपे अज + आ इति दशायां 'अक: सवर्णे दीघ:' इत्यनेन सवर्णदीर्घे अजा इति रूपम् । एवं एड़क, अश्व, चटक, मूषिक इत्येतेषां शब्दानां कृते टाप्प्रत्यये रूपं बोधनीयम् । प्रकृते जातिलक्षणङीष्प्राप्त: । वाला, वत्सा, विलाता, इति वयसि प्रथमे इति ङीप्प्राप्त: तस्यापवाद: ।

शूद्र + टाप् = शूद्रा शूद्रजातीया स्त्री । शूद्रस्य स्त्री = शूद्री ।

महाशूद्र + ङीष् = महाशूद्री ।

सम्फल + टाप् = सम्फला, भस्त्रफला, अजिनफला, शणफला, पिण्डफला ।

सत्पुष्प + टाप् = सत्पुष्पा, प्रत्यक्पुष्पा, काण्डपुष्पा, प्रान्तपुष्पा, शतपुष्पा, एकपुष्पा।

अमूल + टाप् = अमूला ।

**स्वावलोकनप्रश्नाः**

१. टाप्प्रत्ययविधानार्थं स्त्रीप्रत्ययप्रकरणे कति सूत्राणि सन्ति ?

२. टाप्प्रत्ययविधानार्थं स्त्रीप्रत्ययप्रकरणे कति वार्त्तिकवचनानि सन्ति ?

३. अजादिशब्दस्य कथं विग्रह: ?

४. अजाद्यन्तशब्दस्य विग्रहवाक्यं किम् ?

५. अजादिशब्द: कुत्र विशेषणीभूत: ?

६. अजादि इति किं विभक्त्यन्तं पदम् ?

७. अजाद्यन्तात् प्रातिपदिकात् इति स्वीकारे का हानि: ?

८. 'अजादि' इत्याकृतिगणो न वा ?

९. अजाद्युक्ति कयोरपवादभूता ?

१०. 'समासप्रत्ययविधौ प्रतिषेध:' इति तदन्तविधि: प्रतिषिद्धो न वा ?

११. टाप्प्रत्यय: लिङ्रूपस्यार्थस्य द्योतक: वाचको वा ?

१२. शूद्रस्य स्त्री इति विग्रहे किं रूपम् ।

१३. महाशूद्रशब्दस्य स्त्रीतवविवक्षायां किं रूपम् ?

१४. शतपुष्पशब्दस्य स्त्रीत्वविक्षायां किं रूपम् ?

१५. 'एकपदा ऋक्' इत्यत्र कः स्त्रीप्रतययः ?

## ५.४. स्त्रीत्वविवक्षायां 'डाप्'प्रत्ययः

अष्टासु स्त्रीप्रत्ययेषु ड़ाप्प्रत्ययः अन्यतमः । सानुबन्धकोऽयं प्रत्ययः । 'ड्', 'प्' इत्यनुबन्धवर्णद्वयम् । अनुबन्धकार्य्यादनन्तरं तत्र 'आ'कार इत्यवशिष्यते । अनुबन्धकरणस्य प्रयोजनद्वयम् १. स्वरसाधनम् २. अभस्यापि टेर्लोपः । एतदर्थं पाणिनौ सूत्रमेकं, किमपि वार्त्तिकवचनं नास्ति । तथाहि

१. ड़ावुभ्यामन्यतरस्याम् (पा.सू. ४/१/१३)

**सूत्रार्थावगमनम्**

ड़ाप् + उभाभ्याम् + अन्यतरस्याम् = ड़ाबुभाभ्यामन्यतरस्याम् । डाप् इति प्रथमान्तम् आभाभ्याम् इति पञ्चम्यन्तम्, अन्यतरस्याम् इति सप्तम्यन्तम्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च इति पदानि अनुवृत्त्या अधिकरणे चोपतिष्ठन्ते । उभाभ्यामिति पदेन 'मनः', 'अनो बहुब्रीहेः' इति सूत्रद्वयस्य ग्रहणं जायते लक्ष्यते च । अतः मन्नन्तात् प्रातिपदिकात् अन्नन्ताच्च बहुब्रीहेः प्रातिपदिकात् विकल्पेन स्त्रियां ड़ाप्प्रत्ययो भवति । उदा. सीमन् = सीमा, बहुराजन् + डाप् = बहुराजा इत्यादयः । अन्यतरस्यामिति ग्रहणात् विकल्पेन प्रत्ययोत्पत्तिः । तदभावपक्षे 'न'कारान्तशब्दस्वरूपमादाय रूपसञ्चरणं प्रयोगश्च ।

**प्रयोगसिद्धिः**

सीमन्, पामन् इति मनन्तशब्दः । अनन्तबहुब्रीहिः बहुराजन्, बहुतक्षन्, बहुयज्वन् इति ।

सीमन् + ड़ाप्
सीमन् + आ = अनुबन्धलोपे
सीम् अन् + आ
सीम् + आ = टेः (६/४/१४३)
सीमा ।

**स्वावलोकनप्रश्नाः**

१. 'ड़प्' प्रत्ययविधायकं सूत्रं किम् ?

२. 'डाबुभाभ्याम्' इत्यत्र 'उभाभ्याम्' इति पदेन कस्य ग्रहणम् ?

३. ड़ाप् इत्यत्रानुबन्धकरण्य किं फलम् ?

४. सीमन् शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

५. बहुराजन्शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

## ५.५. स्त्रीत्वविवक्षायां 'चाप्'-प्रत्ययः

स्त्रीत्वविवक्षायां विधीयमानेषु प्रत्ययेषु 'चाप्'प्रत्ययः अन्यतमः । 'च्', 'प्', 'अ' इति वर्णत्रयेण प्रत्ययोऽयं संघटितः । 'च्' 'प्' इत्यनुबन्धवर्णद्वयम् । अनुबन्धकार्य्यादनन्तरं प्रत्ययादस्मात् 'आ'कारः अवशिष्यते । अनुबन्धकारणस्य फलद्वयम् १. चित्स्वरेणान्तोदात्तत्वम् , २. प्रत्ययापेक्षया भिन्नत्वप्रदर्शनम् । 'यङश्च' इति सूत्रेण प्राप्तस्य ङीप्प्रत्ययस्यापवादभूतः । एतदर्थं पाणिनौ सूत्रद्वयमेकं वार्त्तिकवचनञ्च । तथाहि

| | |
|---|---|
| सूत्रम् | १. यङश्चाप् (पा.सू. ४/१/७४) |
| | २. आवच्याच्च (पा.सू. ४/१/७५) |
| वार्त्तिकम् | १. षाद्यञश्चाब्वाच्यः (वा.) |

**सूत्रार्थावगमनम्**

१. यङश्चाप् (पा.सू. ४/१/७४)

यङः + चाप् = यङश्चाप् । यङः इति पञ्चम्यन्तम् । 'ञ्यङ्' 'स्यङ्' इति सामान्येन यङ्पदेन गृह्येते । 'चाप्' इति प्रथमान्तम् । स्त्रियाम्, प्रातिपदिकात् प्रत्ययः, परश्च इत्येतेषामधिकारः । यङः प्रतिपदिकात् इत्यनेन सम्बन्धात् 'येनविधिस्तदन्तस्य' इति तदन्तविधिः । अतः यङ्न्तात् प्रातिपदिकात् स्त्रियां चाप्प्रत्ययो भवति इति सूत्रार्थः । उदा. कारीषगन्ध्या, सौवीर्या इति ।

२. आवच्याच्च (पा.सू. ४/१/७५)

आवच्यात् + च = आवच्याच्च । आवच्यात् पञ्चम्यन्तम् । आवटशब्दात्

'गर्गादिभ्यो यञ्' इति सूत्रेण यञ्प्रत्ययः । तेन आवच्च्य इति चाप्, अनुपसर्जनात् , स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च इत्यनुवृत्त्याऽधिकारेणचोपतिष्ठन्ते । अतः अनुपसर्जनात् आवच्च्यप्रातिपदिकात् स्त्रियां चाप् प्रत्ययो भवति । उदा. आय्य + चाप् = आवच्च्या । अवटः = ऐन्दजालिकजीविकावान् ।

वार्त्तिकम् षाद्यञश्चाप् वाच्यः (वा.)

'ष'कारात् परो यो यञ् तदन्तादपि स्त्रियां 'चाप्'प्रत्ययो भवति ।

उदा. शर्करा‍क्ष्या, पौतिमाष्या इति ।

**प्रयोगसिद्धिः**

१. कारिषगन्ध्या

करीषं = गोमहिषादिपुरीषं, तस्यैव गन्धो यस्य सः करीषगन्धिः । 'उपमानाच्च' इति सूत्रेण गन्धस्य इकारोऽन्तादेशः । करीषगन्धेः गोत्रापत्यं स्त्री इत्यर्थे अण्प्रत्ययः । अणिञोरनार्षयोः इति तस्य ष्यङादेशः । 'यङश्चाप्' इति सूत्रेण 'चाप्' प्रत्ययः अनुबन्धकार्य्ये कारीषगन्ध्या इति रूपम् ।

करीषगन्ध + इ = उपमानाच्च (५/४/१३७)

करीषगन्ध् + इ = यस्येति च ।

करीषगन्धि + अण् = तस्यापत्यम् ।

करीषगन्धि + ष्यङ् = अणिभोरनार्षयोः (४/१/७८)

करीषगन्ध + य

करीषगन्ध् + य = यस्येति च ।

करीषगन्ध्य + चाप् = यङश्चाप् (४/१/७४) ।

करीषगन्ध्य + आ

करीषगन्ध्या = अकः सवर्णे दीर्घः ।

२. अम्बष्ठ्या

अम्बष्ठः = वैश्यायां ब्राह्मणाज्जातः तस्यापत्यं स्त्री इत्यर्थे 'वृद्धेत्कोसलात्' इति ञ्यङि वृद्धौ आम्बष्ठ्य इति तस्माच्चापि रूपम् ।

३. शार्कराक्ष्या शक्रराक्षि + यञ् = गर्गादिभ्यो यञ् ।

शार्कराक्ष्य + चाप् = षाद्यञश्चाब्वाच्यः ।

शार्कराक्ष्या ।

४. पौतिमास्या पूतिमाष + यञ्, + चाप् ।

५. आवट्या

अवट = ऐन्द्रजालिकजीविकावान् तस्यापत्यमित्यर्थे गर्गादित्वाद्यञि वृद्धौ आवट्य–

शब्दात् 'यञश्च' इति प्राप्तं ङीपं बाधित्वा 'आवच्याच्च' इति सूत्रेण चाप् अनुबन्धादिकार्य्ये रूपम् ।

**स्वावलोकनप्रश्नाः**

१. 'चाप्'प्रत्ययविधानार्थं सूत्रं लिखत ?

२. चाप्रीतत;य;यविधानार्थं वार्त्तिकवचनं किम् ?

३. 'यङ्' इत्यस्य कुत्र विशेषणतया तदन्तविधिः ?

४. 'यङश्चाप्' इति सूत्रस्योदाहरणमेकं देयम् ?

५. 'चाप्'प्रत्ययस्य 'च'कारानुबन्धेन फलं किम् ?

६. आवट्या इत्यत्र कः स्त्रीप्रत्ययः ?

७. 'चाप्' प्रत्ययः कस्य प्रत्ययस्यापवादभूतः ?

## ५.६. स्त्रीत्वविवक्षायां 'ति'प्रत्ययः

'ति'प्रत्ययविधानार्थमेकमेव सूत्रम् । युवन्शब्दः प्रकृतितया गृहीतः, निरनुबन्धकप्रत्ययः 'ति' इति । युवति इति निष्पत्तये सूत्रं प्रत्ययविधानञ्च ।

सूत्रम् सूनस्तिः (पा.सू. ४/१/७७) ।

**सूत्रार्थावगमनम्**

यूनस्तिः (पा.सू. ४/१/७७) । यूनः पञ्चम्यन्तं पदम् । 'ति' इति प्रथमान्तं पदम् । तद्धिताः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः परश्च इत्यनुवृत्त्याऽधिकारेण चोपतिष्ठन्ते । युवन् प्रातिपदिकात् स्त्रियां 'तिः' प्रत्ययो भवति स च तद्धितसंज्ञको भवति । युवन् + तिः = युवतिः ।

'ऋन्नेभ्यः' इति ङीपोऽपवादोऽयम् । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति इति परिभाषायाः अनित्यत्वात् 'तद्धिताः' इति विभक्तिविपरिणामेन सम्बन्धः सार्थकः । उपसर्जनीभूतो यो युवन्शब्दः तत्र 'तिः' इति प्रत्ययवारणार्थम् 'अनुपसर्जनात्' इत्यधिकारः । तथा हि बहवो युवानो यस्यां सा बहुयुवा । अत्र 'ऋन्नेभ्यः' इति सूत्रेण प्राप्तस्य ङीपः 'अनो बहुव्रीहेः' इति सूत्रेण निषेधे

'ड़ाबुभाभ्यामन्यतरस्याम्' इति ड़ाप्प्रत्यये बहुयुवा इति ।

**प्रयोगसिद्धिः**

युवन् + तिः = यूनस्तिः
युव ( ) + तिः = न लोपः प्रातिपदिकान्तस्य
युवतिः ।

यौति = पत्न्या पत्याऽऽत्मानं मिश्रयतीत्यर्थे 'कनिन् युवृषितक्षि' इति उणादिकनिन्प्रत्यये 'युवन्'शब्दात् 'ति'प्रत्यये 'स्वादिषु' इति पदत्वात् पदत्वान्नलोपः 'युवतिः' इति ।

युवती १. 'यु'मिश्रणे इत्यस्माल्लटः 'श'तृप्रत्यये शपो लुकि उवङि उगित्वान्ङीपि युवती इति ।

२. यु धातोः औणादिके बाहुलकात् 'कति' प्रत्यये कित्वात् गुणाभावे उवङि उगित्वात् ङीपि युवती इति ।

३. 'युवति'शब्दात् 'सर्वतोऽक्तिन्नर्थात्' इति बह्वादिगणसूत्रेण वैकल्पिको ङीष् युवती इति । प्रकृते 'ति'प्रत्ययद्वाराऽपि स्त्रीत्वमुक्तम्, पुनश्च विधीयमानेन ङीष्प्रत्ययेन स्त्रीत्वरूपार्थसाधने न कादिचद् विप्रतिपत्तिः, 'उक्तार्थानामप्रयोगः' इति न्यायस्य स्त्रीप्रत्ययप्रकरणे प्रवृत्तिः न भवतीति विचारात् ।

**स्वावलोकनप्रश्नाः**

१. स्त्रीत्वविवक्षायां 'ति'प्रत्ययः कस्माद् विधीयते ?

२. स्त्रीप्रत्ययप्रकरणे 'ति'प्रत्ययविधायकं सूत्रं किम् ?

३. विधीयमानः ति प्रत्ययः किं संज्ञको भवति ?

४. 'यूनस्तिः' इत्यत्र 'अनुपसर्जनात्' इत्यस्य किं फलम् ?

५. बहवो युवानो यस्यां सा इति विग्रहे किं रूपम् ?

६. विधीयमानः तिप्रत्ययः कस्यापवादभूतः ?

७. 'युवती' इति स्त्रीलिङ्गे साधु न वा ?

## ५.७. स्त्रीत्वविवक्षायाम् 'ऊङ्'प्रत्ययः

ऊङ् प्रत्ययोऽन्यतमः स्त्रीप्रत्ययः । ङकारेण सानुबन्धकः । तस्य इत्सञ्ज्ञालोपाभ्या-मपहारादनन्तरं 'ऊ'कारोऽवशिष्यते । अनुबन्धकरणस्य फलं नोङ् धातोः (पा.सू. ६/१/१७५) इति विशेषणार्थः । प्रत्ययस्यास्य विधाने गृहीताः प्रकृतयः सर्वथा 'उ'कारान्ताः एव । तत्र विधौ केषाञ्चित् प्रातिपदिकानां साक्षाद्ग्रहणं, केषाञ्चिद्उकारान्तभावेन, उकारानतशब्दभावेन चावस्थापनं कृतं दृश्यते । एतदर्थं पाणिनौ सप्त सूत्राणि त्रीणि वार्त्तिकवचनानि विद्यन्ते । एषु एकं सूत्रं वैदिकप्रयोगस्य कृते उद्दिष्टम् । तथाहि तानि सूत्राणि वार्त्तिकवचनानि

१. उङुतः (पा.सू. ४/१/६६)

उकारान्तात् अयोपधात् मनुष्यजातिवाचिनः प्रातिपदिकात् स्त्रियाम् 'ऊङ्' प्रत्ययो भवति ।

कुरु + ऊङ् = कुरु

ब्रह्मबन्धु + ऊङ् = ब्रह्मबन्धू

वीरवन्धु + ऊङ् = बीरवन्धू ।

योपधत्वात् अध्वर्यु इत्यस्य ग्रहणं न भवति ।

२. बाह्वन्तात् संज्ञायाम् (पा.सू. ४/१/६७)

बाहुः अन्ते यस्य तद् बह्वन्तम् । बाह्वन्तात् प्रातिपदिकात् संज्ञायां विषये स्त्रियाम् ऊङ् प्रत्ययो भवति ।

भद्रवाहु + ऊङ् = भद्रवाहू ।

जालवाहु + ऊङ् = जालवाहू ।

संज्ञायाम् इत्यभावे सूत्रप्रवृत्तिः न भवति । वृत्तवाहुः इत्यत्र न ।

३. पङ्गोश्च (पा.सू. ४/१/६८)

अनुपसर्जनात् पङ्गुशब्दात् स्त्रियाम् 'ऊङ्' प्रत्ययो भवति ।

पङ्गु + ऊङ् = पङ्गू ।

जातिवाचित्वाभावात् 'ऊङुतः' इति सूत्रेण ऊङ्प्रत्ययो न भवति ।

४. ऊरुत्तरपदादौपम्ये (पा.सू. ४/१/६९)

उरुत्तरपदात् प्रातिपदिकात् स्त्रियाम् औपम्ये ऊङ् प्रत्ययो भवति ।

कदलीस्तम्भोरु + ऊङ् = कदलिस्तम्भोरुः ।

करभोरु + ऊङ् = करभोरूः ।

५. संहितशफलक्षणवामादेश्च (पा.सू. ४/१/७०)

संहित शफ लक्षण वाम इत्येवमादेः ऊरुत्तरपदात् स्त्रियाम् ऊङ् प्रत्ययो भवति ।

संहितोरु + ऊङ् = संहितोरुः ।

एवं शफोरूः लक्षणोरूः, वामोरूः इति प्रयोगः ।

६. कद्रुकमण्डल्वोश्छन्दसि (पा.सू. ४/१/७१)

कद्रु कमण्डलु इतयेताभ्यां छन्दसिविषये ऊङ् स्यात् ।

कद्रु + ऊङ् = कद्रू ।

कमण्डलु + ऊङ् = कमण्डलू ।

७. संज्ञायाम् (पा.सू. ४/१/७२)

कद्रु कमण्डलु इत्येताभ्यां लौकिकविषये संज्ञायां गम्यमानानायं ऊङ् प्रत्ययो भवति ।

कद्रु + ऊङ् = कद्रू ।

कमण्डलु + ऊङ् = कमण्डलू ।

वार्त्तिकवचनानि

१. अप्राणिजातेश्चारज्ज्वादीनामुपसङ्ख्यानम् (वा.)

रज्ज्वादिभिन्नानामप्राणिजातिवाचकानामपि ऊङ् प्रत्ययो भवति ।

कर्कन्धु + ऊङ् = कर्कन्धू ।

कृकवाकु + ऊङ् = कृकवाकू ।

२. श्वशुरस्योकाराकारलोपश्च (वा.)

श्वशुरशब्दस्य उकाराकारयो: लोप: ऊङ्प्रत्ययश्च ।

श्वशुरस्य स्त्री इत्यर्थे पुंयोगलक्षणे ङीषि प्राप्ते तदपवाद ऊङ् विधीयते ।

श्वशुर + ऊङ् ।

= श्वश् र् + ऊङ् ।

= श्वश्रू ।

३. सहितसहाभ्यां चेति वक्तव्यम् (वा.)

सहित सह आभ्यां पर: य: ऊरुशब्द: तस्मादपि 'ऊङ्' स्यात् ।

सहित + ऊरु + ऊङ् = सहितोरू ।

सह + अरु + ऊङ् = सहोरू ।

**स्वावलोकनप्रश्नाः**

१. ऊङ् प्रत्यय: कस्मात् प्रातिपदिकादिष्यते ?

२. ऊङ् प्रत्ययेन स्त्रीत्वबोधनार्थं कति सूत्राणि वर्त्तन्ते ?

३. ऊङ् प्रत्यये ङकारानुबन्ध: किमर्थ: ?

४. पङ्गुशब्दस्य स्त्रीत्वविवक्षायां 'ऊङुत' इति सूत्रेण ऊङ्प्रत्यय: कथं न ?

५. वृत्तवाहु इत्यत्र स्त्रियाम् ऊङ् कथं न ?

६. श्वश्रू: इत्यत्र क: स्त्रीप्रत्यय: ?

७. श्वशुरशब्दस्य स्त्रीत्वविवक्षायां स्त्रीप्रत्यय: केन विधीयते ?

८. 'सहितोरु' शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

## ५.८. सारांश:

स्त्रीत्वविवक्षायां टाप्-डाप्-चाप्-ऊङ्-ति-प्रत्ययानां विधानविवेचनं विहितम् । शब्दानां वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये इमे प्रत्यया: भवन्ति । एतेषां प्रत्ययानां कृते त्रयोदशसूत्राणि अष्टौ वार्त्तिकवचनानि सन्ति । तेषां प्रवृत्तये संज्ञायां, 'मनुष्यजाते:', योपध: इत्यादिभावेन बन्धनमपि उपगतम् । 'प्रातिपदिकात्', 'अनुपसर्जनात्', 'स्त्रियाम्' इति सूत्राणां यथाप्रसङ्गमुपपादनं साधितम् । टाप्प्रत्ययविधाने सूत्रद्वयम्, चत्वारि वार्त्तिकवचनानि उपस्थापितानि । अजादि आकृतिगण: । 'अजादि' इत्यस्य 'स्त्रियाम्' इत्यनेन सम्बन्ध: । अजादीनाम् अकारान्तस्य वाच्यं यत् स्त्रीत्वमिति प्रसङ्ग: । तदर्थं निर्दिष्टा: शब्दा: सूत्रेष वार्त्तिकेषु च गृहीता: । चाप्प्रत्यविधानार्थं ज्य-ष्यङन्तशब्दा: आवच्यशब्दश्च ग्रहणीया: सन्ति । मनन्तात् अन्नन्तात् बहुब्रीहे: डाप्प्रत्यय:, युवन्शब्दस्य स्त्रीत्वे 'ति'प्रत्यय:, युवती इत्यपि ङीप्ङीष्प्रत्ययेन रूपसिद्धि: । उकारान्तशब्दानां स्त्रीत्वविवक्षायां मनुष्यवाची अयोपध: उकारान्तशब्द:, पङ्गुशब्द:, बाह्वन्त-ऊरूत्तरपदशब्द: श्वशुरशब्द: इत्यादय: गृहीता: भवन्ति । टाप्-डाप्-चाप्-ऊङ्प्रत्ययानां ये अनुबन्धवर्णा: सन्ति तेषां फलं स्वरसन्धानविधौ प्रक्रियात्मककार्य्यमार्गे च संस्थापितम् । इत्थं टाप्-डाप्-चाप्-ऊङ्-ति-प्रत्ययानां स्त्रीत्वविवक्षायामुपयोगित्वं ज्ञातम् ।

## ५.९. आदर्शप्रश्नाः

I. **निबन्धात्मकाः प्रश्नाः (प्रत्येकं २०/१५ अङ्काः)**

१. स्त्रीत्वविवक्षायां विधीयमानानां टाप्-डाप्-चाप्प्रत्ययानां विषये विवरणं विधेयम् ?

२. स्त्रीविवक्षायां विधीयमानस्य 'ऊङ्'प्रत्ययस्य विषये विवरणं विधेयम् ?

३. टाप्-डाप्-चाप्-ऊङ्-प्रत्ययानां कृते उद्दिष्टानि वार्त्तिकवचनानि परिष्कुरुत ?

II. **विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)**

१. 'अजाद्यतष्टाप्' इति सूत्रस्य व्याख्या कार्य्या ?

२. 'युवतिः', 'युवती' इति रूपद्वयस्य सिद्धिविषये विवरणं प्रदेयम् ?

३. 'शूद्राचामहत्पूर्वा जातिः' इति वार्त्तिकस्य व्याख्यानं विधेयम् ?

III. **लघुप्रश्नाः (प्रतयेकं ५ अङ्काः)**

१. 'टावृचि' इति विषये टिप्पणी प्रदेया ?

२. 'डाबुभाभ्यामन्यतरस्याम्' इति सूत्रस्य विवरणं विधेयम् ?

३. 'करीषगन्ध्या' इत्यस्य रूपनिष्पत्तिं प्रदर्शयत ?

४. 'ऊङुतः' सूत्रस्य व्याख्यानं विधेयम् ?

५. 'श्वश्रूः' इति सिद्धरूपस्य निष्पत्तिप्रकारं विवेचयत ?

IV. **एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्कः)**

१. टाप्प्रत्ययविधानार्थं स्त्रीप्रत्ययप्रकरणे कति सूत्राणि सन्ति ?

२. अजादिशब्दस्य कथं विग्रहः ?

३. अजादिशब्दः कुत्र विशेषणीभूतः ?

४. अजादि इति किं विभक्त्यन्तं पदम् ?

५. अजादि किम्भूतो गणः ?

६. अजाद्युक्तिः कयोरपवादभूता ?

७. 'टाप्'प्रत्ययः लिङ्गरूपस्यार्थस्य द्योतकः वाचको वा ?

८. शूद्रस्य स्त्री इति विग्रहे किं रूपम् ?

९. महाशूद्रशब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

१०. 'डाबुभाभ्याम्' इत्यत्र 'उभाभ्याम्' इति पदेन किं गृह्यते ?

११. बहुराजन्शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

१२. ‘चाप्’प्रत्ययः कस्य प्रत्ययस्यापवादभूतः ?

१३. बहवो युवानो यस्यां सा इति विगहे किं रूपम् ?

१४. ‘युवती’ स्त्रीलिङ्गे साधु न वा ?

१५. ‘श्वश्रूः’ इत्यत्र कः स्त्रीप्रत्ययः ?

१६. ‘पङ्गू’ इत्यत्र ‘ऊङ्’प्रत्ययविधायकं सूत्रं किम् ?

## ५.१०. एकाङ्कप्रश्नानामुत्तराणि

१. द्वयम् २. ‘अज’शब्दः आदिर्यस्य सः ३. स्त्रियाम् ४. लुप्तषष्ठीकम्
५. आकृतिगणः ६. ङीप्ङीषोः ७. द्योतकः ८. शूद्री ९. महाशूद्री १०. मनः
११. बहुराजा १२. ङीप् १३. बहुयुवा १४. साधु १५. ऊङ् १६. पङ्गुश्च ।

********

# ।। षष्ठखण्डः ।।

## ङीप्–ङीष्–ङीन्–प्रत्ययविधायकसूत्राणां विवरणम्

### ६.१. प्रस्तावना

प्रयोगे 'ई'कारान्त स्त्रीत्ववाचकशब्दाः व्यवहृताः दृश्यन्ते । तेषां शब्दानाम् अन्तिमवर्णः ईकारः। प्रकृतिभावेन केचन शब्दाः विभिन्नोपायेन गृहीतप्रातिपदिकतयाऽभीष्टाः भवन्ति । 'ङीप्'–'ङीष्'–'ङीन्' इति त्रयः प्रत्ययाः उपदिष्टाः भवन्ति । इमे सानुबन्धकाः प्रत्ययाः । 'ङ्', 'प्', 'ष्' 'न्' इति वर्णानां यथाविधि इत्सञ्ज्ञालोपाभ्यामहारादनन्तरं केवलम् ईकारमात्रः अवशिष्यते । प्रकृतिभागे अन्तिमवर्णस्य भसंज्ञया लोपः, विपरिणाः, हल्वर्णश्चेत् प्रत्ययादवशिश्टेन ईकारेण सह संयोजनमिति विधीयमानं प्रक्रियात्मकं कार्य्यम् । 'प्रत्ययः', 'परश्च', 'स्त्रियाम्', 'प्रातिपदिकात्', 'अनुपर्सनात्' इत्यनुवृत्त्या अधिकारेण चोपतिष्ठन्ते । अभीष्टात् प्रातिपदिकात् प्रत्ययस्य परविधीयमानता, प्रातिपदिकवाच्यस्य स्त्रीत्वरूपस्यार्थस्य विहितप्रत्ययद्वारा द्योतनम्, प्रत्ययविधानात्मककार्य्यस्य सम्प्रत्ययः मुख्ये भवति न तु गौणे इति प्रतिपादनाय अनुपर्सनाधिकारः इतीमानि पाणिनीयानि कार्य्याणि ङीवादिप्रत्ययविधानार्थमुपतिष्ठन्ते । उद्दिष्टेषु सूत्रेषु पुनः उत्सर्गापवादकार्य्यमित्यन्यद् वैचित्र्यम् । एतद्विधौ

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १. | 'ङीप्'प्रत्ययस्य कृते | सूत्राणि | २९ | वार्त्तिकानि | ०९ | | |
| २. | 'ङीष्'प्रत्ययस्य कृते | सूत्राणि | २६ | वार्त्तिकानि | १९ | | |
| ३. | 'ङीन्'प्रत्ययस्य कृते च | सूत्राणि | ०१ | वार्त्तिकानि | ०० | गणसूत्रम् | ०१ |
| | | सूत्राणि | ५६ | वार्त्तिकानि | २८ | गणसूत्रम् | ०१ |

लक्षीकृतानि जायन्ते । एवं भावेन मूलशब्दात् ईकारान्ताः स्त्रीलिङ्गवाचकशब्दाः निष्पद्यन्ते । ते सर्वे शब्दाः भाषितपुंस्काः ।

### ६.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

. ङीप् प्रत्ययविधायकसूत्रं वार्त्तिकवचनं तदनुरोधेन लक्ष्यसिद्धिमवगमिष्यन्ति ।

. ङीष् प्रत्ययविधायकं सूत्रं वार्त्तिकवचनं तदनुरोधेन लक्ष्यसिद्धिं ज्ञास्यन्ति ।

. ङीन् प्रत्ययविधायकं सूत्रं वार्त्तिकवचनं तदनुरोधेन लक्ष्यसिद्धिमधिगमिष्यन्ति ।

### ६.३. स्त्रीत्वविवक्षायां 'ङीप्'प्रत्ययः

ईकारान्तस्त्रीलिङ्गशब्दानां स्त्रीप्रत्ययान्वेषणवेलायां विधीयमानेषु स्त्रीप्रत्ययेषु ङीप्प्रत्योऽन्यतमः । ङ् + ई + प् इति प्रत्ययस्य तस्य संघटने इयं वर्णशय्या । ङ्कारस्य

'लशक्वतद्धिते' इति सूत्रेण पुनश्च 'प'कारस्य 'हलन्त्यम्' इति सूत्रेण च इत्संज्ञा । अनुबन्धकरणस्य फलं भवति स्वरविधानं प्रत्ययान्तरापेक्षया पृथक्त्वप्रतिपादनम् । विधीयमानकार्य्यप्रकारेषु ङीप्विधानम् ङीप्निषेधः ; वैकल्पिकङीप्विधानञ्चेति त्रिविधम् । प्रकृतिग्रहणे विभिन्नाः उपायाः साक्षात्प्रातिपदिकनिर्देशः, वर्णनिर्देशः, अर्थाभिबन्धनमिति अनुगमादिविभिन्नं प्रतिपानम् । कौमुद्यामेतत् कृते २९ सूत्राणि ९ वार्त्तिकवचनानि वर्त्तन्ते । वार्त्तिकवचनैः कुत्र प्रत्ययस्य निषेधः, कुत्र आशयान्तरसंयोजनम्, कुत्र पुनः गृहीतायाः प्रकृतेः कृते सङ्कोचनञ्चेति सूत्रोपदिष्टस्य कार्य्यस्य पर्य्यालोचनं कृतं दृश्यते ।

सूत्राणि, वार्त्तिकवचनानि तदर्थगमनं लक्ष्यसिद्धिश्च ।

## I. **वर्णनिर्देशपुरस्सरं विवक्षिता प्रकृतिः**

१. ऋन्नेभ्यः ङीप् (पा.सू. ४/१/५)

ऋच्च नश्च ऋन्नाः तेभ्यः ऋन्नेभ्यः । अनुवर्त्तमानस्य प्रातिपदिकात् इत्यस्य विशेषणात् तदन्तविधिः । अतः ऋकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति ।

| | |
|---|---|
| ऋकारान्तेभ्यः | कर्त्तृ + ङीप् = कर्त्री । |
| | दातृ + ङीप् = दात्री । |
| नकारान्तेभ्यः | गुणिन् + ङीप् = गुणिनी । |
| | मयाविन् + ङीप् = मायाविनी । |
| | यशस्विन् + ङीप् = यशस्विनी । |

२. मनः (पा.सू. ४/१/११)

मन्नन्तात् प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययो न भवति । 'ऋन्नेभ्यः ङीप्' इति ङीप्प्राप्तः, तस्य अनेन निषेधः । दामन् इत्यस्य स्त्रीत्वविवक्षायां ङीप् न ।

३. अनो बहुव्रीहेः (पा.सू. ४/१/१२)

अन्नन्तात् बहुब्रीहेः प्रातिपदिकात् स्त्रियां ङीप् न भवति । शोभनं पर्व अस्या इति सुपर्वा । शोभनं चर्म अस्या इति सुचर्मा । 'ऋन्नेभ्यः ङीप्' इति सूत्रेण प्राप्तस्य ङीपः निषेधः ।

४. न षट् स्वस्रादिभ्यः (पा.सू. ४/१/१०)

ष्पान्ता षट् इति षट्संज्ञा । स्वसृ, दुहितृ, ननान्दृ, यातृ इति स्वस्रादयः । षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च प्रातिपदिकेभ्यः स्त्रियां प्रत्ययो न भवति । उदा. पञ्च, नव, सप्त, दश, स्वसा, दुहिता, ननान्दा, याता इति ।

## II. **अनुबन्धवर्णनिर्देशपुरस्सरं विवक्षिता प्रकृतिः**

१. उगितश्च (पा.सू. ४/१/६)

उगिदन्तात् प्रातिपदिकात् स्त्रयां ङीप् ।

भवत् भवती, पचत् पचन्ती, गच्छत् गच्छन्ती

भू + शतृ = भवत् । 'शतृ'प्रत्ययात् ऋकारस्येत्संज्ञायामसौ उगित् इति व्यवहारः ।

III. **पदैकदेशनिर्देशपुरस्सरं विवक्षिता प्रकृतिः**

पादोन्यतरस्याम् (पा.सू. ४/१/८)

पादान्तात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो विकल्पेन भवति । अत्र 'संख्यासुपूर्वस्य' (५/४/१०) इति सूत्रेण समासान्तस्य अकारस्य लोपः 'पाद्' इत्यस्य ग्रहणं वर्त्तते । अनुवर्त्तमानस्य 'प्रातिपदिकात्' इत्यस्य विशेषणत्वात् तदन्तविधिः । उदा. द्विपदी, द्विपाद् । इति द्वौ पादौ यस्यां गायत्र्यां सा द्विपदी, द्विपाद् । द्विपाच्छब्दाद् वैकल्पिके ङीपि भसंज्ञायां 'पादः पत्' इति पदादेशे द्विपदी ङीपोऽभावे द्विपाद् इति ।

IV. **प्रत्ययनिर्देशपुरस्सरं विवक्षिता प्रकृतिः**

१. वनो र च (पा.सू. ४/१/७)

वनः षष्ठ्यन्तम्, र लुप्तप्रथमान्तनिर्देशः । वनन्तात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति, रेफश्चान्तादेशः । वन्निति ङ्वनिप् वनिप् क्वनिपां सामान्यग्रहणम् । 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषया तदादिविशेष्यकतदन्तविधिः । पुनश्च प्रातिपदिकविशेषणत्वेन वनन्ततदाद्यन्तात् इत्यर्थलाभः । उदा. धीवरी, अतिधीवरी, पर्वरी, सर्वरी, सुत्वरी इत्यादयः प्रयोगाः ।

i. बहुव्रीहौ वा (वा)

'अनो बहुव्रीहेः' इति प्रतिषेधस्यापवादः । ङीप् प्रत्ययः रकारान्तादेशः स्यात् विकल्पेन । तेन बहुधीवरी, बहूधीवा इति रूपम् ।

ii. वनो न हश् वक्तव्यम् (वा)

अनेन वार्त्तिकेन निषेधः क्रियते । तेन हशन्तात् धातोः विहितो यो वन्

तदन्तात्तदन्ताच्च

प्रातिपदिकात् ङीप् 'र'श्च न स्यात् । तेन अवावा, राजयुध्वा । ओणृञ् + क्वनिप् = अवावा राजयुध् + क्वनिप् ।

२. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप् (पा.सू. ४/१/१५)

टित् ढ, अण् अञ्, द्वयसच्, दघ्नच् मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप् इति द्वादशानामत्र ग्रहणं विहितम् । प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम् । अनुपसर्जनाधिकारः । अतः अनुपसर्जनं यट्टिदादि तदन्तं यदन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात् । उदा. कुरुचरी, नदी, ऐन्द्री, औत्सी, ..... उपसर्जनत्वात् बहुकुरुचरा इति ।

चौर = चौरी 'णेऽपि अणकृत्यानि' भवन्तीति विचारात् ङीप् ।

i. नञ्स्नञीकक्ख्युस्तरुणतलुनानामुपसंङ्ख्यानम् (वा)

नञ्, स्नञ्, ईकक्, ख्युन्, तरुण, तलुन इत्येतेषां ङीप् प्रत्ययो भवति ।

उदा. स्त्रैणी, पौंस्नी, तरुणी, तलुनी ।

३. यञश्च (पा.सू. ४/१/१६)

प्रातिपदिकात् इति विशेषणात् तदन्तविधिः । अनुपसर्जनाधिकारः अतः अनुपसर्जनात् नञन्तात् प्रातिपदिकात् स्त्रियां ङीप् । उदा. गार्गी, वात्सी इति ।

i. अनपत्याधिकारस्थान्न ङीप् (वा)

'तस्यापत्यम्' इत्यपत्यधिकारविहितभिन्नयञन्तात् न ङीप् । द्विपे भवेति विग्रहे 'यञ्' प्रत्यय । स च अनपत्याधिकारीयः । अतः द्वैप्या इति रूपम् ।

V. **समासनिर्देशपुरस्सरं विवक्षिता प्रकृतिः**

**द्विगुसमासः**

१. द्विगोः (पा.सू. ४/१/२१)

द्विगुसंज्ञकादनुपसर्जनादन्तात् प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययो भवति त्रयाणां लोकानां समाहारः स्त्रियां त्रिलोकी । किन्तु त्रिफल इत्यादौ अजादित्वाट्टापि त्रिफला इति ।

२. अपरिमाणविस्ताचितकम्वलेभ्यो न तद्धित लुकि (पा.सू. ४/१/२२)

प्राप्तस्य ङीप्प्रत्ययस्य विधानं निषिध्यते । अकारान्ताद् अपरिमाणान्तात् द्विगोः विस्ताचितकम्बलान्ताच्च द्विगुसंज्ञकात् प्रातिपदिकात् तद्धितलुकि सति स्त्रियां ङीप्प्रत्ययो न भवति । उदा. यश्चाश्वा, द्विविस्ता, द्वयाचिता, त्रिकम्बल्या इति ।

३. काण्डान्तात् क्षेत्रे (पा.सू. ४/१/२३)

काण्डान्तादनुपसर्जनात् द्विगोः तद्धितलुकि सति ङीप् प्रत्ययो न भवति । द्विकाण्डा इति ।

४. पुरुषात् प्रमाणेऽन्यतरस्याम् (पा.सू. ४/१/२४)

प्रमाणेऽर्थे वर्त्तमानो यः पुरुषस्तदन्तात् उपसर्जनात् द्विगोः तद्धितलुकि स्त्रियां ङीप् न भवति विकल्पेन । द्विपुरुषी, द्विपुरुषा ।

**बहुव्रीहिसमासः**

१. बहुव्रीहेरुधसो ङीष् (पा.सू. ४/१/२५)

ऊधस्शब्दान्ताद् बहुव्रीहेः स्त्रियां ङीप् । कुण्डोध्नी, घटोध्नी ।

२. संख्याव्ययादेर्ङीप् (पा.सू. ४/१/२६)

संख्यादेः अव्ययादेः ऊधस्शब्दान्ताद् बहुव्रीहेः स्त्रियां ङीप् ।

उदा. द्वयूध्नी, अत्यूध्नी इति ।

३. दामहायन्ताच्च (पा.सू. ४/१/२७)

संख्यादेर्दामहायनान्ताच्च बहुव्रीहेः स्त्रियां ङीप् । उदा. द्विदाम्नी, द्विहायनी ।

त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम् (वा) । वयोवायकस्यैव हायनस्य द्वीप्णत्वं चेष्यते (वा) । उदा. त्रिहायसी ।

वचोवाचकाभावे द्विहायना शाला इति (द्विहायन + डाप्) ।

४. अन उपधालोपिनोऽन्यतरस्याम् (पा.सू. ४/१/२८)

अनन्तो य उपधालोपी बहुव्रीहिस्तस्मात् स्त्रियां ङीप् । उदा. बहवः राजानोऽस्यां सभायां बहुराज्ञी, डाप् पक्षे बहुराजा ।

५. नित्यं संज्ञाछन्दसोः (पा.सू. ४/१/२९)

अनन्तात् उपधालोपिनो बहुव्रीहेः संज्ञायां विषये छन्दसि नित्यं ङीप् । उदा. सुराज्ञी, एकदाम्नी, एकमूर्ध्नी इति ।

**VI. साक्षात्प्रतिपदिकनिर्देशं विधाय विवक्षिताः प्रकृतयः तत्र पुनरर्थनिर्देशादि विशिष्टं निबन्धनम्**

१. केवलमासकभागधेयपापापरसमानार्थकृतसुमङ्गलभेषजाच्च (पा.सू. ४/१/३०)

संज्ञाछन्दसोः केवलादिभ्यः एभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् । लौकिकप्रयोगे भाषायां वा अजाद्यतष्टाप् (४/१/४) इति सूत्रेण टाप् प्रत्ययो भवति । केवली/केवला, मामकी/मामका भागधेयी/भागधेया, पापी/पापा, ..... सुमङ्गली/सुमङ्गला, भेषजी/भेषजा ।

२. रात्रेश्चाजसौ (पा.सू. ४/१/३१)

'रात्रिशब्दात् स्त्रियां संज्ञायां छन्दसि विषये जस्विषयादन्यत्र ङीप् प्रत्ययो भवति । रात्री, रात्रीभिः ।

३. अन्तर्वत्पतिवतोर्नुक् (पा.सू. ४/१/३२)

अन्तर्वत् पतिवत् शब्दाभ्यां स्त्रियां ङीप् प्रत्ययो भवति, ततश्च नुक् ।

अन्तर्वत् = अन्तर्वत्नी, पतिवत् = पतिवत्नी ।

४. पत्युर्नो यज्ञसंयोगे (पा.सू. ४/१/३३)

पतिशब्दात् स्त्रीलिङ्गे ङीप्प्रत्ययो नकारश्चान्तादेशो भवति । पति = पत्नी ।

५. विभाषा सपूर्वस्य (पा.सू. ४/१/३४)

सपूर्वस्य = विद्यमानपूर्वस्य पतिशब्दान्तस्यानुपसर्जनस्य प्रातिपदिकस्य स्त्रियां ङीप् प्रत्ययो भवति विकल्पेन । वृद्धपति = वृद्धपत्नी, वृद्धपतिः, स्थूलपति = स्थूलपत्नी, सूलपतिः ।

६. नित्यंसपत्न्यादिषु (पा.सू. ४/१/३५)

सपत्न्यादिषु पतिशब्दस्तस्मात् स्त्रियां नित्यं ङीप्प्रत्ययो भवति नकारश्चान्तादेशः ।

सपत्नी, एकपत्नी ।

७. पूतक्रतोरै च (पा.सू. ४/१/३६)

अनुपसर्जनात् पूतक्रतोः प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति, ऐकारश्चान्तादेशः ।

पूतक्रतु = पूतक्रमायी ।

८. वृषाकप्यग्निकुसितकुसिदानामुदात्तः (पा.सू. ४.१.३७)

अनुपसर्जन वृषाकपि, अग्नि, कुसित, कुसिद प्रातिपदिकानाम् उदात्तः ऐकारादेशो भवति, स्त्रियां ङीप् च प्रत्ययः । उदा. वृषाकपि = वृषाकपायी अग्नि = अग्नायी, कुसित = कुसितायी, कुसिद् = कुसिदायी ।

९. मनोरौ वा (पा.सू. ४/१/३८)

मनुशब्दात् स्त्रियां विकल्पेन ङीप् प्रत्यये भवति, औकारश्चान्तादेशः ऐकारश्चापि ।

मनोः स्त्री = मनायी, मानवी ।

१०. वर्णादनुदात्तात्तोपधात्तो नः (पा.सू. ४/१/३९)

वर्णात्, अनुदात्तात्, तोपधात् । वर्णवाचिनोऽदन्तोदनुपसर्जनात् प्रातिपदिका-दनुदात्तान्तात् तोपधात् विकल्पेन स्त्रियां ङीप् प्रत्ययः 'त'कारस्य च 'न'कारादेशः ।

उदा. एत = एनी । हरित = हरिणी, हरिता ।

i. पिशङ्गादुपसंख्यानम् (वा)

'लाघवान्ते' इति पिशङ्गशब्दस्य मध्योदात्ततया शिष्टस्वरेणानुदात्तान्तत्वेऽपि तोपध-त्वाभावात् 'वर्णादनुदात्त' इति सूत्रेण ङीप् न प्राप्यते । अनेन वार्त्तिकेन ङीप् उपसंख्यायते । 'अन्यतो ङीष्' इति वक्ष्यमाणस्य ङीषोपवादः ङीप् पित्वात् अनुदात्त इति स्वरे विशेषः ।

पिशङ्गः = पिङ्गलवर्णः । पिशङ्ग = पिशङ्गी, पिशङ्गा ।

ii. असितपलितयोर्न (वा)

असितशब्दः = कृष्णवाची, पलितशब्दः = श्वतवाची । तोपधः । अतः 'वर्णादनुदात्ता-त्तोपधात्तो नः' इति सूत्रेण ङीप् प्रत्ययः । मकारान्तादेशश्च प्राप्यते । वार्त्तिकेनानेन निषिध्यते । अदन्तत्वात् 'टाप्'प्रत्यये असिता, पलिता इति ।

iii. छन्दसि क्नमेके (वा)

असितपलितयोस्तकारस्य ङीप्सन्नियोगेन 'क्न' इत्यन्तादेशः छन्दसि विषये ।

असित = असिक्नी, पलित = पलिक्नी ।

११. वयसि प्रथमे (पा.सू. ४/१/२०)

प्रथमे वयसि वर्त्तमानेभ्यः अनुपसर्जनेभ्यः अदन्तेभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति । कुमार = कुमारी, किशोर = किशोरी ।

i. वयस्यचरम इति वाच्यम् (वा)

चरमम् = अन्त्यं वयः ; तद्भिन्नम् अचरमम् । तत्र ङीप् स्यात् । वधूटचिरण्ट्शब्दौ यौवनवाचिनौ । अनयोर्द्वितीयवयोवाचित्वाद् अप्राप्तिः । अतः वार्त्तिकारम्भः ।

वधूट = वधूटी, चिरण्ट = चिरण्टी ।

**स्वावलोकनप्रश्नाः**

१. कौमुद्यां स्त्रीत्वविवक्षायाः कृते ङीप्प्रत्ययविधायकानि कानि सूत्राणि वर्त्तन्ते ?

२. कौमुद्यां स्त्रीत्वविवक्षायाः कृते ङीप्प्रत्ययसन्दर्भे कानि वार्त्तिकवचनानि सन्ति ।

३. 'ऋ'कारान्तशब्दस्य स्त्रीत्वविवक्षायां ङीप्प्रत्ययविधायकं सूत्रं किम् ?

४. 'यशस्विन्' शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

५. दामन् इत्यत्र ङीप्प्रत्ययः केन निषिध्यते ?

६. 'उगितश्च' इति सूत्रस्योदाहरणं किम् ?

७. 'वनो र च' इति सूत्रे 'र' इति किं विभक्त्यन्तं पदम् ?

८. 'ऐन्द्री' इत्यत्र कः स्त्रीप्रत्ययः ?

९. तरुण इत्यस्य स्त्रीत्वविवक्षायां किं रूपम् ?

१०. त्रिफल इत्यस्य स्त्रीत्वविक्षायां किं रूपम् ?

११. बहवः राजानोऽस्यां सभायाम् इति तात्पर्य्ये किं रूपद्वयम् ?

१२. 'मनु'शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

१३. असित शब्दस्य स्त्रीत्वविवक्षायां छन्दसि विषये किं रूपम् ?

१४. वधूट + ङीप् = वधूटी 'ङीप्'प्रत्ययः केन विधीयते ?

१५. 'वयसि प्रथमे' इति सूत्रस्य किमुदाहरणम् ?

## ६.४. स्त्रीत्वविवक्षायां 'ङीष्'प्रत्ययः

ईकारान्तस्त्रीलिङ्गशब्दानां प्रत्ययाः स्त्रीप्रत्यप्रकरणे ये सन्ति तेषु ङीष्प्रत्ययः अन्यतमः । ङ + ई + ष् इति तस्य प्रत्ययस्य स्वरूपम् । 'ङ'कारस्य 'ष'ारस्य च इत्सञ्ज्ञालोपाभ्यामपहारादनन्तरं 'ई'कारः अवशिष्यते । अनुबन्धकरणं स्वरे विशेषः । कार्य्यप्रकारेषु विधानम्, निषेधः, वैकल्पिकविधानम्, निपातनसिद्धमिति चतुर्विधमुपपादनं लक्षीकृतं विद्यते । याश्च प्रकृतयः गृहीताः तत्र निर्दिष्टशब्दानामुपपादनम्, पुंयोगस्यान्वेषणम्, अङ्गवाचकशब्दग्रहणम्, निर्दिष्टायाः उपधायाः संग्रहणम्, निर्दिष्टायाः उपधायाः संग्रहणम्, निर्दिष्टपूर्वपद/उत्तरपदग्रहणपूर्वकशब्दासंस्थापनम्, गणनिर्देशः, प्राचां मतम्, 'छन्दसि' इति बन्धनस्योपपादनम्, अनुबन्धवर्णनिर्देशनम् इति विविधं कौशलम् । प्रक्रियात्मककार्य्ये लोपागमवर्णविकारादिविविधमुपपादनम् । कौमुद्यामेतत्कृते २६ सूत्राणि १९ वार्त्तिकवचनानिद संघटितानि दृश्यन्ते । पुनश्च एकमेव गणसूत्रम् ।

### सूत्राणि, वार्त्तिकवचनानि तदर्थगमनं लक्ष्यसिद्धिश्च

**I. पुंयोगस्यान्वेषणपुरस्सरं विवक्षिता प्रकृतिः**

१. पुंयोगादाख्यायाम् (पा.सू. ४/१/४८)

पुंयोगात् + आख्यायाम् । पुंयोगात् पञ्चम्यन्तम्, आख्यायाम् इति पञ्चम्यर्थे सप्तमी । पुंसां योगः = सम्बन्धः तस्मात् । ङीष्, अतः अनुपसर्जनात् स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च इत्यनुवृत्त्याऽधिकारेण चोपतिष्ठन्ते । अतः पुंयोगात् = पुरुषसम्बन्धकारणात् यद् अनुप-सर्जनम् अदन्तं प्रातिपदिकम् स्त्रियां वर्त्तते पुंस आख्याभूतं, तस्मात् ङीष्प्रत्ययो भवति । गोपस्य स्त्री = गोपी जायापत्यात्मकस्य पुंयोगस्यात्र विवक्षा ।

i. पालकान्तान्न (वा)

पालकान्तात् शब्दात् ङीष्प्रत्ययः निषिध्यते ।

गोपालक = गोपालिका, अश्वपालक = अश्वपालिका ।

ii. सूर्य्याद्देवतायां चाब्वाच्यः (वा)

देवताभूतायां स्त्रियां पुंयोगाद् वर्त्तमानात् सूर्य्यशब्दात् 'चाप्' वाच्यः । ङीषोऽपवादः ।

सूर्य्यस्य देवता स्त्री = सूर्य्य + चाप् = सूर्य्या । सूर्य्यस्य मानवी स्त्री = सूरी ।

सूर्य्य + ङीष् इति स्थिते 'सूर्यतिष्य' इति यकारलोपः, 'यस्येति च' इत्यकारलोपः ।

२. इन्द्रवरुणभवशर्वरुद्रमृढाहिमारण्ययवयवनमातुलाचार्य्याणामानुक् (पा.सू. ४/१/४९)

इन्द्र, वरुण, भव, शर्व, रुद्र, मृढ, हिम, अरण्य, यव, यवन, मातुल, आचार्य्य इत्येतेभ्यः पुंयोगात् स्त्रियां वर्त्तमानेभ्यः अनुपसर्जनेभ्यः प्रातिपदिकेभ्यः ङीप्प्रत्ययो भवति आनुक् चागमः । उदा. इन्द्राणी, मातुलानी ..... । आनुकः कित्वात् अन्त्ये उपजायते ।

इन्द्र + आनुक् + ङीप् । इन्द्र + आन् + ई = इन्द्राणी ।

i. हिमारण्ययो: महत्त्वे (वा)

महत् हिमम् = हिम + आनुक् + ङीष् = हिमानी ।

महत् अरण्यम् = अरण्य + आनुक् + ङीष् = आरण्यानी ।

ii. यवाद्दोषे (वा)

दुष्ट: यव: = यव + आनुक् + ङीप् = यवानी ।

iii. यवनाल्लिप्याम् (वा)

पवनानां लिपि: = यवन + आनुक् + ङीष् = यवनानी

iv. मातुलोपाध्याययोरानुग् (वा)

मातुलस्य स्त्री = मातुल + आनुक् + ङीष् = मातुलानी, मातुला ।

उपाध्याय = उपाध्याय + अनुक् + ङीप् = उपाध्यायानी

v. आचार्य्यादणत्वं च (वा)

आचार्य्यस्य स्त्री = आचार्य्या + आनुक् + ङीष् = आचार्यानी ।

vi. अर्यक्षत्रियाभ्यां वा स्वार्थे (वा)

अर्यस्य स्त्री = अर्याणी = अर्य + आनुक् + ङीष् ।

अर्यी = अर्य + ङीष् पुंयोगादा....

अर्या = अर्य + टाप् ।

एवं क्षत्रियाणी, क्षत्रियी, क्षत्रिया । इति ।

**II. निर्दिष्टाया: उपधाया: सङ्ग्रहणपुरस्सरं विवक्षिता प्रकृति:**

१. अन्यतो ङीष् (पा.सू. ४/१/४०)

तोपधादन्यत: वर्णवाचिनोऽदन्तात् अनुदात्तान्तात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति । सारङ्गी, कल्माषी ।

२. जातेरस्त्रीविषयादयोपधात् (पा.सू. ४/१/६३)

जाते:, न स्त्रीविषय: अस्त्रीविषय: । य उपधा यस्य स योपध: न योपध: = अयोपध: । जातिवाची यत् प्रातिपदिकं न च स्त्रियामेव नियतमस्त्रीविषयकाम्रयकारोपधश्च तस्मात् स्त्रीलिङ्गे ङीष् प्रत्ययो भवति । उदा. ब्राह्मण = ब्राह्मणी, सूकर = सूकरी, वृषली, नाडायनी ।

जाति: इत्यस्य लक्षणं विचारितम्

आकृतिग्रहणा जाति: लिङ्गानां च न सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणै: सह ।।

पुनश्च असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनाऽपि सुग्रहा जाति: ।

i. योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यमत्स्यानामप्रतिषेधः (वा)

हयादीनां योपधत्वेऽपि ङीष् वाच्यः । हय + ङीष् = हयी । मनुष्य + ङीष् = 'हलस्तद्धितस्य' इति यकारलोपे' यस्येति च इत्यकारलोपे मनुषी ।

ii. मत्स्यस्य ङ्याम् (वा)

मत्स्य + ङीष् = मत्सी ।

**III. अङ्गवाचकशब्दग्रहणपुरस्सरं विवक्षिता प्रकृतिः**

१. अस्वाङ्गपूर्वपदाद्वा (पा.सू. ४/१/५३)

अस्वाङ्गपूर्वपदादन्तोदात्तात् क्तान्तात् बहुव्रीहेः स्त्रियां विकल्पेन ङीष्प्रत्ययो भवति । शर्ङ्गजग्ध, शार्ङ्गजग्धा ।

२. साङ्गाच्चोपसर्जनादसंयोगोपधात् (पा.सू. ४/१/५४)

स्वाङ्ग यदुपसर्जनमसंयोगोपधं तदन्ताद् अदन्तात् प्रातिपदिकात् विकल्पेन स्त्रियां ङीष् प्रत्ययो भवति । उदा. चन्द्रमुख = चन्द्रमुखी, चन्द्रमुखा ।

अतिकेश = अतिकेशी, अतिकेशा ।

३. नाकिसेदरौष्ठजङ्घादन्तकर्णेशृङ्गाच्च (पा.सू. ४/१/५५)

नासिकोदरौष्ठ ......... यत् स्वाङ्गवाचि उपसर्जनम् ।

i. पृच्छाय (वा)

संयोगोपधत्वेऽपि पुच्छशब्दात् ङीष् एव । सुपुच्छी ।

ii. कवरमणिविषशरेभ्यो नित्यम् (वा)

कवरादिभ्यः परो यः पुच्छशब्दः तदन्तात् नित्यं ङीष् । मणिपुच्छी, शरपुच्छी ।

iii. उपमानात् पक्षाच्च पुच्छाच्च (वा)

उपमानात् परौ यौ पक्षपुच्छशब्दौ तदन्तात् ङीष् । ऊलूकपक्षी, ऊलुकपुच्छी ।

४. न क्रोडादिबह्वचः (पा.सू. ४/१/३७)

स्वाङ्गवाचिन उपसर्जनात् ये क्रोडादयः बह्वचश्च तदन्तात् प्रातिपदिकात् स्त्रियां ङीषा न भवति । कल्याणक्रोडा, पृथुजघना ।

५. सहनञ्विद्यमानपूर्वाच्च (पा.सू. ४/१/३७)

सह, नञ्, विद्यमाना इत्येवं पूर्वात् उपसर्जन स्वाङ्गशब्दान्तात् प्रातिपदिकात् स्त्रीयाम् ङीष् न । स्वाङ्गाच्चोपसर्जनात (४/१/५४) नासिकोदरौष्ठ (४/१/५५) इति ङीष् प्राप्तः प्रतिषिध्यते । उदा. सहकेशा, सकेशा, अकेशा, विद्यमानकेशा, सनासिका ...... ।

६. नखमुखात् संज्ञायाम् (पा.सू. ४/१/५८)

संज्ञायां विषये नखान्तात् मुखान्ताच्च प्रातिपदिकात् स्त्रियां ङीष् न ।

'स्वाङ्गाच्चोपसर्जनात्' इति ङीष्प्राप्त: तत्प्रतिषिध्यते । उदा. शूर्पणखा, गौरमुखा, कालमुखा ।

७. दीर्घजिह्वी च च्छन्दसि (४/१/५९)

'दीर्घजिह्वी' शाब्दो ङीषन्त: स्त्रियां छन्दसि विषये निपात्यते । जिह्वाशब्द: स्वाङ्गवाची संयोगोपध: 'स्वाङ्गाच्चोपसर्जनात्' इति ङीष् न प्राप्यते इत्याशय: ।

IV. **निर्द्दिष्टपूर्वपद / उत्तरपदग्रहणपूर्वकशब्दसंस्थापनपुरस्सरं विवक्षा प्रकृति:**

१. क्रीतकरणपूर्वात् (पा.सू. ४/१/५०)

करणपूर्वात् कीतशब्दान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति । उदा. वस्त्रेण क्रीता या सा = वस्त्रक्रीती ।

२. क्तादल्पाख्यायाम् (पा.सू. ४/१/५१)

करणपूर्वात् क्तान्तादनुपसर्जनात् प्रातिपदिकादल्पाख्यायां गम्यमानायां ङीष् ।

उदा. अभ्रविल्प्ती, सूपविलिप्ती ।

३. बहुव्रीहेश्चान्तोदात्तात् (पा.सू. ४/१/५२)

बहुव्रीहे: क्तान्ताद् अन्तोदात्तात् प्रातिपदिकात् स्त्रियां ङीष् । शङ्खभिन्नी, केशलूनी ।

i. जातिपूर्वादिति वक्तव्यम् (वा) ऊरुभिन्नी ।

ii. जातान्तान्न (वा) ङीष् न भवति । दन्तजाता ।

iii. पाणिगृहिती भार्य्यायाम् (वा) पाणिगृहीत = पाणिगृहीती (भाष्ये)

पाणिगृहीतो = अन्यत्र ।

४. दिक्पूर्वपदान्ङीप् (पा.सू. ४/१/६०)

दिक्पूर्वपदा प्रातिपदिकात् स्त्रियां प्राङ्मुखं यस्या: सा प्राङ्मुखी, प्राङ्मुखा ।

५. वाहन्तादनुपसर्जनात् प्रातिपदिकात् छन्दसि विषये स्त्रयां ङीष् । उदा. दित्यौही ।

६. पाककर्णपर्ण पुष्पफलमूलवालोत्तरपदाच्च (पा.सू. ४/१/६४)

ओदनपाकी, शालपर्णी, शङ्खपुष्पी, दर्भमूली ।

V. **गणनिर्देशपुरस्सरं विवक्षिता प्रकृति:**

१. षिद्गौरादिभ्यश्च (पा.सू. ४/१/४१)

ष् इत् यस्य = षित् , गौर आदिर्येषां ते गौरादय: । षिद्भ्य: प्रातिपदिकेभ्य: गौरादिभ्यश्च प्रातिपदिकेभ्य: स्त्रियां ङीष् प्रत्ययो भवति । उदा.

षिद्भ्य: = नर्त्तकी, खनकी, रजकी, गार्ग्यायिणी, वात्स्यायनी ।

गौरादिभ्य: = गौरी, मत्सी, मनुषी, हयी, द्रोणी इत्यादय:

गौर, मत्स्य, मनुष्य, शृङ्ग, पिङ्गल, हय, गवय, मुकय, ऋष्य, द्रोण, हरिण, वदर, शार्कर, कोष्टु, मातामह, पितामह ....... प्रभृतय: शब्दा: ।

२. बह्वादिभ्यश्च (पा.सू. ४/१/४५)

बह्वादिभ्योऽनुपसर्जनेभ्यः प्रातिपदिकेभ्यः स्त्रियां विकल्पेन ङीष् प्रत्ययो भवति ।

उदा. बहु = बह्वी, बहुः ।

बहु, पद्धति, अञ्चति, अङ्कति, अर्हति, चण्ड, कृपण, कमल, विकट, विशाल, विशङ्कट, कल्याण, उदार इत्यादः । अयं खल्वाकृतिगणः ।

३. नित्यं छन्दसि (पा.सू. ४/१/४६)

बह्वादिन्यः अनुपसर्जनेभ्यः प्रातिपदिकेभ्यः छन्दसि विषये स्त्रियां नित्यं ङीष् प्रत्ययो भवति । बहु = बह्वी ।

४. भुवश्च (पा.सू. ४/१/४७)

छन्दसि विषये स्त्रियाम् अनुपसर्जनात् भुवः प्रातिपदिकात् नित्यं ङीष् प्रत्ययो भवति ।

विभु = विभ्वी प्रभु = प्रभ्वी सम्भु = सम्भ्वी ।

## VI. वर्णनिर्देशपुरस्सरं विवक्षिता प्रकृतिः

१. वोतो गुणवचनात् (पा.सू. ४/१/४४)

उकारान्तात् गुणवचनात् अनुपसर्जनात् प्रातिपदिकात् स्त्रियां वा ङीष् प्रत्ययो भवति ।

मृदु = मृद्वी, मृदुः । पटु = पट्वी, पटुः । गुणस्य लक्षणम्

सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्य सोऽसत्त्वप्रकृतिर्गुणः ।।

गुणवचनाभावे ङीष् न भवति, यथा आखुः = कृपणः अस्य गुणवाचकत्वाभावात् ङीष् न ।

२. इतो मनुष्यजातेः (४/१/६५)

मनुष्यजातिवाचिनोऽनुपसर्जनाद् इकारान्तात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति ।

उदा. दाक्षि = दाक्षी ।

## VII. प्राचां मतेन विवक्षिता प्रकृतिः

१. शोणात् प्राचाम् (पा.सू. ४/१/४३)

अनुपसर्जनात् शोणात् प्रातिपदिकान् प्राचाम् आचार्य्याणां मतेन ङीष् प्रत्ययो भवति ।

शोण = शोणी, शोणा ।

## VIII. निर्दिष्टार्थबन्धनपुरस्सरं निर्दिष्टशब्दोपपादनपूर्वकविवक्षिता प्रकृतिः

१. जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमात्रावपनाकृत्रिमा श्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु (पा.सू. ४/१/४२)

जानपद, कुण्ड, गोण, स्थल, भाज, नाग, काल, नील, कुश, कामुक, कवर इत्येते शब्दाः यथासंख्यं भवन्ति एते अर्थाः वृत्ति, अमत्र, आवपन, अकृत्रिमा, श्राणा, स्थौल्यवर्ण, अनाच्छादन, अयोविकार, मैथुनेच्छा, केशवेश तत्र प्रत्येकं विचारे स्त्रीत्वे ङीष्प्रत्ययो भवति ।

उदा. अकृत्रिमा भूमिः स्थली, कृत्रिमा भूमिः स्थला इत्यादयः प्रयोगाः ।

i. नीलादोषधौ प्राणिनि च (वा)

नीलात् अनाच्छादनेऽपि भवन् ङीष् ओषधौ प्राणिनि चैव स्यात् न त्वन्यत्रेत्यर्थ ।

नील = नीली, इति ।

ii. संज्ञायां वा (वा)

संज्ञायां विषये विकल्पेन ङीष् प्रत्ययः । नील = नीली, नीला ।

IX. **निपातनसिद्धव्यवस्थायाः कृते विवक्षिता प्रकृतिः**

१. सख्यशिश्वीति भाषायाम् (पा.सू. ४/१/६२)

सखी अशिखी इत्येतौ शब्दौ ङीषन्तौ भाषायां विषये स्त्रियां निपात्येते ।

**स्वावलोकनप्रश्नाः**

१. ङीष्प्रत्ययविधानार्थं कति सूत्राणि सन्ति ?

२. 'पुंयोग'शब्दस्य कः अर्थः ?

३. आख्यायामित्यत्र किमात्मिका सप्तमी ?

४. सूर्य्यस्य देवता स्त्री इति तात्पर्य्ये किं रूपम् ?

५. यवनानां लिपिः इति तात्पर्य्ये निष्पन्नं रूपं किम् ?

६. आचार्य्यास्य स्त्री इत्यत्र किं रूपम् ?

७. का नाम जातिः ?

८. 'हय'शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

९. मुदु शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

१०. स्थला / स्थली इत्यनयोः को भेदः ?

११. मनुष्यशब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?

## ६.५. स्त्रीत्वविवक्षायां 'ङीन्'प्रत्ययः

ङीप्–ङीष्–ङीन् इति त्रयः प्रत्ययाः । तेषु ङीन् इति एकः । एतस्मात् 'ङ्', 'न्' इति इत्सञ्ज्ञालोपाभ्यामपहारः । ईमात्रमवशिष्यते । अनुबन्धकरणं स्वरे विशेषः । एतदर्थं कौमुद्यामेकमेव सूत्रम् । किमपि वार्त्तिकवचनं नास्ति । तथाहि

१. शार्ङ्गरवाद्यञो ङीन् (पा.सू. ४/१/७३)

शार्ङ्गरव आदिर्येषां ते शार्ङ्गरवादयः, शार्ङ्गरवादयश्च अञ् च शार्ङ्गरवाद्यञ् तस्मात् = शार्ङ्गरवाद्यञः । अनुपसर्जनात्, स्त्रियाम् प्रातिपदिकात्, प्रत्ययः, परश्च इत्यनुवृत्त्या–ऽधिकारेण चोपस्थितिः । पुनश्च 'जातेरस्त्रीविषयादयोपधात्' (४/१/६३) इति मण्डूकप्लुत्या उपतिष्ठते । अतः जातिवाचिभ्योऽनुपसर्जनेभ्यः शार्ङ्गरवादिभ्योऽञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन् प्रत्ययो भवति । शार्ङ्गरवी, कापटवी, वैदी, और्वी । इति ।

शार्ङ्गरवादिगणः शार्ङ्गरव, कापटव, मौञ्जायन, गौग्गुलव, ब्राह्मण, वैद, गौतम, कामण्डलेय, ब्राह्मणकेतेय, आनिधेयः, आशोकेय, वात्स्यायन इत्यादः शब्दाः पठिताः ।

i. नृनरयोर्वृद्धिश्च (ग.५४) वृद्धिकार्य्यं ङीन्प्रत्ययः । नारी ।

**स्वावलोकनप्रश्नाः**

१. ङीन्प्रत्ययविधानार्थं कति सूत्राणि सन्ति ?

२. वैदी इति सिद्धये कः स्त्रीप्रत्ययः ?

## ६.६. सारांशः

स्त्रीत्वविवक्षायां ङीप्, ङीष्, ङीन् इति प्रत्ययानां विधानविवेचनं विहितम् । शब्दानां वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये इमे प्रत्ययाः भवन्ति । एतेषां प्रत्ययानां कृते ५६ सूत्राणि २८ वार्त्तिक-वचनानि एकमेव सूत्रं प्रवर्त्तन्ते । प्रकृतिनिर्देशार्थं विभिन्नाः उपायाः ये अवलम्बिताः तेषां विषये आकलनं विहितम् । साक्षात्प्रातिपदिकनिर्देशः, पुंयोगः, जातिवाचकता, अनुबन्धनिर्देशः, वर्णनिर्देशः, समासग्रहणम्, अङ्गवाचकशब्दग्रहणम्, पूर्वपद / उत्तरपदग्रहणपूर्वकशब्दसंस्थापनम् इत्यादीनां विषये उपस्थापनं विषयीकृतम् । प्रत्ययेषु तेषु त्रिषु अनुबन्धनिर्देशः परस्परं पृथकताप्रतिपादनम्, पुनश्च स्वरसञ्चरणं भवति उद्देश्यम् ।

## ६.७. आदर्शप्रश्ना:

**I. निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)**

१. स्त्रीत्वविवक्षायां विधीयमानानां ङीप्–ङीष्–ङीन् प्रत्ययानां विषये विवरणं विधेयम् ?

२. स्त्रीत्वविवक्षायां ङीप्प्रत्यविधानार्थं प्रतयनिर्देशपुरस्सरं प्रकृते: निर्देशविधायकानां सूत्राणां विवरणं देयम् ?

३. ङीष्प्रत्ययविधानार्थम् अङ्गवाचकशब्दग्रहणपुरस्सरं प्रकृतिनिर्देशविधायकानां सूत्राणां विवरणं देयम् ?

४. 'जानपदकुण्डगोण ..... इत्यादिसूत्राणां प्रत्येकमुदाहरणं देयम् ?

**II. विश्लेषणात्मकप्रश्ना: (प्रत्येकं १२/१० अङ्का:)**

१. 'ऋन्नेभ्य: ङीप्' इति सूत्रव्याख्यानं विधाय तस्य विकल्पविधानस्थलं निषेधस्थलञ्चोपस्थापयत ?

२. 'द्विगो:' इति सूत्रस्य व्याख्यानं विधाय तस्य विकल्पविधानस्थलं निषेधस्थलञ्च प्रतिपादयत ?

३. 'इन्द्रवरुण' ..... इत्यादिसूत्रमुपस्थाप्य प्रत्येकमेकैकमुदाहरणं देयम् ?

४. 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रस्य व्याख्यानं विधाय तस्य विकल्पविधानस्थलं निषेधस्थलञ्च प्रतिपादयत ?

५. अनुपसर्जनाधिकारस्य तात्पर्य्यं लिखत ?

६. 'वर्णादनुदात्तात्तोपधात्तो न:' इति सूत्रस्य व्याख्यानं विधाय तत्रत्यवार्त्तिकवचनानां तात्पर्य्यं प्रकटयत ?

**III. लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)**

१. 'वनो र च' इति विषये टिप्पणी प्रदेया ?

२. 'वयसि प्रथमे' इति सूत्रं पर्य्यालोचयत ?

३. को नाम जाति: ?

४. का नाम गुण: ?

५. गोपी / गोपा इति साधनप्रकारमुपस्थापयत ?

६. क्षत्रियाणी / क्षत्रियी / क्षत्रिया इति रूपसाधनं निर्दिशत ?

७. 'शार्ङ्गरवाद्यञो ङीन्' इति सूत्रस्य व्याख्यानं विधेयम् ?

८. सूरी / सूर्य्या इति रूपद्वयं विचारयत ?

९. 'पादोऽन्यतरस्याम्' इति सूत्रस्य व्याख्या विधेया ?

१०. मनायी / मनावी इति रूपद्वयं विचारयत ?

IV. **एकाङ्कप्रश्ना: (प्रत्येकं १ अङ्क:)**

१. कौमुद्यां स्त्रीत्वविवक्षाया: कृते ङीप्प्रत्ययविधायकानि कानि सूत्राणि वर्त्तन्ते ?
२. कौमुद्यां स्त्रीत्वविवक्षाया: कृते ङीष्प्रत्ययविधायकानि कानि सूत्राणि सन्ति ?
३. कौमुद्यां ङीन्प्रत्ययविधायकानि सूत्राणि कानि ?
४. 'ऋ'कारान्तशब्दस्य स्त्रीत्वविवक्षायां ङीप्प्रत्ययविधायकं सूत्रं किम् ?
५. 'यशस्विन्'शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?
६. 'वनो र च' इति सूत्रे 'र' इति किं विभक्त्यन्तं पदम् ?
७. ऐन्द्री इत्यत्र क: स्त्रीप्रत्यय: ?
८. तरुण इत्यस्य स्त्रीत्वविवक्षायां किं रूपम् ?
९. 'त्रिफल' इत्यस्य स्त्रीत्वविवक्षायां किं रूपम् ?
१०. बहव: राजान: यस्यं सभायामिति तात्पर्य्ये किं रूपद्वयम् ?
११. बधूट् + ङीप् = बधूटी ङीप्प्रत्यय: केन विधीयते ?
१२. पुंयोगशब्दस्य क: अर्थ: ?
१३. आख्यायामित्यत्र किमात्मिका सप्तमी ?
१४. सूर्य्यस्य देवता स्त्री इति तात्पर्य्ये किं रूपम् ?
१५. मृदुशब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?
१६. 'मनु'शब्दस्य स्त्रीत्वविवक्षायां किं रूपम् ?
१७. का नाम स्थला ?
१८. 'मत्स्य' शब्दस्य स्त्रीत्वे किं रूपम् ?
१९. 'वैदी' इति सिद्धये क: स्त्रीप्रत्यय: ?
२०. 'घोटक'शब्दस्य स्त्रीत्वे किं रूपम् ?

## ६.८. एकाङ्कप्रश्नानामुत्तराणि

१. २९, २. २६, ३. ०१, ४. ऋन्नेभ्य: ङीप् ५. यशस्विनी ६. लुप्तप्रथमान्तम् ७. ङीप् ८. तरुणी ९. त्रिफला १०. बहुराज्ञी, बहुराजा ११. वयस्य चरम इति वाच्यम् १२. पुरुषसम्बन्ध: १३. पञ्चम्यर्थे सप्तमी १४. सूर्या १५. मृद्वी, मृदु १६. मनायी, मनावी १७. अकृत्रिमा भूमि १८. मत्सी १९. ङीन् २०. घोटकी ।

*******

## ।। सप्तमखण्डः ।।

## कारकलक्षणविचारपूर्वकं कारकविभक्तीनाञ्च सामान्यकथनम्

### ७.१. प्रस्तावना

अभिव्यक्तिसाधने भाषा यत् प्रायोगिकं स्वरूपमाधत्ते, तच्छास्त्रकाराः वाक्यमिति परिचिन्वन्ति । तत्र विवक्षानुरोधात् सजातीयविजातीयक्रमेण पारिभाषिकपदानि आनुशासनिकपदानि वा प्रादुर्भवन्ति । अन्यथा मार्गेण तत् सुबन्तपदं तिङन्तपदञ्चेति भावेन व्याकरणजगतः परिचयमवाप्य आवर्त्तते यस्योपायस्य परिशीलनं कर्त्तुमिच्छता शास्त्रकृता सुप्तिङ्चयं वाक्यमिति एकतिङ् वाक्यमिति वा विभिन्नेन मार्गेण उपायेन वा विमृश्य उपस्थापयन्ति । यदस्तु वाक्ये अनेकेषां सजातीयविजातीयपदानां समन्वयः स्थिरीकृतं दृश्यते । स च सम्बन्धः यथार्थदिशा पदपदान्तरवर्त्मना च क्रियाकारकरूपः । एकं क्रियापदं, तदाधारेण अन्येषां विवक्षितानां पदानां सन्धानं तत्र विधौ प्रवर्त्तते । क्रियापदस्य प्रक्रियात्मकं यत् तात्पर्य्यं तस्मात् सकाशात् विवक्षानुरोधात् पदानां समावेशः समुदीयते । धातुना तत् समभिव्याहारत्वेन तिङ्प्रत्ययेन च योगेन सम्बन्धितानि कारकान्वितानि पदानि आनयन्ति । कर्त्तृपदम्, कर्मपदम्, तत् सन्नियोगेन पदान्तराणामागमनमिति एवं भावेन प्रतिपीप्सामादाय वाक्यस्यैव शब्दशास्त्रविचारकोटौ आगमनमवधीयते । तस्यामेव प्रक्रियायां संरचनात्मिकायां वाक्यकल्पनायं यः सम्बन्धः वितनुते तदेव कारकरूपम् । क्रियान्वयित्वम्, क्रियाजनकत्वम्, क्रियानिवर्त्तकत्वम्, करोतीति इति भावेन बहूनि लक्षणानि तस्य प्रवर्त्तन्ते । पाणिनौ तदर्थमेकमेवाधिकारसूत्रम् 'कारके' इति । तानि षट् कारकाणि कर्त्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरणभेदेन सप्तविभक्तयः भवन्ति, प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीभावेन । कर्मप्रभृतीनां प्रत्येकं कारकस्य कृते एका विभक्तिः निर्द्दिष्टा विद्यते । कर्त्तृकारके तृतीयाविभक्तिः, कर्मकारके द्वितीयाविभक्तिः, करणकारके तृतीयाविभक्तिः, सम्प्रदानकारके चतुर्थीविभक्तिः, अपादानकारके पञ्चमीविभक्तिः, अधिकरणकारके सप्तमीविभक्तिः । षष्ठीविभक्तेः 'कर्त्तृकर्मणोः कृतिः' इत्यादिसूत्रद्वारा यत्र विधानं तत्र षष्ठीविभक्तेः कारकत्वमस्ति । प्रथमाविभक्तिः 'अर्थे प्रथमा' इति विचारेण विधीयते अस्याः कारकत्वं नास्ति । कर्मप्रभृतीनां कारकाणां संज्ञा निरूप्यते । तदुद्देश्येन द्वितीयादिविभक्तयः उपपद्यन्ते । कर्मादिसंज्ञा द्वितीयादिविभक्तिप्रयोजिका । उपपदप्रयोगपुरस्सरं विभक्तिविधाने अन्यः कश्चनोपायः प्रतिष्ठते । उपपदं क्रियया सह साक्षात् सम्बन्धितं न विद्यते ।

सिद्धान्तकौमुद्यां तदर्थं सूत्राणि वार्त्तिकवचनानि प्रतिकारकमुपलब्धानि विद्यन्ते ११० सूत्राणि ३७ वार्त्तिकवचनानि । तथाहि

१. प्रथमाविभक्तिः सूत्राणि ०२ वार्त्तिकानि

| | | | | | |
|---|---|---|---|---|---|
| २. | द्वितीयाविभक्तिः | सूत्राणि | २३ | वार्त्तिकानि | १२ |
| ३. | तृतीयाविभक्तिः | सूत्राणि | १० | वार्त्तिकानि | ०२ |
| ४. | चतुर्थीविभक्तिः | सूत्राणि | १७ | वार्त्तिकानि | ०७ |
| ५. | पञ्चमीविभक्तिः | सूत्राणि | २० | वार्त्तिकानि | ०५ |
| ६. | षष्ठीविभक्तिः | सूत्राणि | २६ | वार्त्तिकानि | ०६ |
| ७. | सप्तमीविभक्ति | सूत्राणि | १५ | वार्त्तिकानि | ०५ |
| | | सूत्राणि | ११० | वार्त्तिकानि | ३७ |

'विभक्तिः' इति पारिभाषिकशब्दः । 'तिङश्च' इति सूत्रेण सुपां तिङाञ्च विभक्तिसंज्ञा विधीयते । तद्धितप्रकरणे 'प्राग्दिशो विभक्तिः' इति सूत्रं तदर्थं विद्यते किन्तु तेन प्रातिपदिकसिद्धौ अपेक्षितं प्रक्रियात्मकं कार्य्यं साध्यते । इदं सूत्रं तु पदनिष्पत्तये अपेक्षितायाः विभक्तेः ज्ञानार्थमुद्दिष्टम् । सुवन्तपद-निष्पत्तये सुप् इति विभक्तिः । तिङन्तपदनिष्पत्तये 'तिङ्' इति विभक्तिः । कारकप्रकरणस्य कृते सुप्विभक्तेरुपादेयता । विभक्तिविधाने संज्ञा प्रयोजिका भवतीति सिद्धान्तं पुरस्कृत्य कारकस्य विचारः, तत्प्रयोजिकायाः विभक्तेर्विधानमिति प्रकरणस्यास्य प्रक्रियात्मकं कार्य्यम्, प्रकरणेऽस्मिन् विधानात्मकं कार्य्यत्रयम् १. कारकसंज्ञां पुरस्कृत्य विभक्तिविधानम् २. उपपदं पुरस्कृत्य विभक्तिविधानम् ३. आचार्य्यव्यवहारात् विभक्तिविधानम् ।

सूत्रतात्पर्य्यसाधने पाणिनीयं सर्वं कौशलमनुवृत्त्यधिकारादिसंघटनम्, वैकल्पिकोप-पादनञ्च प्रवृत्तं दृश्यते ।

## ७.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

. वाक्यनिर्माणे कारकस्य उत्थापनं ज्ञास्यन्ति ।
. कारकस्य संज्ञां परिचिन्वन्ति ।
. कारकस्य संख्यां ज्ञास्यन्ति ।
. कारकसंज्ञायां फलममवगमिष्यन्ति ।
. कारकं विभक्तिश्च इति द्वयमवगमिष्यन्ति ।
. विभक्तिसंज्ञा विभक्तिसंख्या इत्युभयमवगमिष्यन्ति ।
. विभक्तिविधानव्यवस्थां ज्ञास्यन्ति ।
. सुब्विभक्तिविधाने भेदद्वयम् (कारकविभक्ति, उपपदविभक्तिः) अवगमिष्यन्ति ।
. प्रथमाविभक्तिः तस्याः विधानं ज्ञास्यन्ति ।
. प्रथमाविभक्तेः कारकविभक्तित्वविचारवगमिष्यन्ति ।

## ७.३. वाक्यसंघटने कारकस्योत्थापनम्

अभिव्यक्तिसाधने उपदिश्यमानेषु बहुषु उपायविशेषेषु सर्वोक्तृष्टा सुस्पष्टा सुसमृद्धा च माध्यमविशेषा इति विचार: । अयं माध्यम: सर्वानतिरिच्य अवधेयं स्वरूपमादधाति । तस्या: यत् प्रायोगिकं स्वरूपं तद् वाक्यमिति वैयाकरणानां विवेचनम् । वाक्यस्य संघटनस्वरूपं लक्षीकृत्य शास्त्रकारा: 'सुप्तिङ्चयं वाक्यम्', 'एकतिङ् वाक्यम्', 'साव्ययं सकारकं सविशेषणं वाक्य'मिति इति प्रतिपादयन्ति । तत्र स्वरूपे अनेकेषां सजातीयविजातीयपदानां समन्वय: स्थिरीकृतं दृश्यते । तेषु पदेषु य: सम्बन्ध: स क्रियाकारकरूप: । क्रियापदस्य आचारेण अन्येषां विवक्षितानां पदानां उपस्थितिरुपजायते । क्रियापदे प्रक्रियात्मकतात्पर्य्यात् व्यापार:, फलं, कर्त्ता, कर्म, संख्या, कालश्चैते अर्था: अभिधेया: जायन्ते । धातुना तत्समभिव्याहारत्वेन तिङ्प्रत्ययेन च योगेन सम्बन्धितानि कारकान्वितानि पदानि आविर्भवन्ति । कर्त्तृपदम्, कर्मपदम्, तत्सन्नियोगेन पदान्तराणामागमनमिति एवं भावेन प्रतिपीप्सामादाय वाक्यस्यैव शाब्दशास्त्रविचारकोटौ आगमनमवधीयते । तस्यामेव प्रक्रियायां सञ्चरनात्मिकायां वाक्यकल्पनायां य: सम्बन्ध: वितनुते तदेव कारकरूपम् । क्रियया सह कर्त्तृकारकं कर्मकारकं करणकारकं सम्प्रदानकारकं, अपादानकारकं, अधिकरणकारकञ्च पदमन्वयं कल्पयन्ति । प्रथमत: तेषां पदानां कर्त्तृकर्मादिसंज्ञाविचार: ततश्च तत्प्रयोजिकाया: विभक्तेर्विधानम् । विभक्ते: विधानात् पूर्वं पदे का संज्ञा निरूप्यते ?

**स्वावलोकनप्रश्नाः –**

१. किं नाम वाक्यम् ?

२. वाक्ये प्रयुक्तानां पदानां मध्ये य: सम्बन्ध: स किम्भूत: ?

३. एकस्मात् क्रियापदात् के अर्था: प्रतिपादिता: भवन्ति ?

४. विभक्ते: विधानात् पूर्वं का संज्ञा निरूप्यते ?

## ७.४. कारकस्य संज्ञा

कारकमिति पारिभाषिकं निर्वचनम्, टि, घु इत्यादिवत् संज्ञावाचकं पदम् । संज्ञाबोधकं पारिभाषिकं पाणिनीयं पदोपकल्पनम्, किन्तु तस्य निर्वचनार्थं किमपि सूत्रात्मकं संघटनं न कृतम् । केवलं 'कारके' इत्यधिकारसूत्रबलेन अष्टाध्याय्यां तस्यागमनं साधितम् । यतो हि पाणिनीयकाले तस्य पदस्यार्थबोधते कार्य्यसाधने च लोके प्रसिद्धिरासीत् । यस्य विवेचनाय वचनस्य कस्यचित् आवश्यकता नोपगता । अनेकेषां पारिभाषिकपदानामभिनिवेश: । विना संज्ञासंज्ञिभावपुरस्सरमष्टाध्याय्यां पाणिनिना

साधितम् । 'कारके' इत्यनेन यच्छास्त्रीयं महत्त्वं तदेव सूत्रकार अङ्गीकरोति । 'कारक' इत्यधिकारे येषां सूत्राणां विन्याशो विहितस्तदेव कारकसंज्ञां विभिन्नामावहति । परवर्त्तिनि काले शास्त्रकारा: कारकस्यानेकविधं लक्षणं विचारितवन्त: ।

१. क्रियानिमित्तत्वं कारकत्वम् ।
२. क्रियान्वयित्वं कारकत्वम् ।
३. क्रियानिष्पादकत्वं कारकत्वम् ।
४. क्रियानिवर्त्तकत्वं कारकत्वम् ।
५. क्रियजनकत्वं कारकत्वम् ।
६. शक्ति: कारकम् ।

एषु महाभाष्ये साधनं निवर्त्तकं कारकसंज्ञां भवतीति भाष्यकारीय: सिद्धान्त: । य: क्रियाया: साधक: क्रियासम्पादिता वा येन भवति तदेव कारकम् । करोतीति कारकम् अन्वर्थसंज्ञा विज्ञायते 'कारके' इति सूत्रसन्दर्भे भाष्यकृता उपस्थापनम् । लक्षणानि यानि अधिगतानि भवन्ति, सर्वत्रातिव्याप्ति: अव्याप्ति: दोषविचार: प्राप्यते । यथा क्रियान्वयित्वमिति स्वीकारे 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इति ब्राह्मणस्यापि कारकतापत्ति: । अन्वयपरम्परासम्बन्धेन साक्षाद्वा अनुष्ठीयते येन ब्राह्मणस्येति पदस्य परम्परा सम्बन्धेन क्रियान्वयात्कारकतापत्ति: । यदस्तु भट्टोजिदीक्षितेन कारकमिति अन्वर्थसंज्ञा इति स्वीकृतम् । करोतीति कारकम् । एवञ्च कारकशब्द: क्रियापर: । करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्ते: । अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थित्या क्रियान्वयित्वमेव तत्संज्ञा विधीयते । क्रियान्वयमात्रं विवक्षितमिति तद्भाव: । तदुक्त्या ''क्रियान्वये सत्येव हि कारकसंज्ञा'' । ब्राह्मणस्य पुत्र: पन्थानं पृच्छति इति वाक्ये ब्राह्मणस्य कारकत्वं नोपजायते । ब्राह्मणपुत्रं विशेषणं न तु क्रियान्वयी । 'क्रियाजनकत्वं कारकत्वम्' इति विचारे एतन्मतं न गृहीतम् विद्यते । तथाह्युक्तं शब्दकौस्तुभे अन्वर्था चेयं संज्ञा करोतीति कारकम् । ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इह ब्राह्मण: पुत्रविशेषणं न तु क्रियान्वयी । सिद्धान्तकौमुद्याम् एतद्विधस्य लक्षणस्य विषये काचित् चर्चा न विद्यते । केवलं 'कारके' इति अधिकारसूत्रभावेन व्याख्यानं कृतम् । 'अधिकृत्य' इति शब्देन उत्तरत्र कारके अपादानादिविशेषसंज्ञाभि: सह तस्य समावेश इत्येतन्मतम् । 'कारके' इति प्रथमार्थे सप्तमी । प्रतिसूत्रं वाक्यं भित्त्वा कारकसंज्ञा विधीयते । क्रियान्वयी काकसंज्ञां लभते इति दीक्षितस्य मतम् । 'क्रियाजनकत्वं कारकत्वम्' इति लक्षणे तस्य सहमतता नास्ति । कारकशब्द: योगरूढ: ।

**स्वावलोकनप्रश्नाः**

१. कारकशब्द: रूढो योगरूढ: वा ?

२. कारकस्य लक्षणं किम् ?

३. कारक इति बोधनाय अधिकारसूत्रं किम् ?

४. भाष्यकार: कारकस्य किं लक्षणं निर्माति ?

५. भट्टोजिदीक्षितमते कारकस्य लक्षणं किम् ?

६. कारके इति पदे कस्मिन्नर्थे प्रथमा ?

७. कारकम् इति अन्वर्थसंज्ञा इति कस्य मतम् ?

## ७.५. कारकस्य संज्ञा

कारकाणि षट् इति प्रतिपादनं कृतं दृश्यते । कर्तृ–कर्म–करण–सम्प्रदान–अपादान–अधिकरणभेदेन शब्दकौस्तुभे प्रौढमनोरमायां तदेव गृहीतं विद्यते । शब्दकौस्तुभे उक्तं विद्यते तेनैतत् अधिकारोक्तं तत्रादि षटकमेव गृह्यते । रामाज्ञापाण्डेप्रभृतयो विदुषां नये कारकाणि चत्वारि भवन्ति । कर्त्तृ–कर्म–करण–अधिकरणभेदेन । तन्मतेन सम्प्रदानापादानयो: कारकत्वं नास्ति । कारकशब्दोपपादक: कृधातुरित्यस्य तत्र उपस्थितेरभावात् एवञ्च साक्षात्क्रियान्वयभावाच्च । यत्कारकं भवति तदवश्यं कर्त्ता भवितुमर्हति । यथा कर्म–करण–अधिकरणानि अविवक्षया ओदन: स्वयमेव पच्यते, असि छिन्नति, स्थाली पचति इत्यादौ कर्त्तृत्वं भजन्ते । सम्प्रदानापादाने क्वचिदप्यविवक्षया एवं भूत: प्रयोग: न भवति । सिद्धान्तकौमुद्यां कारकाणि षट् इति यद्यपि नोक्तं, तथापि कर्मादिक्रमेण विवेचनात् तेषां संख्या षट् इति निरूपणीया जायते ।

**स्वावलोकनप्रश्नाः**

१. कारकाणि कति ?

२. सम्प्रदानापादानयो: कारकत्वं अस्ति न वा ?

३. प्रत्येकं कारकस्यानभिहितत्वे किं कारकमुपदिश्यते ?

४. कानि षट् कारकाणि ?

## ७.६. कारकसंज्ञाया: फलम्

क्रियान्वयित्वं कारकत्वं इति विचारात् निष्पत्तिमात्रे कारकत्वं प्रतिपद्यते । ततश्च तात्पर्यवशात् कर्मकरणादिकारकाणां विवेचनाप्रसङ्ग: । प्रथमतया कारकत्वं ततश्च कर्मकरणादिसंज्ञानां व्यवस्थाविधानम् । अतोऽयं निश्चय: कारकस्य निष्पत्तेरनन्तरं कर्मकरणादिकारकाणां विधानम् । कर्मादिसंज्ञाद्वारा कारकं समन्वितं सत् कर्मकारकं करणकारकं चेति भावेन विधानं प्रतिपत्तिर्वा आगच्छति । कारकसंज्ञाया: तदेव फलम् यत् कर्मादिकारकनिष्पत्तिमात्रे प्रतिपादकम् । कर्मादिकारकाणां कृते कारकसंज्ञा मूलभूता इत्यसंशयम् । कारकसंज्ञायां जातायां सत्यां कर्मादि-कारकाणामुत्पत्तिरुपपत्तिश्च । कर्मादिकारकसंज्ञाया: फलन्तु द्वितीयादिविभक्तीनामुत्पत्ति: ।

कर्तृकारके तृतीयाविभक्ति: ।
कर्मकारके द्वितीयाविभक्ति: ।
करणकारके तृतीयाविभक्ति: ।
सम्प्रदानकारके चतुर्थीविभक्ति: ।
अपादानकारके पञ्चमीविभक्ति: ।
अधिकरणकारके सप्तमीविभक्ति: ।

कर्तृकर्मकारकयो: कृद्योगे षष्ठीविभक्तिरपि विधीयते । जाति-व्यक्ति-लिङ्ग-संख्या-कारकं-पञ्चकं प्रातिपदिकार्थ: इति विचारात् कारकमपि प्रातिपदिकार्थ: । तस्य विभक्तिविधानद्वारा द्योतनं क्रियत इति भाव: ।

**स्वावलोकनप्रश्नाः**

१. क्रियानिष्पत्तिमात्रे किं भवति ?

२. कर्मादिसंज्ञाविचारात्पूर्वं का संज्ञा अनुष्ठीयते ?

३. कर्मादिकारकसंज्ञाया: फलं किम् ?

४. विभक्ति: कारकाणां वाचिका द्योतिका वा ?

५. कर्तृकारके का विभक्ति: विधीयते ?

६. कर्तृकर्मणो: कृद्योगे का विभक्ति: भवति ?

## ७.७. कारकं विभक्तिश्च

'विभक्तिविधाने संज्ञाप्रयोजिका भवति' इति नियमः । उभयोः प्रयोज्यप्रयोजकभाव-सम्बन्धः । विभक्तिः प्रयोज्या भवेच्चेत् कारकं प्रयोजकं भवति । कारकसंज्ञां निमित्तीकृत्य विभक्तिरुत्पद्यते । विभक्तिः सुब्विभक्तिभावेन प्रकृतप्रसङ्गे ज्ञेया । तासां विभक्तीनां सर्वथा धर्मिवाचकतवम्, न तु धर्ममात्रवाचकत्वम् । यतो हि 'कर्मणि द्वितीया' इति सूत्रे 'कर्मणि' इति पदं प्रयुक्तं न तु कर्मत्वे । महाभाष्ये ''सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्'' इति वचने कर्मादय इत्युपस्थापितम्, न तु कर्मत्वादयः । अर्थकल्पने विभक्तिद्वारा कारकार्थः स्फुटतया प्रतीतिमागच्छति ।

**स्वावलोकनप्रश्नाः**

१. कारकविभक्त्योः कः सम्बन्धः ?

२. कां संज्ञां निमित्तीकृत्य विभक्तिरुत्पद्यते ?

३. विभक्तीनां धर्मिवाचकत्वं धर्ममात्रवाचकत्वं वा ?

४. कारकार्थः केन स्फुटतया प्रतीतिमागच्छति ?

## ७.८. विभक्तीनां संज्ञा संख्या च

सुपां तिङाञ्च विभक्तिसंज्ञा विधीयते । सु औ जस् ...... इत्यतः ङि-ओ्-सुप् इति यावत् सुप् इति विभक्तिः । प्रातिपदिकात् इमाः उत्पद्यन्ते । तिप् - तस् - झि ....... इत्यतः ...... महिङ् इति यावत् तिङ् इति विभक्तिः । धातोः इमाः उत्पद्यन्ते । 'तिङश्च' (पा.सू. ५/३/५६) इति सूत्रेण तासां विभक्तिसंज्ञा विधीयते । सुबन्तपदस्य तिङन्तपदस्य च प्रतिपत्तये तासां प्रयोजनीयता विद्यते । 'सुप्तिङन्तं पदम्' इति तदर्थं सूत्रम् । 'प्राग्दिशो विभक्तिः' (पा.सू. ५/३/१) इति सूत्रेणापि विभक्तिसंज्ञा अवधीयते । तद्धितप्रकरणस्थप्रत्ययानां केषाञ्चित् प्रत्ययानां कृते सा संज्ञा । प्रातिपदिकनिष्पत्तये तासामेवोपयोगित्वम् । पाणिनीयसूत्रेषु विभक्तिशब्दः बहुधा प्रयुक्तः, यत्र विभक्तिपदेन सुप् इत्यस्य ग्रहणमिष्यते । तथाहि

१. अव्ययं विभक्तिसमीपसमृद्धि .......... (पा.सू. २/१/६) ।
२. प्राग्दिशो विभक्तिः (पा.सू. ५/३/१) ।
३. सावेकाचस्तृतीयादिविभक्तिः (पा.सू. ६/१/६८) ।
४. इकोऽचि विभक्तौ (पा.सू. ७/१/१३) ।

सुबन्तपदस्य कृते सु - औ - जस् इत्यतः आरभ्य ङि - ओस् - सुप् इति यावत् २१ (एकविंशतिः)

विभक्तय: वर्त्तन्ते । या: सुब्विभक्तय: इति नाम्ना विदिता: । तथैव तिङ् इत्यस्य कृते तिप् ..... महिङ् इति यावत् अष्टादश: (१८) विभक्तय: विज्ञायन्ते ।

**स्वावलोकनप्रश्नाः**

१. सुपां तिङाञ्च का संज्ञा विधीयते ?

२. सुपां तिङाञ्च विभक्तिसंज्ञाविधायकं सूत्रं किम् ?

३. विभक्तिसंज्ञाविधायकं सूत्रद्वयं किम् ?

४. पाणिनीयसूत्रेषु प्रयुक्त: विभक्तिशब्द: केन तात्पर्य्येण प्रयुक्त: ?

५. स्वादिविभक्तीनां संख्या कति ?

## ७.९. विभक्तिविधानव्यवस्था

प्रातिपदिकात् सुब्विभक्ति: विधीयते । क्रियान्वयात् कारकस्य निष्पत्ति: । ततश्च निर्दिष्टस्य कारकस्य कृते या विभक्ति: उद्दिष्टा विद्यते, तस्या: विधानं जायते । अपि च उपपदयोगेनाऽपि विभक्तिविधानं स्वीक्रियते । 'अनभिहिताधिकार:' तत्कृते यो विहित: तदेवादाय विभक्ति: निर्दिष्टतया विधीयते । अनभिहिते कर्मणि द्वितीया, अभिहिते कर्मणि प्रथमा इति । एवं भावेन सर्वत्र योजना कार्य्या । येन केनचित् प्रकारेणाभिधानं यदा भवति तदा केवलं प्रथमाविभक्ति: भवति । कर्मादिकारकेगम्यमाने द्वितीयादिविभक्तीनां विधानं नेष्यते । 'उक्तार्थानामप्रयोग:' इति न्यायात् । 'अभिधानं तु प्रायेण तिङ्कृत् तद्धितसमासै:' इति व्यवस्था अभिधानस्य कृते स्थिरीकृता विद्यते । अनभिहिते कर्मणि द्वितीया अनभिहिते करणे तृतीया, अनभिहिते सम्प्रदाने चतुर्थी, अनभिहिते अपादाने पञ्चमी, अनभिहिते अधिकरणे सप्तमी । सर्वत्र अभिहिते कारके प्रथमा, सम्बन्धमात्रविवक्षायां षष्ठी, सम्बोधने प्रथमा इति विभक्तिविधानव्यवस्था ।

**स्वावलोकनप्रश्नाः**

१. सुब्विभक्ति: कस्माद् विधीयते ?

२. अनभिहिते कर्मणि का विभक्ति: ?

३. अभिहिते कारके का विभक्तिः ?

४. प्रायेण आभिधानं केन भवति ?

५. सम्बन्धमात्रविवक्षायां का विभक्तिः ?

## ७.१०. कारकसाधनदिशा सुब्विभक्तेः भेदकथनम्

कारकसंज्ञां पुरस्कृत्य विभक्तिविधानदशायां सुब्विभक्तेः भेदद्वयं विचार्य्यत कारकविभक्तिः, उपपदविभक्तिरिति भेदेन । साक्षात्क्रियान्वयं प्राप्य या विभक्तिरुत्पद्यते सा कारकविभक्तिरिति नाम्ना आख्यायते । कारकलक्षणविचारात् तादृशी प्रतिपत्तिः । कर्मकरणादिसंज्ञाविचारेण याः द्वितीयातृतीयादयः विभक्तयः उत्पद्यन्ते ताः कारकविभक्तयः । कारकविचारेण या विभक्तिः निश्चीयते सा कारकविभक्तिरिति । उपपदं निमित्तीकृत्य या विभक्तिः विचार्य्यते सा उपपदविभक्तिः । प्रतिविभक्ति एषा विभक्तिः वर्त्तते । तदनुरोधात् तस्याः विभक्तेः नामकरणं जायते । द्वितीयोपपदविभक्तिः, तृतीयोपपदविभक्तिः, चतुर्थ्युपपदविभक्तिरित्यादिभावेन । एतद्रूपायाः विभक्तेः साक्षात् क्रियान्वयो न वर्त्तते । तत्सम्बन्धितेन पदेन सह तस्याः अन्वयः ततश्च तत् सन्नियोगेन क्रियान्वयः । एवं विचारेण परम्परासम्बन्धेन तस्य पदस्य क्रियान्वयः दृश्यते । उपपदविभक्तिः सम्बन्धार्थिका । सर्वासु द्वितीयादिषु विभक्तिषु या उपपदविभक्तिः निरूपिता च जायते तस्याः सर्वस्याः विभक्तेः सम्बन्धार्थिकता ।

**स्वावलोकनप्रश्नाः**

१. विभक्तेः भेदद्वयं किम् ?

२. उपपदविभक्तिः किमर्थिका ?

३. उपपदविभक्तेः केन सम्बन्धेन क्रियान्वयः ?

४. का नाम कारकविभक्तिः ?

५. का नाम उपपदविभक्तिः ?

## ७.११. प्रथमाविभक्ति:

स्वादिविभक्तिषु सु–औ–जस् इति प्रथमाविभक्तिभावेन विचारिता । तदर्थं सूत्रद्वयम्

१. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (पा.सू. २/३/४६) ।

२. सम्बोधने च (पा.सू. २/३/४७) ।

१. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (पा.सू. २/३/४६)

पदं पदं प्रति = प्रतिपदम् । प्रतिपदं लब्धुमर्हति यत् तत् प्रातिपदिकम् । तदर्हति (पा.सू. ५/१/६२) इति द्वितीयान्तात् प्रतिपदशब्दात् 'ठञ्'प्रत्यये (प्रतिद + ठञ् = प्रातिपदिक) रूपम्। प्रतिपत्तुं योग्यमिति प्रातिपदिकमिति भवितुं नार्हति । अर्थ्यते बुध्यते इति अर्थ (अर्थ + घञ् = अर्थ) । प्रातिपदिकस्यार्थ: = प्रातिपदिकार्थ: । प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्चेति द्वन्द्व: । प्रातिपदिकार्थलिङ्गपरिमाणवचनान्येव = प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे । मात्रशब्दोऽवधरणे । 'मयूरव्यंसकादयश्च' इति नित्यसमास: । मात्रशब्दस्य द्वन्द्वान्ते श्रयमाणत्वात् प्रातिपदिकार्थे लिङ्गे परिमाणे वचने च प्रत्येकमन्वय: । अत: प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे प्रथमा इति सूत्रार्थ: ।

उदा. प्रातिपदिकार्थे = उच्चै:, नीचै:, कृष्ण:, श्री:, ज्ञानम् इति ।

लिङ्गमात्राधिक्ये = तट:, तटी, तटम् ।

परिमाणमात्रे = द्राण:, ब्रीहि: ।

वचनमात्रे = एक:, द्वौ, बहव: ।

प्रातिपदिकार्थ: नियतोपस्थितिक: । पञ्चकं प्रातिपदिकार्थ: इति पक्षमभिलक्ष्य एतल्लक्षणं विहितम् । नियता व्यापिका उपस्थिति: बोध: यस्यार्थस्य स नियतोपस्थितिकार्य: । यस्मिन् विचारिते यस्यार्थस्य नियमेन उपिस्थितिर्भवति स प्रातिपदिकार्थ: । उपस्थितिपदेन स्मृतिर्न गृह्यते । यस्य प्रातिपदिकस्य येष्वर्थेषु शक्तिस्तेषां युगपत्स्मृते: सत्त्वेनोपस्थितेर्नियतत्वेन लिङ्गादिग्रहणं व्यर्थं स्यात् । कृष्णशब्दे पुंस्त्वस्य श्रीशब्दे स्त्रीत्वस्य ज्ञानशब्दे नपुंसकत्वस्य च नियमेन भानमस्ति । अतस्तत्र प्रातिपदिकार्थमात्रे प्रथमा ।

प्रातिपदिकार्थविचारविषये आचार्य्येषु मतभेदो दृश्यते । भाष्यकारमतेन अविहित: स अर्थ: अन्तर्भूत: प्रातिपदिकार्थ: । नागेशमतेन प्रवृत्तिनिमित्तस्तदाश्रयश्च प्रातिपदिकार्थ इति । काशिकाकारमतेन सत्ता प्रातिपदिकार्थ: । प्रकाशकारमतेन अन्वयी प्रातिपदिकार्थ: । भर्तृहरिमते षोढाऽपि प्रातिपदिकार्थ: । कैयटमतेन पञ्चकं प्रातिपदिकार्थ: ।

प्रातिपदिकं विना लिङ्गभावस्थासम्भवात् लिङ्गमात्राधिक्ये इत्युक्तम् । प्रातिपदिकार्थापेक्षया यत्र लिङ्गमात्रमधिकं भासते तत्र प्रथमा ।

परिमाणग्रहणं मानमात्रपरम्, न तु परित: परिच्छेदकपरम् । प्रातिपदिकार्थापेक्षया लिङ्गापेक्षया परिमाणमात्राधिक्ये इत्यर्थ: । द्रोणी ब्रीहि: । द्रोणरूपं यत् परिमाणं तत् परिच्छिन्नो ब्रीहिरित्यर्थ: । प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम् । वचनं संख्या । अत: संख्यामात्रे प्रथमा इति भाव: । संख्यामात्राधिक्ये इति न 'लिङ्गमात्राधिक्ये' इतिवत् एकक्षिबहुशब्देषु

एकत्वद्वित्वबहुत्वानां केवलानां निशतोपस्थितिसत्वेन सङ्ख्यामात्रे प्रथमा इति व्याख्यानमुचितम् ।

२. सम्बोधने च (पा.सू. २/३/४७)

प्रातिपदिकार्थसूत्रे मात्रग्रहणेन सम्बोधनाधिक्ये प्रथमा न प्राप्नोति । अत: सम्बोधनाधिक्ये प्रथमाविधानार्थं सूत्रारम्भ: । सम्बोधनं प्रकृत्यर्थं प्रति विशेष्यम्, क्रियाम्प्रति विशेषणम् । तथाचोक्तम् ''सम्बोधनपदं यच्च तत्क्रियायां विशेषणम्'' । इति । सम्बोधनम् = अभिमुखीभाव: । इयं विभक्तिरनुवाद्यविषया । हे राम ! इत्यत्र प्रथमा । प्रथमाविभक्ते: इयमुपपदविभक्तिरिति केचन तर्कयन्ति ।

**स्वावलोकनप्रश्नाः**

१. प्रथमाविक्तिविधायकं सूत्रद्वयं किम् ?

२. 'प्रातिपदिकम्' इति पदस्य का व्युत्पत्ति: ?

३. 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे' इत्यत्र क: समास: ?

४. दीक्षितमतेन क: प्रातिपदिकार्थ: ?

५. हे राम ! इत्यत्र 'प्रातिपदिकार्थ ...' इति सूत्रेण प्रथमाविभक्ति: कथं न भवति ?

६. सम्बोधने प्रथमा कस्या: अनुवाद्यविषया ?

## ७.१२. प्रथमाविभक्ते: कारकविभक्तिविचार:

अनभिहिते कर्त्तरि प्रथमाविभक्ते: विधानं विचार्य्यते देवदत्त: पठति । कर्त्तृकारके रूपे अर्थे गम्यमाने प्रथमाविभक्ति: प्रयोगेषु इष्यते । पुनश्च सौकर्य्यातिशयं द्योतयितुं यत्र कर्त्तु: व्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्त्तृसंज्ञां लभते । उदा. स्थाली पचति, काष्ठानि पचन्ति । अत: अस्या: कारकविभक्तित्वं नास्ति । कौमुद्यां प्रथमाविभक्तिविधायकसूत्रात् परं 'कारके' इत्यधिकारसूत्रस्य स्थापनं विहितम् । महाभाष्यकार: अस्या: कारकत्वं साधयति । तिङ्समानाधिकरणे प्रथमाविधानस्य विचारात् । 'अस्ति' क्रियाया: सर्वत्र सत्वात् क्रियान्वयित्वं कारकत्वम् इति लक्षणेन सूपपत्ति: । सामान्यतया क्रियान्वययोग्यताबुद्धिरेव कारकविभक्तिप्रयोजिका । प्रथमाविभक्तिविधायकं सूत्रं क्रियायोग एव वर्त्तते । भाष्ये 'सहयुक्तेऽप्रधाने' इति सूत्रे 'अप्रधाने' इति पदस्य सार्थकताविचारप्रसङ्गे अस्या: कारकविभक्तित्वमुपपादितम् ।

**स्वावलोकनप्रश्नाः**

१. भाष्यकारमतेन प्रथमाविभक्तेः कारकत्वमस्ति न वा ?

२. दीक्षितमतेन प्रथमाविभक्तेः कारकत्वमस्ति न वा ?

३. 'सहयुक्तेऽप्रधाने' इति सूत्रे 'अप्रधाने' इति किं ज्ञायते ?

४. किमर्थं कौमुद्यां 'कारके' इति सूत्रं प्रथमाविभक्तिविधायकसूत्रात् परमुपन्यस्तम् ?

## ७.१३. प्रथमाविभक्तेः प्रयोगविधिः

प्रथमाविभक्तिः सर्वथा उपायत्रयेण प्रयुक्ता जायते । १. कारकविभक्तिः, २. उपपदविभक्तिः, ३. पदसाधुत्वसम्पादिका (अभिहिते प्रथमा) इति ।

कारकविभक्तिः

1. <u>अग्निः</u> ज्वलति — कर्त्तृकारकम् ।
२. <u>ओदनः</u> पच्यते — कर्मकारकम् ।
३. <u>स्नानीयं</u> चूर्णम् — करणकारकम् ।
४. <u>दानीयः</u> विप्रः — सम्प्रदानकारकम् ।
५. <u>भीमः</u> राक्षसः — अपादानकारकम् ।
६. <u>आसनं</u> पीठम् — अधिकरणकारकम् ।

उपपदविभक्तिः

१. हे <u>राम</u> ! , हे हरे !

अभिहिते प्रथमा

१. तिङ् — क्रियते <u>कटः</u> ।
२. कृत् — कृतः <u>कटः</u> ।
३. तद्धितः — शतेन क्रीतः = <u>शत्यः</u> (शत + यत्) ।
४. समासः — <u>प्राप्तोदकः</u> ग्रामः (प्राप्तः उदकं यं सः) ।
५. निपातः — <u>नारद</u> इत्यबोधि स ।

**स्वावलोकनप्रश्नाः**

१. प्रथमोपपदविभक्तेरुदाहरणं देयम् ?

| | |
|---|---|
| २. | कर्मकारके प्रथमाविभक्तेरुदाहरणम् देयम् ? |
| ३. | अपादानकारके प्रथमाविभक्तेरुदाहरणम् ? |
| ४. | 'क्रमादमुं <u>नारद</u> इत्यबोधि स' इति प्रयोगे 'नारद' इत्यत्र सकारणं विभक्तिं निरूपयत ? |

## ७.१४. सारांश:

प्रियपाठका: ! अस्मिन् खण्डे कारकलक्षणं व्युत्पादितम् । कारकस्य भेदा: प्रदर्शिता:। विभक्तीनां परिचय:, तत्र पुन: कारकविभक्ति: उपपदविभक्ति इति भेदद्वयम्, कारकविभक्तेरपेक्षयां उपपदविभक्ते: भिन्नता इति विचारितम् । प्रथमाविभक्तिविधायकस्य सूत्रद्वयस्योपपादनं, तत्तात्पर्य्यञ्च प्रतिपादितम् । प्रथमाविभक्ति: न कारकविभक्तिरिति दीक्षित:, कारकविभक्तिरिति भाष्यकारादय: । प्रयोगस्थलमुपायत्रयेण दृश्यते । कारकविभक्ति:, उपपदविभक्ति:, पदसाधुत्वसम्पादिका विभक्ति: इति। अनभिहिते इति तात्पर्य्ये कर्मादिकारकेषु द्वितीयादय: विभक्तय:, अभिहिते इति तात्पर्य्ये कर्मादिकारकेषु द्वितीयादय: विभक्तय:, अभिहिते तु सर्वत्र प्रथमाविभक्तिरिति इमे विचारा: विषयीकृता: ।

## ७.१५. आदर्शप्रश्ना:

I. **निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)**

१. कारकलक्षणविचारपुरस्सरं तद्भेदान् विभक्तियोगस्योपस्थापयत ?

२. 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति सूत्रस्य व्याख्या कार्य्या ?

३. विभक्तेर्लक्षणमुपस्थाप्य विभक्तिविधानव्यावस्थां निरूपयत ?

II. **विश्लेषणात्मकप्रश्ना: (प्रत्येकं १२/१० अङ्का:)**

१. कारकस्य संज्ञां निरूपयत ?

२. विभक्तिं निरूपयत ?

३. 'सम्बोधने च' इति सूत्रस्य व्याख्या कार्य्या ?

४. प्रथमाविभक्ते: प्रयोगस्थलमुपस्थापयत ?

III. **लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)**

१. उपपदविभक्ति: का ?

२. सर्वत्र कारकविभक्तौ प्रथमा उदाहरणं देयम् ?

३. 'प्रातिपदिकार्थे' इति पदस्य का व्युत्पत्ति: ?

४. 'प्रातिपदिकार्थ' .... इत्यादिसूत्रे लिङ्ग्रहणस्य प्रयोजनमुपस्थापयत ?

५. टिप्पणी प्रदेया कारकं विभक्तिश्च ?

६. 'अभिहिते प्रथमा' इत्यस्योदाहरणं देयम् ?

७. 'सम्बोधनपदम्' इति टिप्पणी प्रदेया ?

IV. **एकाङ्कप्रश्ना: (प्रत्येकं १ अङ्क:)**

१. वाक्ये प्रयुक्तानां पदानां मध्ये य: सम्बन्ध: स किम्भूत: ?

२. कारकशब्द: रूढ: योगरूढो वा ?

३. कारक इति बोधनाय अधिकारसूत्रं किम् ?

४. करोतीति कारकम् कस्य मतम् ?

५. 'कारके' इति कस्मिन्नर्थे प्रथमा ?

६. कानि कारकाणि ?

७. विभक्ति: कारकाणां वाचिका द्योतिका वा ?

८. कर्तृकर्मणो: कृद्योगे का विभक्ति: भवति ?

९. सुपां तिङाञ्च का संज्ञा विधीयते ?

१०. स्वादिविभक्तीनां संख्या कति ?

११. अनभिहिते कर्मणि का विभक्ति: विधीयते ?

१२. सम्बन्धमात्रविवक्षायां का विभक्ति: विधीयते ?

१३. उपपदविभक्ति: किमर्थिका ?

१४. उपपदविभक्ते: केन सम्बन्धेन क्रियान्वय: ?

१५. नियतोपस्थितिक: प्रातिपदिकार्थ: इति कस्य मतम् ?

१६. सम्बोधनपदं क्रियायां किम्भूतम् ?

१७. भाष्यकारमतेन प्रथमाविभक्ते: कारकत्वमस्ति न वा ?

१८. कृत: कट: । रेखाङ्कितपदस्य सकारणं विभक्तिं निरूपयत ?

१९. 'क्रमादमुं नारद इत्यबोधि स' । रेखाङ्कितपदस्य सकारणं विभक्तिं निरूपयत ?

२०. ओदन: पच्यते । रेखाङ्कितपदस्य सकारणं विभक्तिं निरूपयत ?

## ७.१६. एकाङ्कप्रश्नोत्तराणि

१. क्रियाकारकरूप: २. योगरूढ: ३. कारके ४. दीक्षितस्य ५. सप्तम्यर्थे ६. षट् ७. द्योतिका ८. षष्ठी ९. विभक्ति: १०. एकविंशति: ११. प्रथमा १२. षष्ठी १३. सम्बन्धार्थिका १४. परम्परासम्बन्धेन १५. दीक्षित १६. विशेषणीभूतम् १७. अस्ति १८. उक्ते कर्मणि प्रथमा १९. अभिहिते प्रथमा २०. उक्ते कर्मणि प्रथमा ।

*******

# ।। अष्टमखण्डः ।।

## द्वितीया–तृतीया–विभक्तिविधानविचारः

### ८.१. प्रस्तावना

कारकेषु कर्मकारकरूपेऽर्थे द्वितीयाविभक्तिः विधीयते । अयञ्च सामान्यः विचारः । कर्मकारकस्य संज्ञा निरूप्यते । कुत्र कर्मकारकं भवतीति तद् विचार्य्यते । चतुर्विधं कर्म । ईप्सिततमम्, अनीप्सितम्, अकथितम्, कर्त्तृकर्म चेति । तदर्थमष्टौ सूत्राणि सन्ति । 'कर्मप्रवचनीयाः' इत्यधिकारसूत्रम्। कर्मप्रवचनीयसंज्ञाविधानार्थं दशसूत्राणि वर्त्तन्ते । कर्मसंज्ञायां गम्यमानायां द्वितीयाविधानार्थमेकं सूत्रम् 'कर्मणि द्वितीया' इति । कर्मप्रवचनीयसंज्ञायां साधितायां द्वितीयविधानार्थमेकं सूत्रम् 'कर्मप्रवचनीययुक्ते द्वितीया' इति । एतद्विहाय निर्द्दिष्टोपपदद्वारा द्वितीयाविभक्तेः विधानं जायते । तदर्थमेकं सूत्रं वार्त्तिकवचनानि च । सिद्धान्तकौमुद्यां २३ सूत्राणि १२ वार्त्तिकवचनानि तदर्थं प्रतिपन्नानि विद्यन्ते । सम्पूर्णे कारकप्रकरणे 'कारकाधिकारः' 'अनभिहिताधिकारः' इत्यधिकारद्वयं प्रतिष्ठते । अत्रापि कर्मकारकविचारे तयोः प्रवृत्तिरतः कारकमित्यर्थः कारकाधिकारद्वारा अनभिहिते कर्मणि इति तात्पर्य्यम् अनभिहिताधिकारद्वारा स्थिरीक्रियते ।

कर्त्तृकारके करणकारके च तृतीयाविभक्तिः विधीयते । 'स्वतन्त्रः कर्त्ता' इति कर्त्तृकारकम्, 'साधकतमं करणम्' इति करणकारकम् । 'कर्त्तृकरणयोस्तृतीया' इति सूत्रेण तृतीयाविभक्तिः । उपपदद्वारा तृतीया इत्युपायेन एतस्याः विभक्तेः विधानं दृश्यते । पुनश्च निर्द्दिष्टे स्थले विकल्पेन करणसंज्ञा कर्मणि विकल्पेन तृतीयाविभक्तिः इति विधानं जायते । कौमुद्यामेतदर्थं १० सूत्राणि वार्त्तिकवचनद्वयं प्रतिपन्नानि दृश्यन्ते । कारकाधिकारात् कारकमिति विवेचनं, पुनश्चानभिहिताधिकारात् अनभिहिते इति प्रयोजनं प्रतिष्ठते ।

विभक्तिविधायकसूत्रेषु विधीयमानकार्य्यावबोधकपदे प्रथमा, कारकबोधकपदे सप्तमी इति दृश्यते । सूत्रसंघटनं पाणिनीयकौशलमादाय प्रवर्त्तते । कुत्र सूत्रे विशिष्टस्याशयस्य संयोजनम्, अर्थाभिधानं विषयीकृतं दृश्यते । विधीयमानकार्य्ये वैकल्पिकविधानम्, निषेधः, इत्युभयथा प्रतिपादनं प्राप्यते ।

### ८.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

I. **द्वितीयाविभक्तिः**

. द्वितीयाविभक्तिविधानोपायान् ज्ञास्यन्ति ।

. द्वितीयादिकारकविभक्तौ कारकाधिकारम् अनभिहिताधिकारञ्चाधिगमिष्यन्ति ।

. द्वितीयाविभक्तिविधायकानि सूत्राण्यवगमिष्यन्ति ।

. कर्मसंज्ञाविधायकानि सूत्राणि बोधनीयानि भविष्यन्ति ।
. ईप्सितकर्म ज्ञास्यन्ति ।
. अनीप्सितकर्म अवगमिष्यन्ति ।
. अकथितकर्म ज्ञास्यन्ति ।
. कर्त्तृकर्म तद्विधायकानि सूत्राणि अवगमिष्यन्ति ।
. आधारकर्म तद्विधायकानि सूत्राणि अधिगमिष्यन्ति ।
. कर्मप्रवचनीयसंज्ञां ज्ञास्यन्ति ।
. कर्मप्रवचनीयसंज्ञास्थलानि अवगमिष्यन्ति ।
. द्वितीयोपपदविभक्तिस्थलानि ज्ञास्यन्ति ।

II. **तृतीयाविभक्तिः**

. तृतीयाविभक्तिविधानोपायान् ज्ञास्यन्ति ।
. तृतीयादिविभक्तिविधायकं सूत्रं ज्ञास्यन्ति ।
. कर्त्तृसंज्ञाविधायकं सूत्रमवगमिष्यन्ति ।
. करणसंज्ञाविधायकं सूत्रं ज्ञास्यन्ति ।
. तृतीयोपपदविभक्तिस्थलानि ज्ञास्यन्ति ।
. करणसंज्ञाविधानस्य निर्दिष्टस्थलं ज्ञास्यन्ति ।
. कर्मणि विकल्पेन तृतीयाविभक्तिविधानस्थलं ज्ञास्यन्ति ।

## I. द्वितीयाविभक्तिः

## ८.३. द्वितीयाविभक्तिविधानोपायाः

विभक्तिक्रमे अम्–औट्–शस् इति द्वितीयाविभक्तिः । तस्याः विधानार्थं कौमुद्यां सूत्रद्वयं विद्यते । कर्मणि द्वितीया (पा.सू. २/३/२), कर्मप्रवचनीययुक्ते द्वितीया (पा.सू. २/३/८) इति । उपपदविभक्तिविधानव्यवस्थाऽपि अपरः उपायः । तेषां निर्दिष्टानां साक्षादुच्चारणपुरस्सरं विभक्तिविधानं जायते । कर्मणि द्वितीया, कर्मप्रवचनीयुक्ते द्वितीया, उपपदद्वारा द्वितीया इत्येवंभावेनोपायत्रयम् । कर्मसंज्ञासाधने भेदचतुष्टयं लक्षीक्रियते । ईप्सिततमं कर्म, अनीप्सितं कर्म, अकथितं कर्म, एवञ्च कर्त्तृकर्म । अष्टौ सूत्राणि निद्धारितानि वर्त्तन्ते । कर्मप्रवचनीयसंज्ञायाः कृते 'कर्मप्रवचनीाः' (पा.सू. १/४/८३) इत्येकमधिकारसूत्रम् । दशसूत्राणि तत्संज्ञाविधायकानि । तत्र अनु, उप, प्रति, परि, अभि, अधि, सु, अति, इत्येते गृहीताः दृश्यन्ते । निर्दिष्टप्रसङ्गे निर्दिष्टे तात्पर्य्ये च एतेषां कर्मप्रवचनीयसंज्ञा तद्द्वारा कर्मप्रवचनीययुक्ते द्वितीया । उपपदं स्थिरीकृतम्, यद्द्वारा द्वितीया । तेषु अन्तरा, अन्तरेण, परितः, सर्वतः, धिक्, उपर्य्युपरि, अभितः, समया, निकषा, हा, प्रति, अध्यधि, अधोऽधः इति ग्रहणीयानि दृश्यन्ते ।

**स्वावलोकनप्रश्नाः –**

१. द्वितीयाविभक्तेः विधानोपायः कः ?

२. कर्मणि का विभक्तिः ?

३. कर्मप्रवचनीययुक्ते का विभक्तिः ?

४. कर्मसंज्ञासाधने कति सूत्राणि ?

## ८.४. द्वितीयादिकारकविभक्तिविधाने कारकाधिकारः

प्रथमाविभक्तिविधायकात् सूत्रादनन्तरं 'कारके' (पा.सू. १/४/२३) इत्यधिकारसूत्रं वर्त्तते । अयं संज्ञाधिकारः । निरवधिकाधिकारः । व्याख्यानात् 'तत्प्रयोजकहेतुश्च' (पा.सू. १/४/५५) इति सूत्रं यावत् सूत्रस्यास्याधिकारः प्रवर्त्तते । यतो हि ततः परं निपाताधिकार इति विषयान्तरः । धारावाहिकरीत्या प्रतियोगमुपतिष्ठते कारकमिति प्रतिपादनाय । सप्तमीविभक्तेः विपरिणामो जायते प्रथमान्तभावेन । प्रथमार्थे सप्तमीति दीक्षितेन व्याख्यातम् । काशिकादिषु निर्द्धारणे सप्तमी तत्र पुनः जात्याख्यायामेकवचनम् । कारकेषु इदं कर्मकारकमिति व्याख्यानस्य रहस्यम् ।

**स्वावलोकनप्रश्नाः –**

१. 'कारके' इति किम्भूतं सूत्रम् ?

२. 'कारके' इति किम्भूतः अधिकारः ?

३. 'कारके' इति कस्मिन्नर्थे सप्तमी ?

४. 'कारके' इति निर्द्धारणे सप्तमी कुत्र व्युत्पादितम् ?

## ८..५. द्वितीयादिकारकविभक्तिविधाने अनभिहिताधिकारः

अनभिहिते (पा.सू. २/३/१) इत्यधिकारसूत्रम् । निरवधिकोऽयमधिकारः । 'चतुर्थी ''चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः'' (पा.सू. २/३/७३) इति सूत्रं यावदस्याधिकारः प्रवर्त्तते । ततश्च चतुर्थपादे समाससाधनात्मको विषयान्तरप्रवेशः । न अभिहितः = अनभिहितः तस्मिन् ।

अभिहितशब्द: उक्तार्थकस्तेनानभिहिते = अनुक्ते इत्यर्थ: । अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैः । क्वचिन्निपातेनाभिधानम् इति व्यवस्था अभिधानस्य कृते विद्यते । तेनानभिहिते कारके कर्मादिसंज्ञा । अभिहिते कर्मणि प्रथमा । अनुक्ते कर्त्तरि तृतीया, एवं सर्वत्र कारके योजना विधेया वर्त्तते । संख्या विभक्त्यर्थ: इति पक्षे सूत्रारम्भ: सार्थक: । अनभिहिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमित्यर्थ: । कारकं विभक्त्यर्थ: इति पक्षे भाष्यकृता सूत्रस्य प्रत्याख्यानं साधितम् । पञ्चकं प्रातिपदिकार्थ: (जाति:, व्यक्ति:, लिङ्गम्, संख्या, कारकम् इति पञ्चकं प्रातिपदिकार्थ:) इति विचारात् प्रातिपदिकेनैव संख्या-कारकयोरभिधानं जायते । कर्मणि वर्त्तमानात् प्रातिपदिकात् द्वितीया, एकत्वे वर्त्तमानात् एकवचनम् इति प्रतिपत्ति: ।

| | |
|---|---|
| तिङ्द्वाराऽभिधानम् | हरि: सेव्यते । अत्र (सेव् + यक् + ते) यक्प्रत्ययद्वारा कर्मण: उक्तत्वात् द्वितीया न अभिधेये प्रथमा । |
| कृत्द्वाराऽभिधानम् | लक्ष्म्या सेवित: । सेव् + क्त = सेवित:, कर्मणि क्तप्रत्यय: । अत: कर्मण: उक्तत्वात् द्वितीया न अभिधेये प्रथमा । |
| तद्धितद्वाराऽभिधानम् | शतेन क्रीत: = शत्य: (शत + यत्) तद्धितेन 'यत्'प्रत्ययेन कर्मण: उक्तत्वात् अश्वादिशब्दे न द्वितीया । |
| समासद्वाराऽभिधानम् | प्राप्त आनन्दो यं स = प्राप्तानन्द: । बहुव्रीहिसमासेनाभिहितत्वात् न द्वितीया इति । |
| निपातेनाभिधानम् | विषवृक्षोऽपि सम्बर्द्ध्य स्वयं छेत्तुमसाम्प्रतम् । 'अपि' इति निपातद्वारा कर्मण: उक्तत्वात् द्वितीया न । |

**स्वावलोकनप्रश्नाः –**

१. 'अनभिहिते' इति किम्भूतं सूत्रम् ?

२. अनभिहितशब्दस्य कोऽर्थ: ?

३. कस्मिन् पक्षे सूत्रारम्भ: सार्थक: ?

४. निपातेनाभिधानम् इत्यस्योदाहरणं देयम् ?

५. कस्मिन् पक्षे भाष्यकृता सूत्रं प्रत्याख्यातम् ?

## ८.६. द्वितीयाविभक्तिविधायकानि सूत्राणि

द्वितीयाविभक्तिविधानार्थं सूत्रद्वयं विद्यते । १. कर्मणि द्वितीया (पा.सू. २/३/२) २. कर्मप्रवचनीययुक्ते द्वितीया (पा.सू. २/३/८) इति । एतद्विहाय उपपदविभक्तिविधानदशायां सूत्रमेकम् 'अन्तराऽन्तरेण युक्ते' (पा.सू. २/३/४) वार्त्तिकवचनानि च । उपपदविभक्तिविचारवेलायां तदुपपादनं विवक्ष्यते ।

१. कर्मणि द्वितीया (पा.सू. २/३/२)

'कर्मणि' इति सप्तम्यन्तम्, द्वितीया इति प्रथमान्तम् । 'अनभिहिते' इत्यधिकार: उपतिष्ठते । अनभिहितो नाम ~~अनुक्त:~~ । न अभिहित: अनभिहित: इति व्युत्पत्तिकल्पनम् । उभयत्र सप्तमी वैषयिकसप्तमी । कर्मवाचकता विषयतया इत्यर्थ: । अनुक्ते कर्मणि द्वितीया इति सूत्रार्थ: । कर्मादिसंज्ञा अर्थस्य न शब्दस्य । कर्मवाचकाच्छब्दात् द्वितीया इत्यर्थ: । कर्मवाचकत्वं कुत्र ईप्सिततमभावेन अनीप्सितभावेन कर्त्तृकर्मभावेन आधारकर्मभावेन च । क्रियाजन्यफलाश्रयत्वं कर्मत्वमिति अन्यत्र विधौ प्रपञ्चितम् । उदा. देवदत्त: ग्रामं गच्छति ... इत्यादीनि । तिङ्कृत्तद्धितसमासद्वारा शास्त्रे अभिधानं विद्यते । तेन कर्मादय: अभिहिता: भवन्ति । यत्र ते अर्था: अभिधेया: न भवन्ति तत्र द्वितीया इति तात्पर्य्यम् ।

२. कर्मप्रवचनीययुक्ते द्वितीया (पा.सू. २/३/८)

'कर्मप्रवचनीययुक्ते' सप्तम्यन्तं 'द्वितीया' इति प्रथमान्तम् । कर्मप्रवचनीयै: युक्तम् = कर्मप्रवचनीययुक्तम् तस्मिन् । कर्मप्रवचनीयसञ्ज्ञकै: शब्दैर्युक्ते द्वितीयाविभक्तिर्भवति । कर्मप्रवक्तुं योग्य इति कर्मप्रवचनीय । कर्म = क्रियां प्रोक्तवन्त: कर्मप्रवचनीय: । कर्मप्रवचनीयविचारार्थं दशसूत्राणि अत्र प्रकरणे स्थापितानि वर्त्तन्ते । तेन कर्मप्रवचनीयपदेन सह यस्य पदस्य सम्बन्ध: तत्र द्वितीयाविभक्ति: उपतिष्ठते । उदा. जपमनु प्रावर्षत् । अत्रानुशब्दस्य लक्षणे कर्मपवचनीयत्वेन जपशब्दाद् द्वितीया । द्वितीयार्थो लक्ष्यलक्षणभाव: सम्बन्धो हेतुश्चानुना द्योत्यते ।

३. अन्तराऽन्तरेण युक्ते (पा.सू. २/३/४)

अन्तरा च अन्तरेण च अन्तरान्तरेणौ, ताभ्यां युक्तम्, अन्तरान्तरेणयुक्तम् तस्मिन्, द्वन्द्वगर्भतृतीयातत्पुरुष: । अन्तरा अन्तरेण शब्दौ निपातौ ताभ्यां योगे द्वितीयाविभक्तिर्भवति । उदा. अग्निमन्तरेण कथं पचेत् । त्वां मां च अन्तरा हरि: । इयमुपपादविभक्ति: ।

एवं भावेन उपपदकल्पनस्य कृते वार्त्तिकवचनानि सन्ति । अभित:, परित:, समया, निकषा इत्यादीनि द्वितीयाविभक्तिरुपपद्यते ।

**स्वावलोकनप्रश्नाः-**

१. द्वितीयाविभक्तिविधानस्य कृते किं सूत्रद्वयम् ?

२. 'कर्मणि' इत्यत्र का सप्तमी ?

३. कर्मसंज्ञा अर्थस्य शब्दस्य वा ?

४. अनभिहिते कर्मणि का विभक्तिः ?

५. कर्मप्रवचनीयशब्दस्य का व्युत्पत्तिः ?

६. कर्मप्रवचनीयसंज्ञायाः किं फलम् ?

७. 'कर्मप्रवचनीययुक्ते' इत्यत्र कः समासः ?

८. 'अन्तरा' इति शब्दद्वारा का विभक्तिः ?

९. अन्तरादिद्वारा विधीयमाना विभक्तिः किम्भूता ?

## ८.७. कर्मसंज्ञाविधायकानि सूत्राणि

'विभक्तिविधाने संज्ञा नियामिका भवतीति विचाराद् द्वितीयाविभक्तिविधाने कर्मसंज्ञा नियामिका । सा च कर्मसंज्ञा का इति जिज्ञासायां सूत्राणि उपतिष्ठन्ते । तथाहि

१. कर्त्तुरीप्सिततमं कर्म (१/४/१) ईप्सिततमं कर्म ।
२. तथायुक्तं चानीप्सितम् (१/४/५०) अनीप्सितं कर्म ।
३. अकथितञ्च (१/४/५१) अकथितं कर्म ।
४. गतिबुद्धिप्रत्यवसानार्थं ...... (पा.सू. १/४/५२) कर्त्तृकर्म ।
५. हृक्रोरन्यतरस्याम् (पा.सू. १/४/५३) कर्त्तृकर्म ।
६. अधिशीङ्स्थासां कर्म (पा.सू. १/४/४६) आधारकर्म ।
७. अभिनिवशश्च (पा.सू. १/४/४७) आधारकर्म ।
८. उपान्वध्याङ् वसः (पा.सू. १/४/४८) आधारकर्म ।

इत्यष्टौ सूत्राणि संघटितानि सन्ति । एषु 'कर्तुरीप्सिततमं कर्म' इतीप्सितं कर्म, तथायुक्तमिति अनीप्सितं कर्म, द्विकर्मकधातूनां दुह्याच्पच्दण्डादीनां अकथितं कर्म, कर्तृकर्म इत्यस्य कृते निर्दिष्टाः धातवः एवञ्च आधारकर्म इत्यस्य कृते निर्दिष्टाः धातवः उल्लिखिताः विद्यन्ते । कर्त्तरि कर्मसंज्ञा अधिकरणे कर्मसंज्ञा इति तद्विधस्य कर्म इत्यस्य रहस्यम् ।

**स्वावलोकनप्रश्नाः**

१. विभक्तिविधाने का नियामिका भवति ?

२. कर्मसंज्ञाविधानार्थं कौमुद्यां कानि सूत्राणि सन्ति ?

३. 'उपान्वध्याङ्वसः' इत्यनेन किं विधीयते ?

४. अनीप्सितकर्मसंज्ञाविधायकं सूत्रं किम् ?

५. 'गतिबुद्धिप्रत्यवसानार्थ ...... इत्यादिना सूत्रेण किं क्रियते ?

## ८.८. ईप्सितं कर्म

ईप्सितकर्मपरिज्ञानार्थमेकमेव सूत्रं वर्त्तते कर्तुरीप्सिततमं कर्म (पा.सू. १/४/४९) । कर्तुः ईप्सिततमम् कर्म इति प्रथमान्तम् । कर्म इति संज्ञाबोधकम् कर्तुरीप्सिततमम् इति संज्ञिबोधकम् । 'कारके' इत्यधिक्रियते । अतः कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थः ।

**कर्तुः** कर्तृशब्दान्निष्पन्नं षष्ठ्यन्तं पदम् । 'क्तस्य च वर्त्तमाने' इति सूत्रेण कर्त्तरि षष्ठी । कर्तृसंज्ञकपरस्तु न अपितु यद्वाक्यघटककारकस्य कर्मसंज्ञा आकाङ्क्षिता तत्र विद्यमानस्य धातोः प्रधानीभूतव्यापाराश्रयस्वतन्त्रपरः ।

**ईप्सिततमम्** आप् धातोः 'सन्'प्रत्ययः ततश्च 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रेण वर्त्तमाने क्तप्रत्ययः । अतिशयेन ईप्सितम् = ईप्सिततमम् । ईप्सितशब्दात् 'अतिशायने तमविष्टेनौ तमप् प्रत्ययः। सूत्रे बुद्धिग्रहणसामर्थ्यात् मतिपदेन इच्छा ग्राह्या भवति ।

**कारकम्** महासंज्ञया क्रियाजनकं कारकमिति । कारकाधिकारात् तस्य पदस्य अत्रोपस्थितिः । विशेषसंज्ञया सामान्यकारकसंज्ञायाः न बाधः । कारकसंज्ञा पूर्वं भवति । ततश्च कर्मसंज्ञेति ।

सूत्रे 'कर्तुः इत्यस्याभावे 'माषेष्वश्वं बध्नाति' इति प्रयोगे 'माष' इत्यत्र कर्मत्वापत्तौ द्वितीया स्यात् 'माषान् अश्वं बध्नाति' इति । बन्धनक्रियाकर्मणो माषा ईप्सिता इति माषाणां

कर्मत्वापत्तिः। कर्मण ईप्सिता माषा न तु कर्त्तुः ।

'तमप्'ग्रहणस्य फलन्तु 'अग्नेर्माणवकं वारयति' इति प्रयोगे अग्नि इत्यत्र पञ्चमी । अन्यथा उभयोः समानविषयत्वेन 'वारणार्थानामीप्सितः' इति सूत्रमस्यापवादः स्यात् । एवञ्च माणवकस्य कर्मत्वं न स्यात् ।

'कर्म'ग्रहणस्य फलन्तु आधारनिवृत्त्यर्थम् । 'अधिशीङ्स्थासां कर्म' इति सूत्रात् कर्मपदानुवृत्त्या सिद्धे, पुनः कर्मग्रहणम् आधारनिवृत्त्यर्थम् । तत्र तु कर्मपदमाधारपदकम् । अतः 'गेहं प्रविशति' इत्यादिष्वेव आधारस्य कर्मसंज्ञा स्यात् । 'हरिं भजति इत्यादौ अनाधारे इष्टा कर्मसंज्ञा न स्यात्।

**स्वावलोकनप्रश्नाः**

१. ईप्सिततमं कर्म केन सूत्रेण विचार्य्यते ?

२. कर्मसंज्ञाविधायकसूत्रे संज्ञिबोधकं पदं किम् ?

३. कर्त्तुः इत्यत्र केन सूत्रेण षष्ठी ?

४. सूत्रे 'कर्त्तुः' इति पदस्य फलं किम् ?

५. सूत्रे 'तमप्'ग्रहणस्य किं फलम् ?

६. सूत्रे कर्मग्रहणस्य फलं किम् ?

## ८.९. अनीप्सितं कर्म

अनीप्सितकर्मबोधनार्थमेकं सूत्रम्, 'तथायुक्तं चानीप्सितम्' (पा.सू. १/४/५०) ईप्सिततमवत् क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् । ईप्सिततमेन तुल्यम् । ईप्सिततम + वतुप् । तेन तुल्यं क्रियाचेदतिः इति वतुप् । सादृश्यं क्रियात्वेन । 'तथा'शब्दः सादृश्यवाचकः प्रतियोगिसापेक्षः । अतः ईप्सिततमवत् इत्यर्थः । अनीप्सितं चतुर्विधम् उदासीनम्, द्वेष्यम्, संज्ञान्तरैरनाख्यातम्, अन्यपूर्वकम् इति भदेन । उदा.

१. उदासीनम् तृणं स्पृशति ।

२. द्वेष्यम् ओदनं भुञ्जानो विषयं भुंक्ते ।
३. संज्ञान्तरैरनाख्यातम् गां दोग्धि पयः ।
४. अन्यपूर्वकम् क्रूरमभिक्रुध्यति ।

**स्वावलोकनप्रश्नाः**

१. अनीप्सितकर्मबोधनार्थकं सूत्रं किम् ?

२. तथाशब्दस्य कः अर्थः ?

३. अनीप्सितं कतिविधम् ?

४. अन्यपूर्वकम् इत्यस्य किमुदाहरणम् ?

## ८.१०. अकथितं कर्म

अकथितं च (पा.सू. १/४/५१) इति सूत्रेण अकथितं कर्म स्वीक्रियते । न कथितम् = अकथितम् । 'अकथितं शब्दोऽसंकीर्त्तितपरः । 'कर्म' इत्यनुवर्त्तते कारकाधिकारः उपतिष्ठते । अतः अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थः । द्विकर्मकधातूनामत्र विषये ग्रहणं बोध्यम् । इमे च द्विकर्मकधातवः दुह्, याच्, पच्, दण्ड, रुध्, प्रच्छ्, चि, ब्रू, शास्, जि, मन्थ, मुष्, नी, हृ, कृष्, वह् इति षोडश धातवः । अर्थनिबन्धनेयं संज्ञा, न तु स्वरूपाश्रया । तेन षोडशधातुपर्य्यायवाचक–धातुयोगेऽपि 'अकथितञ्च' इति सूत्रं प्रवर्त्तते । उदा. गां दोग्धि पयः, माणवकं पन्थानं पृच्छति । वलिं याचते वसुधाम् । तण्डुलानोदनं पचति । वृक्षं फलं चिनोति । माणवकं धर्मं ब्रूते । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । ग्राममजां नयति हरति, कर्षति, वहति । माणवकस्य पन्थानं पृच्छति इत्यत्र कारकाभावात् माणवकपदे द्वितीयाविधानार्थं कर्मसंज्ञा अनेन न विधीयते ।

**स्वावलोकनप्रश्नाः**

१. अकथितशब्दस्य कः अर्थः ?

२. कति द्विकर्मकधातवः ?

३. इयं संज्ञा किंनिबन्धना ?

| | |
|---|---|
| ४. | माणवकस्य पन्थानं पृच्छति इति वाक्ये माणवकपदे अकथितकर्म कथं न ? |
| ५. | 'सुधां क्षीरनिधिं मन्थाति' इति वाक्ये रेखाङ्कितपदस्य सकारणं विभक्तिं निरूपयत ? |
| ६. | वलिं याचते वसुधाम् इत्यत्र कुत्र अकथितं कर्म । |

## ८.११. कर्त्तृकर्म

कर्त्तरि कर्म = कर्त्तृकर्म । कर्त्तरि कर्त्तृकारके कर्मसंज्ञा उपजायते । एतदर्थं सूत्रद्वयम् । १. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ (पा.सू. १/४/५२) २. हृक्रोरन्यतरस्याम् (पा.सू. १/४/५३) । वार्त्तिकवचनान्यपि वर्त्तन्ते । अण्यन्तावस्थायां य: कर्त्ता स ण्यन्ते कर्मसंज्ञको भवति । अत: कर्त्तृकर्मपदेन तद् व्यवह्रियते ।

I. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामपि कर्त्ता स णौ (पा.सू. १/४/५२)

गतिश्च बुद्धिश्च प्रत्यवसानञ्च (प्रत्यवसानं नाम भक्षणम्) तानि इति द्वन्द्व: गतिबुद्धिप्रत्यवसानानि अर्थो येषामिति गतिबुद्धिप्रत्यवसानार्था: । शब्द: कर्म येषां ते शब्दकर्माण: । अविद्यमानं कर्म येषां ते अकर्मका: । सर्वत्र बहुव्रीहिसमास: । गतिबुद्धिप्रत्यवसानार्थाश्च शब्दकर्माण्यश्च अकर्मकाश्च इति द्वन्द्व: । अणौ कर्त्ता अणिकर्त्ता । गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ य: कर्त्ता स णौ कर्म स्यात् । 'कर्मणि द्वितीया' इत्यनेन द्वितीयाविभक्ति: । उदा.

१. गत्यर्था: माणवको ग्रामं गच्छति = माणवकं ग्रामं गमयति ।
२. बुध्यर्था: माणवको धर्मं बुध्यते = माणवकं धर्मं बोधयति ।
३. प्रत्यवसानार्था: माणवको अन्नं भुङ्क्ते = माणवकम् अन्नं भोजयति ।
४. शब्दकर्मकाणाम् माणवको वेदमधीते = माणवकं वेदम् अध्यापयति ।
५. अकर्मकाणाम् देवदत्त: आस्ते = देवदत्तम् आसयति ।

देवदत्त: अन्नं पचति । देवदत्तेन अन्नं पाचयति । 'पच्'धातो: गत्यर्थाद्यर्थेषु ग्रहणाभावात् अनेन कर्मसंज्ञा न भवति । अपि तु कर्त्तृसंज्ञायां ''कर्त्तृकरणयोस्तृतीया'' इत्यनेन तृतीयाविभक्ति: । 'स्मारयति प्रापयति वा देवदत्तेन' इत्यत्र कर्मसंज्ञा न भवति । यतो हि सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु विशेषार्थानाम् ।

सूत्रमिदं नियमार्थम् । णिजर्थव्यापारप्रयोज्यव्यापाराश्रयस्य कर्मत्वं भवति चेत् ण्यन्तानां गत्याद्यर्थकानां धातूनां योगे एव नान्येषाम् ।

अत्र विधौ वार्त्तिकवचनानि सन्ति यैः निर्दिष्टधातूनामुपस्थित्या कर्मसंज्ञायाः विधानं, निषेधः, क्रियते । तद्यथा

१. निवह्योर्न (वा) नीधातोः वह्धातोः कर्मसंज्ञानिषेधः ।
उदा. नाययति वाहयति वा भारं भृत्येन ।
२. नियन्तृकर्तृकस्य वहेरनिषेधः (वा) नियन्तृकर्तृक 'वह'धातोः कर्मसंज्ञा न निषिध्यते ।
उदा. वाहयति रथं वाहान् सूतः ।
३. आदिखाद्योर्न (वा) अद्, खाद् धातोः कर्मसंज्ञानिषेधः ।
उदा. आदयति खादयति वा अन्नं वटुना ।
४. भक्षेरहिंसार्थस्य न (वा) भक्षधातोः कर्मसंज्ञानिषेधः । अहिंसार्थः गम्यते चेत् ।
उदा. भक्षयति अन्नं वटुना ।
५. शब्दायते र्न (वा) शब्द इति नामधातुः, तत्र कर्मसंज्ञानिषेधः ।
उदा. शब्दाययति देवदत्तेन ।
६. जल्पतिप्रभृतीनामुपसङ्ख्यानम् (वा) कर्मसंज्ञा भवति ।
उदा. जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः ।
७. दृशेश्च (वा) कर्मसंज्ञा भवति ।
उदा. दर्शयति हरिं भक्तान् ।

II. हृक्रोरन्यतरस्याम् (पा.सू. १/४/५३)

विकल्पेन कर्मसंज्ञा विधीयते । हृक्रोरणौ यः कर्त्ता स णौ वा कर्मसंज्ञः स्यात् । हृ = हारयति, कृ = कारयति ।

हारयति कटं भृत्यम् ।
हारयति कटं भृत्येन ।
कारयति कटं भृत्यम् ।
कारयति कटं भृत्येन ।

**स्वावलोकनप्रश्नाः**

१. किं नाम कर्तृकर्म ?

२. 'गतिबुद्धि' इति सूत्रं विध्यर्थं नियमार्थं वा ?

३. 'गतिबुद्धिप्रत्यवसानार्थाः' इत्यस्य किं विग्रहवाक्यम् ?

४. प्रत्यवसानार्थशब्दस्य क: अर्थ: ?

५. देवदत्त: आस्ते इति वाक्यस्य ण्यन्तप्रयोगं प्रदर्शयत ?

६. 'नीबह्योर्न' इति वार्त्तिकेन किं भवति ?

७. भक्त: हरिं पश्यति इति वाक्यस्य ण्यन्तप्रयोगं प्रदर्शयत ?

८. कयो: धात्वो: अणौ य: कर्त्ता स ण्यन्ते कर्मसंज्ञको भवति ?

## ८.१२. आधारकर्म

अधिकरणकारके कर्मसंज्ञाविधानम् आधारकर्म इत्युच्यते । एतदर्थं त्रीणि सूत्राणि निर्दिष्टानि भवन्ति

१. अधिशीङ्स्थासां कर्म (पा.सू. १/४/४६)

२. अभिनिविशश्च (पा.सू. १/४/४७)

३. उपान्वध्याङ्वस: (पा.सू. १/४/४८)

अत्र सर्वत्र निर्दिष्ट: धातु: निर्दिष्ट: उपसर्ग: आधारकर्मसाधनस्य कृते अभिहिता: सन्ति । तेषामेव योगे इयं संज्ञा विधीयते ।

I. अधिशिङ्स्थासां कर्म (पा.सू. १/४/६)

'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायाद् अधिशब्दस्य प्रत्येकं सम्बन्ध: कार्य: । तथा च अधिशीङ् अधिस्था अध्यास् इति योगे आधारस्य कर्मशक्तिमत्ता बोध्यते । येन कर्मणि द्वितीया

१. अधि + शीङ् = अधिशेते = हरि: वैकुण्ठम् अधिशेते ।

२. अधि + स्था = अधितिष्ठति = हरि: वैकुण्ठम् अधितिष्ठति ।

३. अधि + आस् = अध्यास्ते = हरि: वैकुण्ठम् अध्यास्ते ।

II. अभिनिविशश्च (पा.सू. १/४/४७)

अभिनिशब्दयोर्द्वन्द्व: । द्वन्द्वे अल्पाच्तरम् इति पूर्वनिपातकरणं निशब्दस्य स्यात् । किन्तु अभिशब्दस्य पूर्वनिपातापत्त्या 'अभिनि' इति संघातस्यैव ग्रहणम् । तद्योगे आधारस्य कर्मशक्तिमत्ता बोध्यते । 'कर्मणि द्वितीया' इति द्वितीया ।

अभि + नि + विश् = अभिनिविशते = साधुः सन्मार्गमभिनिविशते ।

III. उपान्वध्याङ्वसः (पा.सू. १/४/४८)

उप-अनु-अधि-आङ्पूर्वकवस्धातोः आधारः कर्मसंज्ञको भवति । अत्र उप, अनु, अधि, आङ् इत्येतेषां संघातग्रहणं न । प्रत्येकं वसेरभिसम्बन्धः । पुनश्च लुग्विकरणस्य वसेर्नग्रहणम् । 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' इति परिभाषाबलात् । भ्वादिगणपठितस्य वस्धातोः ग्रहणं न तु 'वस आच्छादने अदादिगणपठितस्य वस्धातोः । वस्ते । उप/अनु/अधि/आ-वस्ते ।

उप, अनु, अधि, आङ् + वस = उप/अनु/अधि/आ वसति ।

हरिः वैकुण्ठम् उपवसति / अनुवसति / अधिवसति / आवसति ।

IV. अभुक्त्यर्थस्य न

भोजननिवृत्तिवाचकस्य वसेराधारः कर्म न । उदा. वने उपवसति ।

**स्वावलोकनप्रश्नाः**

१. आधारकर्मसाधनार्थं कौमुद्यां कति सूत्राणि सन्ति ।

२. 'अधिशीङ्स्थासां कर्म' इत्यत्र केन नियमेन अधिशब्दस्य प्रत्येकमभिसम्बन्धः ?

३. 'अभिनिविशश्च' इत्यत्र अभि + नि इति संघातस्य ग्रहणं प्रत्येकं ग्रहणं वा ?

४. उपान्वध्याङ्वसः' इत्यत्र कस्य वस्धातोः ग्रहणम् ?

५. कस्मिन्नर्थे वसेराधारः कर्म न ?

## ८.१३. कर्मप्रवचनीयाः

कर्म क्रियां प्रोक्तवन्तः = कर्मप्रवचनीयाः । बाहुलकात् भूतकाले अनीयर् कर्म प्र + वच् + अनीयर् = कर्मप्रवचनीय । तेन वर्त्तमानकाले क्रियां ये न प्रतिपादयन्ति त एव कर्मप्रवचनीयसंज्ञा लभन्ते । ते कर्मप्रवचनीयाः क्रियानिरूपितसम्बन्धविशेषं द्योतयन्ति । अव्ययस्य इयं संज्ञा परिकीर्त्तिता वर्त्तते । 'कर्मप्रवचनीयाः' इति नाम्ना एकमधिकारसूत्रम्, अस्याधिकारः 'विभाषा कृञि' (पा.सू. १/४/९८) इति यावत् वर्त्तते । निर्दिष्टः प्रसङ्गः, निर्दिष्टः अर्थः, निर्दिष्टमव्ययम् कर्मप्रवचनीयस्य कृते निर्द्धारिताः दृश्यन्ते । एतत् कृते कौमुद्यां दशसूत्राणि वर्त्तन्ते । अनु, उप, प्रति, परि, अभि, अधि, सु, अति, अपि इत्येते कर्मप्रवचनीयाः एतद्योगे द्वितीया विधीयते । कर्मप्रवचनीययुक्ते

द्वितीया (पा.सू. २/३/८) इति सूत्रेण द्वितीया । कर्मप्रवचनीयसंज्ञाविधायकानि सूत्राणि ।

१. अनुर्लक्षणे (पा.सू. १/४/८४) लक्षणे = लक्ष्यलक्षणभावसम्बन्धे अनुः कर्मप्रवचनीय ।
उदा. जपमनु प्रावर्षत ।

२. तृतीयार्थे (पा.सू. १/४/८५) तृतीयाशब्देन तन्निमित्तशब्दः 'सहयुक्तेऽप्रधाने' इत्यत्रोपात्त-सहशब्दः लक्षणया बोध्यते । उदा. नदीम् अन्ववसिता सेना ।

३. हीने (पा.सू. १/४/८५) हीने द्योत्ये अनुः कर्मप्रवचनीयः । उदा. नदीम् अन्वसिता सेना ।

४. उपोऽधिके च (पा.सू. १/४/८८) अधिके हीने च द्योत्ये 'उप' कर्मप्रवचनीयः ।
उदा. हरिम् उप सुराः ।

५. लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्य्यनवः (पा.सू. १/४/९०)
लक्षणे, इत्थभूते, भागे, वीप्सायाम् प्रति, परि, अनु, कर्मप्रवचनीयः ।
उदा. वृक्षं प्रति अनु वा विद्योतते विद्युत् ।
इत्थंभूताख्याने = भक्तो विष्णुं प्रति परि अनु वा ।
भागे = लक्ष्मीः हरिं प्रति परि अनु वा ।
वीप्सायाम् वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति ।

६. अभिरभागे (पा.सू. १/४/९१) भागवर्जे अभि कर्मप्रवचनीयः । उदा. हरिम् अभि वर्त्तते ।

७. अधिपरी अनर्थकौ (पा.सू. १/४/९२) अधि, परि यदा अनर्थकौ तदा कर्मप्रवचनीयौ ।
उदा. कुतः अध्यागच्छति, कुतः पर्य्यागच्छति ।

८. अतिरतिक्रमेण च (पा.सू. १/४/९५) अतिक्रमणे पूजायाञ्च इतिः कर्मप्रवचनीयः ।
उदा. देवान् अति कृष्णः ।

**स्वावलोकनप्रश्नाः**

१. को नाम कर्मप्रवचनीयः ?

२. 'कर्मप्रवचनीया': इति किम्भूतं सूत्रम् ?

३. जपमनु प्राबर्षत् रेखाङ्कितपदस्य सकारणं विभक्तिं निरूपयत ?

४. 'अधि', 'परि' कदा कर्मप्रवचनीयसंज्ञकौ स्तः ?

५. वृक्षं प्रति विद्योतते विद्युत् रेखाङ्कितपदस्य सकारणं विभक्तिं निरूपयत ?

## ८.१४. द्वितीयोपपदविभक्तिः

उपपदं निमित्तीकृत्य प्रयुज्यमाना विभक्तिः उपपदविभक्तिरिति व्यवहारः । निर्दिष्टानां पदानां योगेन विभक्तिः विचार्य्यते । सा उपपदविभक्तिः यस्यां विभक्तौ निरूप्यते सा तदुपपदविभक्तिरिति नाम्ना व्यवह्रियते । तेन क्रमेण द्वितीयोपपदविभक्तिविधानार्थं सूत्रमेकं वार्त्तिकवचनानि कौमुद्यामधिगतानि भवन्ति । एषा विभक्तिः सम्बन्धार्थिका पूर्वमत्र प्रतिपादितम् ।

**सूत्रम्**

१. अन्तराऽन्तरेण युक्ते (पा.सू. २/३/४)

अन्तरा अन्तरेण इति योगेन द्वितीयाविभक्तिः । अन्तरा मध्यार्थकः अन्तरेण व्यतिरिक्तार्थकः । उदा. त्वां मां च अन्तरा हरिः । हरिम् अन्तरेण सुखं नास्ति ।

**वार्त्तिकवचनानि**

१. उभसर्वतसोः कार्या धिगुपर्य्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्राऽपि दृश्यते ।। (वा)

उभयतः कृषणम् उभयतः गोपाः । उभयोः पार्श्वयोः ।

सर्वतः मथुरां सर्वतः गोपाः सन्ति । सर्वस्थानं व्याप्य ।

धिक् कृष्णभक्तं धिक् । निन्दा ।

उपर्युपरि लोकम् उपर्युपरि हरिः । उद्ध्र्वदेशः ।

अधोऽधः भूमिम् अधोऽधः जलं वर्त्तते । निम्नदेशः ।

२. अभिः परितः समया निकषा हा प्रतियोगेऽपि (वा) ।

अभितः (सम्मुखे) विद्यालयम् अभितः नदी वहति ।

परितः (सर्वत्र) ग्रामं परितः शस्यक्षेत्राणि सन्ति ।

निकषा (सन्निकटे) लङ्कां निकषा समुद्रोऽस्ति ।

हा (निन्दार्थकः) हा कृष्णभक्तम् ।

प्रति दीनं प्रति दया कर्त्तव्या ।

१. कालाध्वनोरत्यन्तसंयोगे (पा.सू. २/३/५)

कालाध्वनोरविच्छेद्यसंयोगे गम्ये द्वितीया स्यात् ।

उदा. मासम् अधीते । क्रोशं कुटिला नदी ।

**स्वावलोकनप्रश्नाः**

१. 'अन्तरा' इति शब्दयोगे का विभक्तिः ?

२. 'अन्तरेण' इति योगेन का विभक्तिः ?

३. 'उपर्य्युपरि' इत्येकस्योदाहरणं देयम् ?

४. 'परित:' इति योगेन का विभक्ति: ?

५. 'समया' इत्यस्य क: अर्थ: ?

६. मासम् अधीते इत्यत्र सकारणं विभक्तिं निरूपयत ?

II. **तृतीयाविभक्ति:**

## ८.१५. तृतीयाविभक्तिविधानोपाय:

विभक्तिक्रमे टा-भ्याम्-भिस् इति तृतीयाविभक्ति: । तस्या: विधानार्थं कौमुद्यां प्रमुखमेकं सूत्रम् कर्त्तृकरणयोस्तृतीया (पा.सू. २/३/१८) । कर्मणि तृतीया निर्द्दिष्टे स्थले विधीयते । उपपदविभक्तिविधानव्यवस्थाऽपि अपर: उपाय: । कर्त्तरि तृतीया, करणे तृतीया, उपपदद्वारा तृतीया इत्यपायत्रयम् कारकाधिकार: अनभिहिताधिकार: इत्युभयं प्रवर्त्तते । तेन अनभिहिते कर्त्तरि तृतीया, अनभिहिते करणे तृतीया विवेचनम् ।

**स्वावलोकनप्रश्नाः**

१. अनभिहिते कर्त्तरि का विभक्ति: ?

२. तृतीयाविभक्तिविधायकं सूत्रं किम् ?

३. करणे का विभक्ति: ?

## ८.१६. तृतीयाविभक्तिविधायकानि सूत्राणि

तृतीयाविभक्तिविधानार्थं प्रमुखमेकं सूत्रं वर्त्तते कर्त्तृकरणयोस्तृतीया (पा.सू. २/३/१८) कर्त्तृकरणयो: इति सप्तम्यन्तम्, तृतीया इति प्रथमान्तम् ।

कर्त्ता च करणञ्च कर्त्तृकरणे तयो: कर्त्तृकरणयो: इतरेतरयोगद्वन्द्व: । अनभिहिताधिकार: । अत: अनभिहितयो: कर्त्तृकरणयोस्तृतीया विभक्तिर्भवति । 'स्वतन्त्र: कर्त्ता' (पा.सू. १/४/५४) इति

कर्त्तृकारकम्, 'साधकतमं करणम्' (पा.सू. १/४/४२) इति करणकारकम् । उदा. कत्तरि देवदत्तेन कृतम् । करणे असिना छिन्नति ।

**स्वावलोकनप्रश्नाः**

१. कर्त्तृकरणयोरिति किं विभक्त्यन्तं पदम् ?

२. अनभिहिते कर्त्तरि का विभक्तिः ?

३. अनभिहिते करणे का विभक्तिः ?

## ८.१७. कर्त्तृसंज्ञाविधायकं सूत्रम्

स्वतन्त्रः कर्त्ता (पा.सू. १/४/५४) इति कर्त्तृसंज्ञाविधायकं सूत्रम् । क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्ता स्यात् । कारकाधिकारात् क्रियाजनने स्वातन्त्र्यमिह विवक्षितम् । स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वम् । फलानुकूलव्यापारो धात्वर्थः । 'स्थाली पचति' इत्यादौ स्वातन्त्र्याभावात् कथं कर्त्तृत्वम् । 'विवक्षतः कारकाणि भवन्ति' इति भाष्यात् स्थाल्यादीनां विवक्षावशतः स्वातन्त्र्यम् । सौकर्य्यातिशयं द्योतयितुं यत्र कर्त्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्त्तृसंज्ञा लभन्ते । प्रधानार्थकः स्वतन्त्रशब्दः स्वं तन्त्रं यस्य स इति विग्रहः । कर्मादिकारकाणां क्रियजनने न स्वातन्त्र्यम् । 'चैत्रः तण्डुलं पचति' इत्यत्र चैत्रशब्दस्य कर्त्तृत्वम्, न तु तण्डुलस्य ।

**स्वावलोकनप्रश्नाः**

१. कर्त्तृसंज्ञाविधायकं सूत्रं किम् ?

२. क्रियायां स्वातन्त्र्येण विवक्षितः अर्थः किं स्यात् ?

३. 'स्थाली पचती' इत्यत्र 'स्थाली' इत्यस्य केनोपायेन कर्त्तृसंज्ञा ?

४. स्वतन्त्रशब्दस्य कः अर्थः ?

५. स्वतन्त्रशब्दस्य किं विग्रहवाक्यम् ?

## ८.१८. करणसंज्ञाविधायकं सूत्रम्

१. साधकतमं करणम्

करणसंज्ञाविधायकं प्रमुखं सूत्रम् साधकतमं करणम् (पा.सू. १/४/४२) । साध्नोत्यनेनेति = साधकम् । अतिशयेन साधकमिति साधकतमम् । अतिशायने 'तमप्'प्रत्ययः । साधकतमं नाम प्रकृष्टोपकारकम् इत्यर्थः । कारकाधिकारात् 'क्रियासिद्धौ' इत्यर्थः । क्रियापदं धात्वर्थव्यापारजन्यफलपरम् । तेन फलसिद्धौ यत् प्रकृष्टोपकारकं कारकं तत् करणसंज्ञकं भवतीत्यर्थः ।

क्रियतेऽनेनेति करणमिति व्युत्पत्त्या महासंज्ञया साधकार्थलाभः, साधकग्रहणं व्यर्थं तत्र पुनः तमब्ग्रहणं व्यर्थमिति आशयः । अयं तु सिद्धान्तः यत् 'कारकाधिकारे प्रकर्षार्थप्रत्ययं विना शब्दसामर्थ्यगम्यार्थप्रकर्षो नाश्रीयते । तेन साधकार्थमात्रबोधकं साधकपदं न प्रकृष्टोपकारकार्थपरम् । अतः 'गङ्गायां घोषः' इति गौणाधारस्याधिकरणसंज्ञा ततः सप्तमी । 'आयारोऽधिकरणम्' इत्यत्र अधिक्रियतेऽस्मिन्निति अधिकरणम्, महासंज्ञया आधारलाभे सिद्धे आधारपदमाधारतमार्थं भविष्यतीति सर्वावयवव्याप्त्याधारस्याधिकरणसंज्ञा न तु गौणाधारे । अतः 'गङ्गायां घोषः' इत्यत्र गङ्गापदे गौणाधारे अधिकरणसंज्ञा न स्यात् । सूत्रे तमब्ग्रहणात् 'धनुषो वाणेन वाली हतः' इति वाक्ये धनुषो न करणसंज्ञा अपि तु वाणस्यैव । वाणव्यापारान्तरमेव प्राणवियोगरूपफलसिद्धिरिति प्रकृष्टोपकारकत्वं वाणे न धनुषि इति भावः । काशिकादौ कर्त्तुः व्यापारादनन्तरं यद्व्यापारेण फलनिष्पत्तिः तदेव कारकं करणमिति सिद्धान्तितम् । भर्त्तृहरिणा उक्तम्

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥

२. दिवः कर्म च (पा.सू. १/४/४३)

निर्दिष्टधातोः योगेन इयं संज्ञा विचारिता । अत्र साधकतमम्, कारकम्, चानुवर्त्तते । 'च'कारेण पूर्वतः करणस्यानुकर्षः । 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' इत्यनेकार्थकोऽयं दिव्धातुः । अतः दिव्धातुवाच्यव्यापारजन्यधात्वर्थफलसिद्धौ यत् प्रकृष्टोपकारकं कारकं कर्मसंज्ञकं करणसंज्ञकञ्च भवतीति सूत्रार्थः । दिवः साधकतमं कारकं कर्मसंज्ञं स्यात् चात् करणसंज्ञम् । उदा. <u>अक्षैः</u> <u>अक्षान्</u> वा दिव्यति । कर्मसंज्ञायां द्वितीया साधु, करणसंज्ञायां तृतीयया साधु ।

**स्वावलोकनप्रश्नाः**

१. करणसंज्ञाविधायकं सूत्रं किम् ?

२. साधकतमम् इति शब्दस्य प्रकृतिप्रत्ययविभाजनं कुरुत ?

३. क्रियासिद्धौ इत्यर्थः कथमागच्छति ?

| |
|---|
| ४. तमब्ग्रहणस्य फलं किम् ? |
| ५. काशिकायां करणस्य किं लक्षणं प्रतिपादितम् ? |
| ६. 'दिव: कर्म च' इति सूत्रेण किं क्रियते ? |
| ७. करणसंज्ञाया: फलं किम् ? |

## ८.१९. तृतीयोपपदविभक्ति:

उपपदं निमित्तीकृत्य प्रयुज्यमाना विभक्ति: = उपपदविभक्ति:, सम्बन्धार्थिका सा विभक्ति:, साक्षत् केषाञ्चित् पदानां योगेन पुनश्च केषुचित् उद्दिष्टेषु पदेषु विधीयते । षट् सूत्राणि वार्त्तिकवचनद्वयं तत्कृते उद्दिष्टानि भवन्ति । तथाहि

१. सहयुक्तेऽप्रधाने (पा.सू. २/३/१९)

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । सूत्रे युक्तग्रहणसामर्थ्यात् सहार्थपरत्वं तेन सहशब्दसमानार्थका: ये शब्दा: सार्द्धम्, साकम्, समम् इत्येतेषां योगेन तृतीया विधीयते । सहार्थेन कथनात् क्वचित् शब्दप्रयोगमन्तराऽपि तृतीया भवति । अत: सूत्रे 'वृद्धो यूना' इति तृतीयान्तेन निर्देश: सङ्गच्छते । अप्रधानग्रहणाभावे तृतीया न स्यात् कारकविभक्तित्वात् 'उपपदविभक्ते: कारकविभक्ति: वलीयसी' इति नियमेन प्रथमा स्यात् । उदा. पुत्रेण सहागत: पिता ।

२. येनाङ्गविकार: (पा.सू. २/३/२०)

येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते तत: तृतीया स्यात् ।

उदा. <u>अक्ष्णा</u> काण: । <u>पादेन</u> खञ्ज: । <u>कर्ण्याभ्यां</u> वधिर: ।

३. इत्थंभूतलक्षणे (पा.सू. २/३/२१)

अनेन एतेन वा प्रकारेणेति इत्थम् । इत्थं शब्द: प्रकारमात्रपर: प्राप्त्यर्थकाद् 'भू'धातो: कर्त्तरि 'क्त'प्रत्यय: । ततश्च इत्थंशब्देन समास: । अत: किञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात् ।

उदा. <u>जटाभि:</u> तापस: । <u>यज्ञोपवितेन</u> ब्राह्मण: ।

४. अपवर्गे तृतीयज्ञा (पा.सू. २/३/६)

अपवर्ग: = फलप्राप्ति:, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् । उदा. <u>मासेन</u> व्याकरणमधीतम् । यत्र फलप्राप्ति: न दृश्यते तत्र 'कलाध्वनोरत्यन्तसंयोगे' इति सूत्रेण द्वितीया । वालक: मासं व्याकरणमधीते । मासमभिव्याप्य व्याकरणं पठतीत्यर्थ: ।

५. संज्ञोऽन्यतरस्यां कर्मणि (पा.सू. २/३/२२)

सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् । पित्रा पितरं वा संजानीते ।

६. हेतौ (पा.सू. २/३/२३)

hb/[wh c n{H$H$ Ÿ&hËdW}V¥r` mñ` mV²Ÿ& दण्डेन घटः । हेतुकरणयोस्तु अयं भेदः । हेतुत्वञ्च द्रव्यगुणक्रियानिरूपितं निर्व्यापारसव्यापारवृत्तित्वरूपम् । करणत्वञ्च क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च । दण्डेन घटः इत्यत्र दण्डहेतुको घटः इति, दण्डस्य क्रियान्वयित्वाभावेन करणत्वं नास्ति ।

७. प्रकृत्यादिभ्य उपसंख्यानम् (वा)

प्रकृत्यादिगणपठितशब्देभ्यस्तृतीयाविभक्तिर्भवतीत्यर्थः । उदा. प्रकृत्या चारुः, प्रायेण यात्रिकः, गोत्रेण गार्ग्यः, समेनेति, विषमेनैति, द्विद्रोणेन धान्यं क्रीणाति । आकृतिगणोऽयम् ।

८. अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया (वा)

अशिष्टव्यवहारे 'दाण्' धातोः प्रयोगे सति चतुर्थ्यर्थे तृतीया स्यात् ।

दास्या संयच्छते कामुकः । धर्म्ये तु भार्य्यायै संयच्छते ।

**स्वावलोकनप्रश्नाः**

१. 'सहयुक्तेऽप्रधाने' इत्यत्र युक्तग्रहणस्य फलं किम् ?

२. 'सहयुक्तेऽप्रधाने' इत्यत्र 'अप्रधाने' ग्रहणस्य किम् ?

३. वृद्धो यूना इत्यत्र कथं तृतीया ?

४. 'येनाङ्गविकारः' इत्यस्योदाहरणमेकं देयम् ?

५. जटाभिः तापसः । रेखाङ्कितपदस्य विभक्तिनिरूपणं कुरु ?

६. हेतुकरणयोः को भेदः ?

७. गोत्रेण गार्ग्यः इत्यत्र कथं तृतीया ?

८. अशिष्टव्यवहारे दाण्धातोः प्रयोगे का विभक्तिः विधीयते ?

## ८.२०. सारांश:

द्वितीयाविभक्तेः तृतीयाविभक्तेश्च विचारव्यवस्था प्रतिपादिता । 'विभक्तिविधाने संज्ञा नियामिका भवति' इति विचारात् कर्मसंज्ञायाः करणसंज्ञायाः कर्त्तृसंज्ञायाश्च विधायकानि सूत्राणि व्युत्पादितानि । द्वितीयाविधानार्थम् उपायत्रयम् उपायत्रयम्, कर्मणि द्वितीया, कर्मप्रवचनीययुक्ते द्वितीया, उपपादनद्वारा द्वितीयाविभक्तिविधानव्यवस्था । कर्त्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम् इत्यादीनि अष्टौ सूत्राणि, यत्र ईप्सितं कर्म, यत्र ईप्सितं कर्म, अनीप्सितं कर्म, अकथितं कर्म, कर्त्तृकर्म, आधारकर्म इति कर्मसंज्ञा कर्मप्रवचनीयसंज्ञा, कर्मप्रवचनीयसंज्ञा, तद्युक्ते द्वितीया, 'अन्तराऽन्तरेण युक्ते' इत्युपपदविभक्तिः । कर्त्तृकर्मप्रतिपादनाऽवसरे 'अनुर्लक्षणे' इत्यादीनि सूत्राणि एवञ्च उपपदविभक्तिविचारवेलायां 'अभितः परितः समया निकषा .... इत्यादीनि वचनानि प्रतिपादितानि । तृतीयाविभक्तिविचारवेलायां कर्त्तृसंज्ञायाः करणसंज्ञायाः उपपादनम्, एकत्र 'दिवः कर्म च' इति सूत्रे कर्मसंज्ञायाः करणसंज्ञायाश्च उपस्थापनम्, उपपदविभक्तिप्रतिपादने 'सहयुक्तेऽप्रधाने', 'हेतौ', 'उपवर्गे तृतीया' इत्यादीनि सूत्राणि उपस्थापितानि । द्वितीयाविभक्तेः तृतीयाविभक्तेश्च विधानप्रसङ्गः यथाशास्त्रमुत्थापितः ।

## ८.२१. आदर्शप्रश्ना:

I. **निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)**

१. कर्मसंज्ञाविधायकानि सूत्राण्युपस्थाप्य तेषां तात्पर्य्यं विचारयत ?

२. कर्मप्रवचनीयसंज्ञाविधायकानि सूत्राणि विचारयत ?

३. तृतीयोपपदविभक्तिविचानव्यवस्थामुपस्थापयत ?

४. कर्त्तृसंज्ञाविधायकं करणसंज्ञाविधायकञ्च सूत्रं व्याख्यात ?

II. **विश्लेषणात्मकप्रश्ना: (प्रत्येकं १२/१० इङ्का:)**

१. कर्त्तुरीप्सिततमं कर्म इति सूत्रस्य व्याख्या कार्य्या ?

२. कर्मप्रवचनीयसंज्ञा परिष्कृत्य तत्साधनव्यवस्थां विशदयत ?

३. 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्म' इत्यादिसूत्रं परिष्कुरुत ?

४. करणसंज्ञाविधायकसूत्रं स्पष्टीकुरुत ?

५. द्वितीयाविधायकसूत्राण्युपस्थाप्य व्याख्यां कुरु ?

६. अनभिहिताधिकारं परिषकुरुत ?

७. तृतीयाकारकविभक्तेः विवेचनं कुरुत ?

८. कर्त्तृकर्मसंज्ञनिषेधविधायकवार्त्तिकानि परिष्कुरुत ?

III. **लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)**

१. 'कर्त्तुरीप्सिततमं कर्म' इति सूत्रे 'कर्त्तु:' 'कर्म' इति ग्रहणस्य फलमुपस्थापयत ?

२. 'अकथितं कर्म' इत्यस्य व्याख्या कार्य्या ?

३. आधारकर्म तद्विधायकानि सूत्राणि विवेचयत ?

४. 'अभित:-परित:-समया-निकषा-हा-प्रतियोगेऽपि' इति वार्त्तिकवचनं विवेचयत ?

५. 'कारके' इत्यधिकारसूत्रं विवेचयत ?

६. 'अन्तराऽन्तरेण युक्ते' इति सूत्रस्य व्याख्या कार्य्या ?

७. 'उपान्वध्याङ्वस:' इति सूत्रस्याशयं लिखत ?

८. 'साधकतमं करणम्' इति सूत्रे तमब्ग्रहणस्य फलं किम् ?

९. 'स्वतन्त्र: कर्त्ता' इति सूत्रं विवेचयत ?

१०. 'अपवर्गे तृतीया' इति सूत्राशयं लिखत ?

११. हेतुकरणयो: को भेद: ?

१२. 'प्रकृत्यादिभ्य: उपसंख्यानम्'

१३. 'इत्थंभूतलक्षणे' इत्यस्य तात्पर्य्यं लिखत ?

१४. 'अधिशीङ्स्थासां कर्म' इति सूत्रस्योदाहरणं देहि ?

१५. 'अभिनिविशश्च' सूत्रं विवेचयत ?

IV. **एकाङ्कप्रश्ना: (प्रत्येकं १ अङ्क:)**

१. कर्मणि का विभक्ति: ?

२. कर्मप्रवचनीययुक्ते का विभक्ति: ?

३. 'कर्मणि' इत्यत्र का विभक्ति: ?

४. 'कारके' इति किम्भूतं सूत्रम् ?

५. 'कारके' इति निर्द्धारणे सप्तमी कुत्र व्युत्पादितम् ?

६. अनभिहितशब्दस्य कोऽर्थ: ?

७. कस्मिन् पक्षे 'अनभिहिते' इति सूत्रारम्भ: सार्थक: ?

८. केनोपायेन अभिधानं जायते ?

९. कर्मसंज्ञा अर्थस्य शब्दस्य वा ?

१०. अनभिहिते कर्मणि का विभक्ति: ?

११. 'कर्मप्रवचनीययुक्ते' इत्यत्र क: समास: ?

१२. 'अन्तरा' इति शब्देन का विभक्ति: विधीयते ?

१३. विभक्तिविधाने का नियामिका भवति ?

१४. अनीप्सितकर्मसंज्ञाविधायकं सूत्रं किम् ?

१५. 'उपान्वध्याङ्वसः' इत्यनेन किं विधीयते ?

१६. 'कर्त्तुः इत्यत्र केन सूत्रेण षष्ठी ?

१७. 'ईप्सिततमं कर्म' इति सूत्रे कर्मग्रहणस्य फलं किम् ?

१८. अनीप्सितं कति विधम् ?

१९. 'अन्यपूर्वकम्' इत्यस्य किमुदाहरणम् ?

२०. 'वलिं याचते वसुधाम्' इत्यत्र कुत्र अकथितं कर्म ?

२१. हारयति कटं --------- (भृत्यम्/भृत्येन) अनयोः कः साधुः ।

२२. 'हरिः वैकुण्ठम् अध्यास्ते' इत्यत्र कर्मसंज्ञाविधायकं सूत्रं किम् ?

२३. कर्त्तरि का विभक्तिः ?

२४. स्वतन्त्रशब्दस्य कः अर्थः ?

२५. स्वतन्त्रशब्दस्य किं विग्रहवाक्यम् ?

२६. 'सहयुक्ते' इति सूत्रे सहशब्दस्य कोऽर्थः ?

२७. प्रकृत्यादि किम्भूतः गणः ?

२८. दण्डेन घटः । रेखाङ्कितपदस्य विभक्तिनिर्णयं कुरत ?

२९. वृद्धी यूना इत्यत्र कथं तृतीया ?

३०. साधकतमम् इति शब्दस्य का प्रकृतिः ? कः प्रत्ययः ?

## ८.२२. एकाङ्कप्रश्नानामुत्तराणि

१. द्वितीया २. द्वितीया ३. सप्तमी ४. अधिकरणसूत्रम् ५. काशिकायाम् ६. अनुक्तः ७. संख्याविभक्त्यर्थः ८. तिङ्कृत्तद्धितसमासैः ९. अर्थस्य १०. द्वितीया ११. तृतीयातत्पु. १२. द्वितीया १३. संज्ञा १४. तथायुक्तं चानीप्सितम् १५. आधारे कर्म १६. क्तस्य च वर्त्तमाने १७. आधारनिवृत्त्यर्थक १८. चतुर्विधम् १९. क्रूरमभिकुध्यति २०. वलिम् २१. उभयम् २२. अधिशीङ्स्थासां कर्म २३. तृतीया २४. प्रधानः २५. स्वं तन्त्रं यस्य सः २६. सहार्थ २७. आकृतिगणः २८. हेतौ तृतीया २९. सहयुक्तेऽप्रधाने ३०. साधक + तमप् ।

********

# ।। नवमखण्डः ।।

## चतुर्थी–पञ्चमी–विभक्तिविधानविचारः

### ९.१. प्रस्तावना

विभक्तिक्रमे ङे-भ्याम्-भ्यस् इति चतुर्थीविभक्तिः । एतस्याः विभक्तिविधाने सम्प्रदानसंज्ञा नियामिका भवति । सा च सम्प्रदानसंज्ञा एकेन प्रमुखेन सूत्रेण निश्चीयते ''कर्मणा यमभिप्रैति स सम्प्रदानम्'' अनेन वार्त्तिकेन पुनरवधार्य्यते ''क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्'' इति । एतदपेक्षया विशिष्टानि स्थलानि विद्यन्ते, यत्र निर्द्दिष्टाः धातवः अर्थादिनिबन्धनेन गृहीताः दृश्यन्ते । तेषां सूत्राणां योगेन सम्प्रदानसंज्ञा निरूपिता जायते । 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थीविभक्तिः । उपपदद्वारा चतुर्थीविभक्तिविधानव्यवस्था इष्यते । कर्मणिा चतुर्थीविभक्तिः, एकत्र सूत्रे करणसंज्ञा / संप्रदानसंज्ञा विकल्पेन विधानम्, एवमेव प्राप्तायाः सम्प्रदानसंज्ञायाः अपवादभूतं कर्मसंज्ञायाः विधानमिति भावेन प्रक्रियात्मकं कार्य्यमवधेयं विद्यते ।

ङसि-भ्याम्-भ्यस् इति पञ्चमीविभक्तिः । एतस्याः विधाने अपादानसंज्ञा नियामिका भवति । सा च अपादानसंज्ञा एकेन प्रमुखेन सूत्रेण निश्चीयते । 'ध्रुवमपायेऽपादानम्' । एतदपेक्षया विशिष्टानि स्थलानि वर्त्तन्ते यत्र निर्द्दिष्टाः धातवः निर्द्दिष्टेनाभिबन्धनेन गृहीताः विद्यन्ते । सप्त सूत्राणि सन्ति यैः एषा संज्ञा निरूपिता जायते । पञ्चम्युपपदविभक्तिः । अप, परि, आङ्, प्रति, इत्येतेषां कर्मप्रवचनीयसंज्ञा, निर्द्दिष्टानामर्थानामाश्रयणेन, तद्द्वारा पञ्चमी । चत्वारि सूत्राणि सन्ति यत्र द्वितीया, तृतीया, पञ्चमी इति विभक्तित्रयं विधीयते । एकेन सूत्रेण करणे तृतीया पञ्चमी इति विभक्तिद्वयं विधीयते । एवं भावेन पञ्च सोपानानि अवधारितानि विद्यन्ते यत्र पञ्चमीविभक्तिः विधीयते ।

### ९.२. उद्देश्यम्

**I. चतुर्थीविभक्तिः**

प्रियपाठकाः ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- चतुर्थीविभक्तिविधानोपायान् ज्ञास्यान्ति ।
- चतुर्थीविभक्तिविधायकं सूत्रमवगमिष्यन्ति ।
- सम्प्रदानसंज्ञाविधायकानि सूत्राणि ज्ञास्यन्ति ।
- कर्मणि चतुर्थी इति विधानं ज्ञास्यन्ति ।
- विकल्पेन करणसंज्ञा / सम्प्रदानसंज्ञा इत्यवगमिष्यन्ति ।
- चतुर्थ्युपपदविभक्तिं ज्ञास्यन्ति ।

**II. पञ्चमीविभक्तिः**

. पञ्चमीविभक्तिविधानोपायान् ज्ञास्यान्ति ।
. पञ्चमीविभक्तिविधायकं सूत्रमवगमिष्यन्ति ।
. अपादानसंज्ञाविधायकानि सूत्राणि ज्ञास्यन्ति ।
. कर्मप्रवचनीयद्वारा पञ्चमीविधानमवगमिष्यन्ति ।
. पञ्चम्युपपदविभक्तिमवधिगमिष्यन्ति ।
. द्वितीया–तृतीया–पञ्चमीविभक्तिविधानमवगमिष्यन्ति ।

## ९.३. चतुर्थीविभक्तिविधानोपायाः

चतुर्थीविभक्तेः विधानव्यवस्था उपायचतुष्टयमाधारीकृत्य कौमुद्यामुपपादिता विद्यते । तथाहि

१. सम्प्रदानसंज्ञां पुरस्कृत्य चतुर्थ्याः विधानम् ।
२. उपपदविभक्तिविधानव्यवस्थायां चतुर्थी ।
३. कर्मणि चतुर्थी । (उपपदविभक्तिः) ।
४. विकल्पेन करणसंज्ञा ? सम्प्रदानसंज्ञा, येन तृतीया/चतुर्थी इति विभक्तिविधानम् ।

सम्प्रदानसंज्ञां निमित्तीकृत्य यत्र चतुर्थी, तत्र 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी विधीयते । उपपदविभक्तिविधानव्यवस्थायां यत् सूत्रमुद्दिष्टं विद्यते तेनैव सूत्रेण चतुर्थी विधीयते । सूत्रेषु धातवः निर्द्दिष्टाः विद्यन्ते प्रत्ययश्च निर्द्दिश्टः, येषां योगेन कर्मणि चतुर्थी विभक्तिः साध्यते । कर्मणि द्वितीया यद्यपि सिद्धान्तः तथापि निर्द्दिष्टेषु स्थलेषु चतुर्थी । एषाऽपि उपपदविभक्तिः । तदर्थं चत्वारि सूत्राणि विचारितानि 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (पा.सू. २/३/१४), 'मन्यकर्मण्यनादरे .....' (पा.सू. २/३/२७) तुमर्थाच्च भाववचनात् (पा.सू. २/३/१५) गत्यर्थकर्मणि ... (पा.सू. २/३/१२) इति । एकमेव सूत्रं विद्यते 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' (पा.सू. १/४/४४) यत्र करणसंज्ञा सम्प्रदानसंज्ञा इति विकल्पेन उपतिष्ठत । तेन सम्प्रदानसंज्ञासाधनेन चतुर्थ्याः साधुत्वम् ।

**स्वावलोकनप्रश्नाः**

१. कां संज्ञां निमित्तीकृत्य चतुर्थीविभक्तिः विधीयते ?

२. चतुर्थीविभक्तिविधाने कौमुद्यां कति उपायाः सन्ति ?

३. कर्मणि चतुर्थीविभक्तिसाधने कति सूत्राणि उद्दिष्टानि ?

४. 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' इत्यनेन किं संज्ञाद्वयं विकल्पेन विचार्य्यते ?

## ९.४. चतुर्थीविभक्तिविधायकं सूत्रम्

चतुर्थीविभक्तिविधानार्थं मुख्यमेव सूत्रं 'चतुर्थी सम्प्रदाने' (पा.सू. २/३/१३) एतदपेक्षया चत्वारि सूत्राणि वर्त्तन्ते

१. क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा.सू. २/३/१४)
२. तुमर्थाच्च भाववचनात् (पा.सू. २/३/१४)
३. नमः स्वस्तिस्वाहास्वधाऽलंवषट्योगाच्च (पा.सू. २/३/१६)
४. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (पा.सू. २/३/१७)

अत्र सर्वत्र 'चतुर्थी' इति पदस्यानुवर्त्तनेनोपस्थितिः । अनभिहिताऽधिकारः कारकाऽधिकारश्च प्रवर्त्तेते । केवलं 'नमः स्वस्ति स्वाहास्वधाऽलंवषट् योगाच्च' (पा.सू. २/३/१६) इत्युपपदविभक्तिः । कर्मणि चतुर्थी तु अनभिहिते कर्मणि प्राप्तायाः द्वितीयायाः अपवादभूता ।

सम्प्रदानादिसंज्ञा अर्थस्य न शब्दस्य । सम्प्रदानार्थबोधकात् प्रातिपदिकात् चतुर्थी विभक्तिः भवति । अनभिहिते सम्प्रदानकारके चतुर्थी विभक्तिर्भवति इति विचारः । उदा. राजा विप्राय गां ददाति । इति । अभिहिते तु सम्प्रदानकारके चतुर्थी न भवति प्रथमा एव । तेन दीयतेऽस्मै ब्राह्मणाय एतदर्थबोधनाय बाहुलकात् सम्प्रदाने 'अनीयर्'प्रत्ययः, तदा अनीयर्प्रत्यये सम्प्रदानरूपार्थस्योक्ततया 'दानीयो विप्रः' इत्येव न तत्र विप्रस्य सम्प्रदानत्वम् ।

**स्वावलोकनप्रश्नाः**

१. चतुर्थीविभक्तिविधानार्थं मुख्यं सूत्रं किम् ?

२. चतुर्थीविभक्तिविधानार्थं कति सूत्राणि सन्ति ?

३. सम्प्रदानादिसंज्ञा शब्दस्य अर्थस्य वा ?

४. अभिहिते सम्प्रदानकारके का विभक्तिः ?

५. 'दानीयो विप्रः' इत्यत्र सम्प्रदानत्वं केनाभिधीयते ?

## ९.५. सम्प्रदानसंज्ञाविधायकानि सूत्राणि

चतुर्थीविभक्तिविधाने सम्प्रदानसंज्ञा नियामिका भवति । 'चतुर्थी सम्प्रदाने' इति सूत्रमेव प्रमाणम् । सा च सम्प्रदानसंज्ञा नवभि: सूत्रै: एकेन वार्त्तिकवचनेन च प्रतिपादिता विद्यते । एकेन सूत्रेण तस्या: अपवादभूता कर्मसंज्ञा पुनश्चापरेण सूत्रेण विकल्पेन विधीयमाना करणसंज्ञा विवेचनीयो दृश्यते ।

A. **सम्प्रदानसंज्ञाविधानम्**

I. सूत्राणि

१. कर्मणा यमभिप्रैति स सम्प्रदानम् (पा.सू. १/४/३२)
२. रुच्यर्थानां प्रीयमाण: (पा.सू. १/४/३३)
३. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान: (पा.सू. १/४/३४)
४. धारेरुत्तमर्ण: (पा.सू. १/४/३५)
५. स्पृहेरीप्सित: (पा.सू. १/४/३६)
६. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप: (पा.सू. १/४/३७)
७. राधीक्ष्योर्यस्य विप्रश्न: (पा.सू. १/४/३९)
८. प्रत्याङ्भ्यां श्रुव: पूर्वस्य कर्त्ता (पा.सू. १/४/४०)
९. अनुप्रतिगृणश्च (पा.सू. १/४/४१)

II. वार्त्तिकानि — एकमेव वार्त्तिकवचनमुद्दिष्टं विद्यते ।

१. क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् (वा. १०८५)

B. **सम्प्रदानसंज्ञानिषेध:**

एकमेव सूत्रं, येन कर्मसंज्ञा विधीयते । प्राप्ताया: सम्प्रदानसंज्ञाया: इयमपवादभूता ।

तद्यथा १. क्रुधद्रुहोरुपसृष्टयो: कर्म (पा.सू. १/४/३८) ।

C. **सम्प्रदानसंज्ञाया: वैकल्पिकविधानम्**

एकमेव सूत्रं, येन विकल्पेन करणसंज्ञा सम्प्रदानसंज्ञा चोपस्थिता विद्यते । तद्यथा

१. परिक्रयणे सम्प्रदानमन्यतरस्याम् (पा.सू. १/४/४४)

एषु 'कर्मणा यमभिप्रैति स सम्प्रदानम्' (पा.सू. १/४/३२) इति मुख्यमेव सूत्रम् । सर्वेषां सकर्मकधातूनां कृते तदुद्दिष्टम् । अकर्मकधातूनां कृते वार्तिकवचनं तदुपदिष्टम् । अन्यत्र सूत्रे 'रुच्', 'स्पृह्', 'द्रुह', 'प्रति'/आ + श्रु, 'अनु'/प्रति + गृण् इत्यादीनां धातूनां यथाविधि प्रसङ्ग: तस्या: संज्ञाया: कृतेऽभिबन्धनं कृतं दृश्यते ।

**सूत्राणि**

---

१. कर्मणा यमभिप्रैति स सम्प्रदानम् (पा.सू. १/४/३२)

सम्प्रदानमिति संज्ञा 'कर्मणा यमभिप्रैति' इति वाक्येनावबुद्ध आशय: संज्ञी । महत्या: एतस्या: सम्प्रदानसंज्ञाया: करणमन्वर्थत्वाय । यतोहि 'लघ्वर्थं संज्ञाकरणम्' 'संज्ञा नाम यतो न लघीय:' इति विवेचनीयं दृश्यते ।

सम्यग् प्रदीयतेऽस्मै तत् सम्प्रदानम् । दानक्रियाकर्मणा कर्त्ता यमभिप्रैति इच्छति संबध्नातीति वा तत् कारकं सम्प्रदानसंज्ञकमित्यर्थः । अतः 'अजां नयति ग्रामम्' इति प्रयोगे सम्प्रदानसंज्ञा न भवति । दानं तु स्वस्वत्वनिवृत्तिपुरस्सरं परस्वत्वोत्पादनं दानम् । अत एव 'रजकस्य वस्त्रं ददाति' इति वाक्ये दानस्याभावात् सम्प्रदानसंज्ञा न भवति । 'रजकाय वस्त्रं ददाति' इति वाक्यमसाधु । इदं सर्वं वृत्तिकारस्य मतम् । भाष्यकारमतेन सम्प्रदानमिति अन्वर्थसंज्ञकं न । प्राचामनुरोधेन महासंज्ञाकरणमिदं युक्तम् । रजकाय वस्त्रं ददाति, 'खण्डिकोपाध्यायः शिष्याय चपेटां ददाति' इत्यादिषु वाक्येषु सम्प्रदानसंज्ञा ततश्च चतुर्थीविभक्तिः सङ्गच्छते । वस्त्रनिष्ठमलनाशरूपफलसम्बन्धेन भृतिमान् रजको भवतु इतीच्छया भृतिरूपफलाश्रयत्वेन रजकस्य सम्प्रदानत्वम् ।

२. रुच्यर्थानां प्रीयमाणः (पा.सू. १/४/३३)

रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् । उदा. हरये रोचते भक्तिः ।

प्री धातोः कर्मणि शानच् = प्रीयमाणः । रुचिरर्थो येषां ते रुच्यर्थाः, तेषाम् ।

अन्यकर्त्तृकोऽभिलाषो रुचिरिति । अभिलषते रुच्यर्थत्वाभावेन तद्योगेन सम्प्रदानत्वं न। 'हरिर्भक्तिमभिलषति' इत्यत्र न हरेः सम्प्रदानत्वम् । 'रुच् दीप्तौ' इति दीप्त्यर्थकोऽपि रुच् धातुः तद्योगे सम्प्रदानत्वं न भवति । 'आदित्यः रोचते दिक्षु' इत्यत्र न सम्प्रदानत्वम् अधिकरण- कारकविवेचनया सप्तमी । 'भक्तिः हरिं प्रीणाति' इति वाक्येऽपि सम्प्रदानत्वम् न भवति 'प्रीयमाण' इत्यत्र कर्मणि शानच्निर्देशात् ।

३. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः (पा.सू. १/४/३४)

श्लाघृ = कत्थने, ह्नुङ् = अपनयने, ष्ठा = गतिनिवृत्तौ, शप = उपलाम्भे, एतेषां धातूनां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात् । ज्ञपयितुमिष्यमाणो योऽर्थः तत्कारकं सम्प्रदानसंज्ञं स्यात्। उदा. गोपी स्मरात् कृष्णाय श्लाघते, ह्नुते, तिष्ठते, शपते वा इति । श्लाघते नाम स्तौति ।

४. धारेरुत्तमर्णः (पा.सू. १/४/३५)

उत्तमर्णः = धनस्वामी । धृङ् धातोः णिचि धारि । धारयतेः प्रयोगे उत्तमर्णः सम्प्रदानसंज्ञो भवति । हरिः भक्ताय मोक्षाय धारयति । सूत्रे उत्तमर्णग्रहणाभावे देवदत्ताय शतं धारयति मार्गे इत्यत्र मार्गपदस्य नाधिकरणत्वम् ।

५. स्पृहेरीप्सितः (पा.सू. १/४/३६)

स्पृहधातुरिच्छार्थकः । स्पृहयते प्रयोगे इष्टः सम्प्रदानं स्यात् । उदा. वालिका पुष्पेभ्यः स्पृहयति । 'कर्त्तुरीप्सिततमम्' इति कर्मत्वाऽप्राप्त्या शेषे षष्ठी इति प्रप्ता बाधनार्थं सूत्रारम्भः । यत्र तु प्रकर्षविवक्षा तत्र 'कर्त्तुरीप्सिततमम्' इति कर्मसंज्ञा । वालिका पुष्पाणि स्पृहयति ।

६. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः (पा.सू. १/४/३७)

क्रुध = कोपे, द्रुह् = द्रोहे, ईर्ष्य = ईर्ष्यायाम्, असूया गुणेषु दोषाविष्करणम् एषामर्थ इवार्थो येषां धातूनामित्यर्थ: । तेषां प्रयोगे यं प्रति कोप: सम्प्रदानसंज्ञको भवति । उदा. हरये क्रुध्यति, द्रुह्यति, असूयति इति । यं प्रति कोप: इत्युक्तौ भार्य्यामीर्ष्यति इत्यत्र न सम्प्रदानसंज्ञा नात्र भार्य्यां प्रति कोप: ।

७. राधीक्ष्योर्यस्य विप्रश्न: (पा.सू. १/४/३९)

राध् = संसिद्धौ (दिवा) ईक्ष् = दर्शने । उभयोरिह शुभाशुभपर्य्यालोचनमर्थ: एतयो: कारकं सम्प्रदानं स्यात् । उदा. कृष्णाय राध्यति ईक्षते वा ।

८. प्रत्याङ्भ्यां श्रुव: पूर्वस्य कर्त्ता (पा.सू. १/४/४०)

प्रति च आङ् च इतरेतरयोगद्वन्द्व: ताभ्याम् = प्रत्याङ्भ्याम् । प्रति आङ् इत्येवंपूर्वस्य शृणोते: धातो: प्रयोगे पूर्वस्य कर्त्ता यस्तत्कारकं सम्प्रदानसंज्ञं स्यात् । प्रत्यङ्भ्यामित्यत्र द्विवचन–निर्द्देशात् पृथक्तया प्रत्येकं धातूनां योग: । उदा. विप्राय गां प्रतिशृणोति आशृणोति वा ।

९. अनुप्रतिगृणश्च (पा.सू. १/४/४१)

'अनु'पूर्वस्य 'प्रति'पूर्वस्य च गृणोतेर्धातो: प्रयोगे पूर्वस्य कर्त्ता यस्तत् कारकं सम्प्रदानसंज्ञ स्यात् । उदा. होत्रे अनुगृणाति, प्रतिगृणाति ।

**वार्त्तिकानि**

क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् (वा. १०८५)

अकर्मकधातुयोगे सम्प्रदानसंज्ञाविधायकमिदं वार्त्तिकम् । उदा. पत्ये शेते । माता चन्द्रं दर्शयति ।

**सम्प्रदानसंज्ञानिषेध:**

एकमेव सूत्रम् । 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप:' इति सूत्रेण प्राप्ताया: सम्प्रदानसंज्ञाया: निषेधार्थं सूत्रम्

क्रुधद्रुहोरुपसृष्टयो: कर्म (पा.सू. १/४/३८)

उपसृष्टयो: = उपसर्गपूर्वकयो: क्रुधद्रुहो: प्रयोगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञकं भवति । उदा. देवदत्तम् अभिक्रुध्यति / अभिद्रुह्यति ।

**सम्प्रदानसंज्ञाया: वैकल्पिकविधानम्**

एकमेव सूत्रम् । 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' (पा.सू. १/४/४४) । क्रयस्य समीपं परिक्रियणम् (अव्ययीभाव:) तस्मिन् परिक्रयणे = नियतकालं वेतनादिना स्वीकरणे साधकतमं तत् कारकं तत् सम्प्रदानसंज्ञकं भवति विकल्पेन । उदा. शताय / शतेन परिक्रीतोऽनुब्रुहि ।

**स्वावलोकनप्रश्नाः**

१. चतुर्थीविभक्तिविधाने का संज्ञा नियामिका भवति ?

२. सम्प्रदानसंज्ञाविधानार्थं वार्त्तिकवचनं किम् ?

३. 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति केषां धातूनां कृते उद्दिष्टम् ?

४. प्रीयमाणशब्दस्य व्युत्पत्तिं प्रदर्शयति ?

५. 'रुच्यर्थानाम्' इति शब्दस्य कथं विग्रहः ?

६. 'उत्तमर्ण' इति शब्दस्य कोऽर्थः ?

७. स्पृहयतेः प्रयोगे इष्टः किं स्यात् ?

८. 'असूयति' इति योगेन का विभक्तिः विधीयते ?

९. प्रत्यङ्भ्याम् इत्यत्र द्विवचनेन किं ज्ञायते ?

१०. 'अनुप्रतिगृणश्च' इति सूत्रेण किं क्रियते ?

११. क्रुधद्रुहोरुपसृष्टयोः कर्म' इति सूत्रेण किं विधीयते ?

१२. 'परिक्रयणे' इति शब्दस्य का व्युत्पत्तिः ?

## ९.६. चतुर्थ्युपपदविभक्तिः

उपपदद्वारा चतुर्थीविभक्तिः विधीयते । सा पुनः कर्मणि अनुष्ठीयते । कर्मणि चतुर्थी इति व्यवहारः । तदर्थमिमानि सूत्राणि वार्त्तिकवचनानि च वर्त्तन्ते

**सूत्राणि**

१. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि (पा.सू. २/३/१२)

२. क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा.सू. २/३/१३)

३. तुमर्थाच्च भाववचनात् (पा.सू. २/३/१४)

४. नमः स्वस्ति स्वा स्वधाऽलंवषट्योगाच्च (पा.सू. २/३/१६)

५. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (पा.सू. २/३/२७)

**वार्त्तिकवचनानि**

१. तादर्थ्ये चतुर्थी वाच्या वा.

२. क्लृपि सम्पद्यमाने च वा.

३. उत्पातेन ज्ञापिते च वा.

४. हितयोगे च वा.

५. अलमिति पर्य्याप्त्यर्थग्रहणम् वा.

६. अप्राणिष्वत्यपनीयं नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्' (वा.)

**सूत्राणि**

१. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि (पा.सू. २/३/१२)

गत्यर्थका ये धातवः तेषां कर्मवाचकात् अध्वभिन्नात् द्वितीयाचतुर्थ्यौ च भवतश्चेष्टायाम् । अध्वपदेन न स्वरूपस्य ग्रहणं किन्तु अर्थग्रहणम् । कर्मणि इति सप्तमीनिर्द्देशः तत्र हेतुः । अन्यथा अनध्वनः इति निर्द्देशः स्यात् । उदा. ग्रामं / ग्रामाय गच्छति । मनसा हरिं व्रजति इति वाक्ये चेष्टायामित्यभावात् सूत्रमिदं न प्रवर्त्तते चेष्टापदेन शरीरक्रिया एव गृह्यते । 'पन्थानं गच्छति' इत्यत्र अध्ववाचकशब्दस्य कर्मभावेनोपपादनात् सूत्रमिदं नोपतिष्ठते । कर्मणि द्वितीया भवति ।

२. क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा.सू. २/३/१३)

क्रिया अर्थः = प्रयोजनं यस्या सा क्रियार्था सा = क्रियार्थाक्रिया उपपदं यस्य तस्येत्यर्थः। स्थानिशब्दः अप्रयुज्यमानवाची । तुमुन् = इदमुपलक्षणम् ण्वुल् इत्यस्यापि ग्रहणम् । क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् । फलानि आहर्त्तुं गच्छति । फलाय गच्छति ।

३. तुमर्थाच्च भाववचनात् (पा.सू. २/३/१५)

'भाववचनाश्च' इति सूत्रेण यो विहितस्तदन्तात् चतुर्थी स्यात् । यागाय याति । यष्टुं याति इत्यर्थः । 'भावे' इत्यधिकृत्य ये घञादिप्रत्यया: विहिताः ते क्रियार्थक्रियायामुपपदभूतायां भविष्यति स्युरिति ।

४. नमः स्वस्ति स्वाहा स्वधाऽलं वषट् योगाच्च (पा.सू. २/३/१६)

एभिः योगे चतुर्थी स्यात् ।

नमः = हरये नमः ।

स्वस्ति = प्रजाभ्यः स्वस्ति ।

स्वाहा = अग्नये स्वाहा ।

स्वधा = पितृभ्य: स्वधा ।

अलम् = दैत्येभ्य: हरिरलम् ।

वषट् = इन्द्राय पुष्पाणि वषट् ।

देवान् नमस्करोति इति वाक्ये देवान् इत्यत्र द्वितीया । सा च कारकविभक्ति: । नम: + करोति = नमस्करोति, 'नम:' इति योगेन प्राप्ता विभक्ति: उपपदविभक्ति:, करोति इति द्वारा प्राप्ता विभक्ति: कारकविभक्ति:, युगपदुभयविभक्तिप्राप्तौ कारकविभक्ते: वलीयस्त्वम् । 'उपपदविभक्ते: कारकविभक्तिर्बलीयसी' इति वचनात् ।

५. मन्यकर्मण्यनादारे विभाषाऽप्राणिषु (पा.सू. २/३/२७)

'मन् ज्ञाने', 'मनु अवबोधने' इति धातुद्वयम् । आद्यो दिवादि:, अन्यस्तनादि: । सूत्रे मन्य इति श्यन्विकरणघटितनिर्द्देश: । न यक्घटितनिर्द्देश: । कर्मणि यकि कर्मण उक्तत्वात्, अस्मिन् सूत्रे 'अनभिहिते' इत्यस्याधिकारसत्त्वेनानभिहितं कर्म न सम्भवेत् । अतो न यका निर्द्देश: । श्यन्विकरण-घटितमन्धातुयोगे एवेदं प्रवर्त्तते इति तु न, श्यन् उपलक्षणत्वेन दौवादिकमन्धातुयोगेऽनेन चतुर्थी । अप्राणिषु = प्राणिभिन्नेषु । विभाषा = विकल्पेन । अनादरे = तिरस्कारे । प्राणिवर्जे मन्यते कर्मणि चतुर्थी वा स्यात् तिरस्कारे । उदा. न त्वां तृणं तृणाय वा मन्ये ।

**वार्त्तिकवचनानि**

१. तादर्थ्ये चतुर्थी वाच्या (वा)

तस्मै = कार्य्यायेदं तदर्थम् = कारणम् । तस्य भावस्तादर्थ्यम् । अत्र उपकार्योपकारक-भावसम्बन्धो विवक्षित: । उपकार्य्यादेव चतुर्थी । उदा. यूपाय दारु । कुण्डलाय हिरण्यम् । उपकार्यत्वं तु बहुविधम् जन्यत्वादि । मुक्तये हरिं भजति, ब्राह्मणाय दधि इति । पुनश्च अत्रापि षष्ठीवत् सम्बन्धप्रतियोगिवाचकादेव चतुर्थी न तु सम्बन्धानुयोगिवाचकविशेष्यदध्यादिभ्य: ।

२. क्लृपि सम्पद्यमाने च (वा)

'क्लृपि' इति सप्तमी, सम्पत्ति: विकारात्मना उत्पत्ति:, परिणाम इति यावत् । क्लृपि धातौ प्रयुज्यमाने सति सम्पद्यमानेऽर्थे वर्त्तमानात् चतुर्थी वाच्या । प्रकृतिविकृत्योर्भेदविवक्षायां चतुर्थी अभेदविवक्षायां तु प्रथमैव । भक्तिर्ज्ञानं कल्पते । यद्यपि 'तादर्थ्ये चतुर्थी' इति चतुर्थी सिद्धा तथापि इदं वार्त्तिकवचनं परिणामार्थबोधनार्थम् । उदा. भक्ति: ज्ञानाय कल्पते, सम्पद्यते, जायते इति ।

३. उत्पातेन ज्ञापिते च (वा)

प्राणिनां शुभाशुभसूचको भूतविकार: उत्पात: । शुभसूचक: उत्पात इति लोके प्रमाणाभावात् अशुभशुचको भूतविकार: उत्पात: गृह्यते । तेन सूचितेऽर्थे विद्यमानात् चतुर्थी वाच्या इति । अत: 'वाताय कपिला विद्युत्' ।

४. हितयोगे च (वा)

हित योगे चतुर्थी वाच्या । पुनश्च वार्त्तिकेऽस्मिन् 'च'कारोपपादनात् सुखयोगेऽपि चतुर्थी स्यात् । इदं नापूर्ववचनम् । 'चतुर्थी तदर्थार्थ' इति समासविधानज्ञापितार्थमनुवदति । उदा. ब्राह्मणाय हितम्, ब्राह्मणाय सुखम् इति ।

५. अलमिति पर्य्याप्त्यर्थग्रहणम् (वा)

अलमित्यनेन पर्याप्त्यर्थकशब्दानां ग्रहणमित्यर्थ: ।

उदा. दैत्येभ्यो हरिरलं प्रभु: समर्थ: शक्त: ।

६. अप्राणिष्वत्यपनीय 'नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्' (वा)

'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रे वार्त्तिकमिदं पठितम् । प्राणिवर्जे मन्यते: कर्मणि चतुर्थी विकल्पेन स्यात् अनेन वार्त्तिकेन तु नौ-काक-अन्न-शुक-शृगालवर्जितानां शब्दानां नियमनं क्रियते । एतद्विहाय अन्येषां द्वितीया चतुर्थी स्यात् मन्यकर्मण्यनादरे इत्याशय: । उदा. 'न त्वा' नावमन्तं वा मन्ये' ।

**स्वावलोकनप्रश्नाः**

१. चतुर्थ्युपपदविभक्तिविधानार्थं कानि सूत्राणि सन्ति ?

२. चतुर्थ्युपपदविभक्तिविधानार्थं कानि वार्त्तिकवचनानि सन्ति ?

३. अध्वपदेन स्वरूपस्य ग्रहणमर्थस्य ग्रहणं वा ?

४. मनसे हरिं व्रजति इति वाक्यस्य संशोधनं कुरु ?

५. 'क्रियार्थोपपदस्य' इत्यस्य विग्रहवाक्यं किम् ?

६. 'अलम्' इति योगेन का विभक्ति: ?

७. 'मन्यकर्मण्यनादरे ......' इत्यत्र कस्य मन् धातो: ग्रहणम् ?

८. 'तादर्थ्ये चतुर्थी वाच्या' इत्यत्र किम्भूत: सम्बन्ध: विवक्षित: ?

९. 'क्लृपि सम्पद्यमाने च' इत्यत्र कीदृशविवक्षायां चतुर्थी ?

१०. को नाम उत्पातः ?

११. स त्वां काकाय मन्यते इत्यस्य संशोधनं कुरु ?

१२. ब्राह्मणाय सुखम् इत्यत्र केन चतुर्थी ?

१३. उपपद्विभक्तेः का विभक्तिः वलीयसी ?

१४. नमः योगे का विभक्तिः ?

१५. 'शवरी फलाय याति' इति वाक्ये 'फलाय' इत्यत्र केन सूत्रेण चतुर्थी ?

## ९.७. पञ्चमीविभक्तिविधानोपायाः

पञ्चमीविभक्तेः विधानव्यवस्था उपायचतुष्टयमाधारीकृत्य कौमुद्यामुपपादिता विद्यते । तथाहि

१. अपादानसंज्ञां पुरस्कृत्य पञ्चम्याः विधानम् ।
२. कर्मप्रवचनीययोगे पञ्चमी ।
३. उपपदविभक्तिविधानव्यवस्थायां पञ्चमी ।
४. उपपदविभक्तिविधानव्यवस्थायां द्वितीया/तृतीया/पञ्चमी ।

अपादानसंज्ञां निमित्तीकृत्य यत्र पञ्चमी तत्र 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विधीयते । अपादानसंज्ञा-विधानार्थं प्रमुखमेकं सूत्रं 'ध्रुवमपायेऽपादानम्' एतदपेक्षया सप्त सूत्राणि वर्त्तन्ते यत्र निर्दिष्टधातूनां निर्दिष्टार्थसहितेन अपादानसंज्ञा विधीयते । उपपदविभक्तिविधानव्यवस्थायां यत् यत् सूत्रमुद्दिष्टं विद्यते तेनैव सूत्रेण पञ्चमीविभक्तिः विधीयते । कर्मप्रवचनीयसंज्ञां पुरस्कृत्य पञ्चम्याः विधानमपीष्यते । वार्त्तिक-वचनमपि तद्विधौ प्रवर्त्तते ।

**स्वावलोकनप्रश्नाः**

१. पञ्चमीविभक्तिविधानार्थं का संज्ञा नियामिका भवति ?

२. पञ्चमीविभक्तिविधानार्थं कति उपायाः सन्ति ?

## ९.८. पञ्चमीविभक्तिविधायकं सूत्रम्

पञ्चमीविभक्तिविधानार्थं मुख्यमेव सूत्रम् 'अपादाने पञ्चमी' (पा.सू.२/३/२८) अपादानसंज्ञा अर्थस्य न तु शब्दस्य । अपादानार्थबोधकात् प्रातिपदिकात् पञ्चमीविभक्तिः भवति । अनभिहिते अपादानकारके पञ्चमीविभक्तिर्भवतीति विचारः । प्रत्ययादिना अभिहिते तु प्रथमा, सा तु पदसाधुत्वसम्पादिका । किन्तु कर्मादिकारकवत् अनभिहितप्रसङ्गे अभिहितप्रसङ्गे च यथा व्यवस्था तथैवात्र न दृश्यते । ''यदा यदीयो व्यापारः धातुनाऽभिधीयते तदा स कर्त्ता, स्थाली पचति ....'' कर्त्तृ-कर्म-करण-अधिकरणकारकाणां विवक्षाभेदेन भिन्नभिन्नरूपेण परिणतिरिति विवेचनमपादानकारकस्य तथैव विवेचनमपादानकारकस्य तथैव विवेचनं न दृश्यते ।

कर्मप्रवचनीयद्वारा उपपदद्वारा च पञ्चमीविभक्तेः व्यवहारविवेचनं पञ्चमीति पदप्रयोगसरं कृतं दृश्यते । तद्यथा 'अन्यारार्षीदीतरर्त्ते दिक्छब्दाञ्चुतर पदाजाहियुक्ते' (२/३/२९), पञ्चम्यपाङ्परिभिः (२/३/१०), अकर्तर्युणे पञ्चमी (२/३/२४) पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् (२/३/३२), विभाषा गुणेऽस्त्रियाम् (२/३/२५) करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य (२/३/३३) इति ।

**स्वावलोकनप्रश्नाः**

१. अपादानकारके का विभक्तिः विधीयते ?

२. अपादानसंज्ञा शब्दस्य अर्थस्य वा ?

३. 'अपादाने पञ्चमी' इति सूत्रे अनभिहिताऽधिकारः प्रवर्त्तते न वा ?

४. कर्त्तृ-कर्म-करणादिकारकवत् अपादानस्य अभिधानं भवति न वा ?

५. अपादानकारकं विहाय अन्येन केनोपायेन पञ्चम्याः विधानमिष्यते ?

## ९.९. अपादानसंज्ञाविधायकानि सूत्राणि

पञ्चमीविभक्तिविधाने अपादानसंज्ञा नियामिका भवति । 'अपादाने पञ्चमी' इति सूत्रमेव प्रमाणम् । सा च अपादानसंज्ञा अष्टाभिः सूत्रैः एकेन वार्त्तिकेन च प्रतिपादिता विद्यते । तद्यथा

सूत्राणि
१. ध्रुवमपायेऽपादानम् (पा.सू. १/४/२४) ।
२. भीत्रार्थानां भयहेतुः (पा.सू. १/४/२५) ।

३. पराजेरसोढः (पा.सू. १/४/२६) ।
४. वारणार्थानामीप्सितः (पा.सू. १/४/२७) ।
५. अन्तर्धौ येनाऽदर्शनमिच्छति (पा.सू. १/४/२८) ।
६. जनिकर्त्तुः प्रकृतिः (पा.सू. १/४/३०) ।
७. भुवः प्रभवः (पा.सू. १/४/३१) ।
८. आख्यातोपयोगे (पा.सू. १/४/२९) ।

वार्त्तिकवचनम्

१. जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम् (वा) ।

**सूत्राणि**

१. ध्रुवमपायेऽपादानम् (पा.सू. १/४/२४)

अपादानम् इति संज्ञा । 'ध्रुवमपाये' इत्यनेनावबोधित आशयः संज्ञी । ध्रुवम् = ध्रु गतिस्थैर्ययोः अस्मात् पचाद्यच् कुटादित्वात् ङित्वेनोवङ् ध्रु + अच् । ध्रु + उवङ् + अच् । ध्रुव । ध्रुवस्थैर्ये इति धातोः 'इगुपध' इति सूत्रेण 'क'प्रत्ययः । ध्रुव + क = ध्रुव । अपायः = विभागजनको व्यापारः विश्लेषः । अतएव अपायो विश्लेषः, तस्मिन् साध्ये ध्रुवमवधिभूतं कारकम् अपादानं स्यात् । विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितोऽपि संबन्धपूर्वको बुद्धिपरिकल्पितोऽपि । कर्त्तृवारणाय ध्रुवमिति । द्वयोः संयुक्तयोरन्यतरस्य चलनाद्विश्लेष इति स्थितिः । तत्र तादृशचलश्राश्रयभूतं ध्रुवम् । तच्चेह अवधिभूतं विवक्षितम् ।

२. भीत्रार्थानां भयहेतुः (पा.सू. १/४/२५)

भीश्च त्राश्च भीत्रौ, भीत्रौ अर्थौ येषां ते भीत्रार्थाः तेषां द्वन्द्वगर्भबहुब्रीहिः । भयस्य हेतुः = भयहेतुः द्वन्द्वान्ते श्रूयमाणत्वात् अर्थशब्दस्य प्रत्येकं योगः । भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात् । उदा. चौराद् विभेति, चौरात् त्रायते । भयकारणवचकात् हेतौ तृतीया प्राप्ता तां बाधित्वाऽनेनापादानसंज्ञा तेन पञ्चमी, न तृतीया । सूत्रे 'भयस्याभावे तु सर्वविभक्तियपवादत्वेन अरण्ये विभेति इत्यत्रापि पञ्चमी स्यात् । अरण्यं न भयहेतुः, अतः अधिकरणत्वेन सप्तमी ।

३. पराजेरसोढः (पा.सू. १/४/२६)

'सह'धातोः 'क्त'प्रत्यये प्रक्रियात्मककार्य्ये सोढ् न सोढः = असोढः सोढुं शक्यते इति सोढः । परा पूर्वस्य जयतेः धातोः प्रयोगेऽसोढः यः अर्थः तत् कारकमपादानसंज्ञं स्यात् । हेतुतृतीयायाः अपवादः । उदा. अध्ययनात् पराजयते । पराजयते नाम ग्लायति । यदा तु अभिभवति तिरस्करोति इत्थर्थः तदा पञ्चमी न द्वितीया एव शत्रून् पराजयते ।

४. वारणार्थानामीप्सितः (पा.सू. १/४/२७)

प्रवृत्तिविमुखीकरणम् = वारणम् । वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं

स्यात् । उदा. भवेभ्यो गां वारयति । यवेभ्यो गां वारयति क्षेत्रे इत्यत्र क्षेत्रस्य ईप्सितत्वाभावात् अपादानसंज्ञा न ।

५. अन्तर्धौ येनादर्शनमिच्छति (पा.सू. १/४/२८)

अन्तर्धि = व्यवधानम् । व्यवधाने सति यत् कर्त्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात् । मातुः निलीयते कृष्णः । व्यवधानरूपार्थाभावेन चौराणां कर्मत्वम् चौरान् न दिदृक्षते।

६. आख्यातोपयोगे (पा.सू. १/४/२४)

आख्यात = वक्ता, उपयोग = ब्रह्मचर्य्यादिरूपनियमपूर्वकविद्यास्वीकारः नियमपूर्वक-विद्यास्वीकारे वक्ता अपादानसंज्ञको भवति । उदा. उपाध्यायात् अधीते ।

७. जनिकर्त्तुः प्रकृतिः (पा.सू. १/४/३०)

जनी = प्रादुर्भावे इति धातुः । धातुस्वरूपनिर्द्देशे इक्प्रत्ययः । जनेः कर्त्ता = जनिकर्त्ता । OÝ Wb© H$m@Vñ` `mà H$V: = CnmXmZH$maU_²VV² H$maH$_nmXmZg§§ñ` mV² Ÿ& <u>ब्रह्मणः</u> प्रजा प्रजायन्ते ।

८. भुवः प्रभवः (पा.सू. १/४/३१)

भवनं भूः । भूकर्त्तुः प्रभवः अपादानसंज्ञको भवति । हिमवतः गङ्गा प्रभवति ।

**वार्त्तिकवचनम्**

जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम् (वा.१०७९)

जुगुप्सा = निन्दा, विरमणम् = विरामः, कार्यकरणाद् विरतिः । प्रमादः = अज्ञानलक्षणः, अनवधानलक्षणो वा । एतेषां योगे अपादानसंज्ञा भवति । उदा. <u>पापात्</u> जुगुप्सते । <u>पापात्</u> विरमति । <u>धर्मात्</u> प्रमाद्यति ।

**स्वावलोकनप्रश्नाः**

१. पञ्चमीविभक्तिविधाने का संज्ञा नियामिका भवति ?

२. अपादानसंज्ञाविधाने कति सूत्राणि सन्ति ?

३. ध्रुवशब्दः कस्माद् धातोः निष्पद्यते ?

४. को नाम अपायः ?

५. ध्रुवपदग्रहणस्य फलं किम् ?

६. भीत्रार्थशब्दस्य कः समासः ?

७. अरण्ये विभेति इत्यत्र अरण्ये इत्यत्र कथं अपादानं न ?

८. अध्ययनात् पराजयते इति वाक्ये 'पराजयते' इत्यत्र कः अर्थः विवक्षितः ?

९. मातुः निलीयते कृष्णः इति वाक्ये 'मातुः' का संज्ञा ?

१०. 'साधुः' पापात् जुगुप्सते' इति वाक्ये 'पापात्' इत्यत्र केन अपादानसंज्ञा ?

## ९.१०. कर्मप्रवचनीयद्वारा अपादानसंज्ञायां पञ्चमी

कर्मप्रवचनीयद्वारा अपादानसंज्ञा विहिता जायते । ते च कर्मप्रवचनीयाः अप, आङ्, परि, प्रति । प्रत्येकं स्वतन्त्रमर्थमादाय कर्मप्रवचनीयसंज्ञां लभन्ते । तद्योगे अपादानसंज्ञायाम् 'अपादाने पञ्चमी' इत्यनेन पञ्चमीविभक्तिः ।

१. अपपरी वर्जने (पा.सू. १/४/८८)

अपपरी शब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञकौ निपातसंज्ञकौ च भवतः । तेन पञ्चम्यपाङ्परिभिः (पा.सू. २/३/१०) इत्यनेन पञ्चमी । उदा. अपत्रिगर्त्तेभ्यो वृष्टो देवः । परित्रिगर्त्तेभ्यो वृष्टो देवः ।

२. आङ् मर्यादावचने (पा.सू. १/४/८८)

मर्यादावचने आङ् कर्मप्रवचनीयसंज्ञको निपातसंज्ञकश्च भवति । तेन 'पञ्चम्यपाङ्परिभिः' (पा.सू. २/३/१०) इत्यनेन पञ्चमी । आ पाटलिपुत्राद् वृष्टो देवः । आ कुमारेभ्यो यशः पाणिनेः ।

३. प्रतिः प्रतिनिधिप्रतिदानयोः (पा.सू. १/४/९२)

प्रतिशब्दः प्रतिनिधिप्रतिपादनविषये कर्मप्रवचनीयसंज्ञः निपातसंज्ञश्च भवतः । तेन प्रतिनिधिप्रतिदाने च यस्मात् (पा.सू. २/३/११) इति सूत्रेण पञ्चमी स्यात् । प्रद्युम्नः कृष्णात् प्रति ।

**स्वावलोकनप्रश्नाः**

१. प्रति कस्मन्नर्थे कर्मप्रवचनीयसंज्ञको भवति ?

२. अपपरी शब्दौ कस्मिन्नर्थे कर्मप्रवचनीयसंज्ञकौ भवतः ?

३. कर्मप्रवचनीययोगे पञ्चमीविधायकं सूत्रद्वयं किम् ?

४. प्रद्युम्नः कृष्णात् प्रति इति वाक्ये कृष्णात् इत्यत्र केन सूत्रेण पञ्चमी ?

५. आ कुमारेभ्यो यशः पाणिनेः इति वाक्ये 'कुमारेभ्यः' इति केन सूत्रेण पञ्चमी ?

## ९.११. पञ्चम्युपपदविभक्तिः

उपपदद्वारा पञ्चमीविभक्तिः विधीयते । तदर्थमिमानि सूत्राणि

१. अन्यारादितरर्तेदिक्शब्दाञ्चुतरपदाजाहियुक्ते (२/३/२९)

एतेषां योगे पञ्चमी स्यात् ।

| | | | |
|---|---|---|---|
| अन्यः | (भिन्नः) | कृष्णात् अन्यः । | |
| आरात् | (दूरे) | वनाद् आरात् नदी वहति । | |
| ऋते | (व्यतीतः) | धर्मात् ऋते सुखं नास्ति । | |
| पूर्वः | | ग्रामात् पूर्वः क्षेत्रमस्ति । | |
| अञ्चुतर | प्राक् | (पूर्वस्मात्) | विद्यालयात् प्राक् मम गृहम् । |
| | प्रत्यक् | ग्रामात् प्रत्यक् । | |
| अच् | दक्षिणा | गामात् दक्षिण पर्वतो विद्यते । | |
| आहि | दक्षिणाहि / उत्तराहि | मन्दिरात् दक्षिणाहि उपवनमस्ति । | |
| | प्रभृति<br>आरभ्य | वाल्यात् प्रभृति / आरभ्य स साधुः । | |
| | बहिः | देशाद् बहिः तस्य यशो विद्यते । | |

२. पृथग् विना नानाभिस्तृतीयाऽन्यतरस्याम् (पा.सू. २/३/३२)

एभिर्योगे द्वितीया, तृतीया, पञ्चमी च भवन्ति ।

पृथक् पृथक् रामं रामेण रामाद् वा ।

विना विना धर्मं धर्मेण धर्माद् वा सुखं नास्ति ।

नाना नाना मित्रं मित्रेण मित्राद् वा जीवनं वृथा ।

३. दूरान्तिकार्थेभ्यो द्वितीया च (पा.सू. २/३/३५)

प्रातिपदिकार्थमात्रे विधिरयम् । एभ्यः द्वितीया तृतीया पञ्चमी इति विभक्तित्रय-मुपतिष्ठते । उदाहरणम्

ग्रामस्य दूरं दूरात् दूरेण वा शस्यक्षेत्रमस्ति ।

विद्यालयस्य अन्तिकं अन्तिकात् अन्तिकेन वा मम गृहम् ।

४. करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य (पा.सू. २/३/३३)

सत्त्वम् = द्रव्यम् । न सत्त्वम् = असत्त्वम् । एभ्योऽद्रव्यवचनेभ्य: करणे तृतीयापञ्चम्यौ स्त: । उदा. स्तोकेन स्तोकाद्वा मुक्त: ।

५. विभाषा गुणेऽस्त्रियाम् (पा.सू. २/३/२५)

गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात् । जाड्यात् जाड्येन वा वद्ध: ।

६. अकर्तर्यृणे पञ्चमी (पा.सू. २/३/२४)

कर्त्तृवर्जितं यद्दणं हेतुभूतं तत: पञ्चमी स्यात् । उदा. शताद्वद्ध:, शतेन बन्धित: ।

**स्वावलोकनप्रश्नाः**

१. 'आरात्' इति योगे का विभक्ति: ?

२. 'दक्षिणाहि' इति योगे का विभक्ति: ?

३. 'बहि:' योगे का विभक्ति: ?

४. 'विना' इति योगे का विभक्तय: भवन्ति ?

५. हेतौ अस्त्रीलिङ्गे का विभक्ति: ?

६. शताद् वद्ध: इत्यत्र 'शताद्' इति पदे केन सूत्रेण पञ्चमी ?

## ९.१२. सारांश:

चतुर्थीविभक्तिविधाने सम्प्रदानसंज्ञा नियामिका भवति । 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति तद्विधानार्थं प्रमुखं सूत्रम् वार्त्तिकवचनमपि दृश्यते 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' इति । एतदपेक्षया अनेकानि सूत्राणि सन्ति । चतुर्थ्युपपदविभक्ति: । एकत्र सूत्रे करणसंज्ञा / सम्प्रदानसंज्ञा इति संज्ञाद्वयम् ।

ङसि भ्याम् भ्यस् इति पञ्चमीविभक्ति: । अपादानसंज्ञा, एतस्या: कृते नियामिका भवति । ध्रुवमपायेऽपादानम् इति प्रमुखं सूत्रम् । एतदपेक्षया सप्तसूत्राणि सन्ति । कर्मप्रवचनीययुक्ते पञ्चमी, पुनश्च पञ्चम्युपपदविभक्ति:, एकेन सूत्रेण करणे तृतीया पञ्चमी इति विभक्तिद्वयम् । चत्वारि सूत्राणि सन्ति द्वितीया-तृतीया-पञ्चमी इति विभक्तित्रयं विकल्पेन विधीयते ।

## ९.१३. आदर्शप्रश्ना:

I. **निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)**

१. सम्प्रदानसंज्ञाविधायकानि सूत्राणि निर्दिश्य व्याख्यानं विधेयम् ?

२. चतुर्थ्युपपदविभक्तिस्थलं विचारयत ?

३. अपादानसंज्ञाविधायकानि सूत्राणि निर्दिश्य व्याख्यानं विधेयम् ?

४. पञ्चम्युपपदविभक्तिस्थलं विचारयत ?

II. **विश्लेषणात्मकप्रश्ना: (प्रत्येकं १२/१० अङ्का:)**

१. चतुर्थीविभक्तिविधानोपायान् विमृशत ?

२. चतुर्थीविभक्तिविधायकानि सूत्राणि निर्दिश्य तेषामाशयं लिखत ?

३. चतुर्थ्युपपदविभक्तिविधायकवार्त्तिकवचनानि निर्दिश्य व्याख्यानं कार्य्यम् ?

४. पञ्चमीविभक्तिविधानोपायान् विमृशत ?

५. पञ्चमीविभक्तिविधायकानि सूत्राणि निर्दिश्य तेषामाशयं लिखत ?

६. कर्मप्रवचनीयद्वारा अपादानसंज्ञा तस्या: फलञ्च निरूपयत ?

७. 'अन्यारादितरर्ते दिक्शब्दाञ्चुतरपदाजाहियुक्ते' इति सूत्रव्याख्या कार्य्या ?

८. 'नम:स्वस्तिस्वाहास्वधाऽलंवषट्योगाच्च' इति सूत्रव्याख्या कार्य्या ?

III. **लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)**

१. 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रस्य व्याख्या कार्य्या ?

२. 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप:' इति सूत्रस्य व्याख्या कार्य्या ?

३. सम्प्रदानसंज्ञाया: निषेधस्थलं निर्दिशत ?

४. 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' इति सूत्रस्य व्याख्या कार्य्या ?

५. 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रस्य व्याख्या कार्य्या ?

६. 'ध्रुवमपायेऽपादानम्' इत्यस्य व्याख्यानं विधेयम् ?

७. 'भीत्रार्थानां भयहेतु:' इत्यस्य व्याख्यानं विधेयम् ?

८. 'अन्तर्धौ येनादर्शनमिच्छति' इति सूत्रव्याख्या विधेया ?

IV. **एकाङ्कप्रश्ना: (प्रत्येकं १ अङ्क:)**

१. सम्प्रदानकारके का विभक्ति: ?

२. 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' इत्यनेन किं संज्ञाद्वयं विचार्य्यते ?

३. सम्प्रदानादिसंज्ञा शब्दस्य अर्थस्य वा ?

४. दानीय: विप्र: इत्यत्र सम्प्रदानत्वं केन विधीयते ?

५. चतुर्थीविभक्तिविधाने का संज्ञा नियामिका भवति ?
६. 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति केषां धातूनां कृते उद्दिष्टम् ?
७. 'स्पृहयते: प्रयोगे इष्ट: किं स्यात् ?
८. 'क्रुधद्रुहोरुपसृष्टयो: कर्म' इति सूत्रेण किं विधीयते ?
९. 'परिक्रयणे' इति शब्दस्य का व्युत्पत्ति: ?
१०. अध्वपदेन स्वरूपस्य ग्रहणमर्थस्य ग्रहणं वा ?
११. 'अलम्' इति योगेन का विभक्ति: ?
१२. 'मन्यकर्मण्यनादरे ....' इत्यत्र कस्य 'मन्' धातो: ग्रहणम् ?
१३. उपपदविभक्ते: का विभक्ति: वलीयसी ?
१४. 'नम:' योगे का विभक्ति: ?
१५. 'शवरी फलाय याति' इति वाक्ये 'फलाय' इत्यत्र केन सूत्रेण चतुर्थी ?
१६. अपादानकारके का विभक्ति: ?
१७. पञ्चमीविभक्तिविधाने का संज्ञा नियामिका भवति ?
१८. 'जुगुप्साविरामप्रमादार्थानाम् ....' इति वार्त्तिकेन किं विधीयते ?
१९. को नाम अपाय: ?
२०. ध्रुवमित्यस्य कोऽर्थ: ?
२१. भीत्रार्थानां प्रयोगे क: अपादानसंज्ञो भवति ?
२२. 'मातु: निलीयते कृष्ण:' इत्यत्र अपादानसंज्ञाविधायकं सूत्रं किम् ?
२३. ध्रुवपदग्रहणस्य फलं किम् ?
२४. 'अरण्ये विभेति' इत्यत्र 'अरण्ये' इत्यस्य अपादानं कथं न ?
२५. 'प्रति' कस्मिन्नर्थे कर्मप्रवचनीयसंज्ञको भवति ?
२६. 'आरात्' योगे का विभक्ति: ?
२७. हेतौ अस्त्रीलिङ्गे का विभक्ति: ?
२८. 'बहि:' योगे का विभक्ति: ?
२९. शताद् वद्ध: इत्यत्र शताद् पदे केन सूत्रेण पञ्चमी ?
३०. 'विना' इति योगे का: विभक्तय: भवन्ति ?

## ९.१४. एकाङ्कप्रश्नानामुत्तराणि

१. चतुर्थी २. करणम्, सम्प्रदानम् ३. अर्थस्य ४. अनीयर् प्रत्ययेन ५. सम्प्रदान ६. सकर्मकधातूनाम् ७. सम्प्रदानम् ८. कर्मसंज्ञा ९. क्रयस्य समीपम् १०. अर्थस्य ११. चतुर्थी १२. दिवादिमन्धातो: १३. कारकविभक्ति: १४. चतुर्थी १५. क्रियार्थोपपदस्य च

कर्मणि स्थानिनः १६. पञ्चमी १७. अपादानसंज्ञा १८. अपादानसंज्ञा १९. विश्लेषः २०. अवधिभूतम् २१. भयहेतुः २२. अन्तर्द्धौ येनादर्शनमिच्छति २३. कर्त्तुः अपादानसंज्ञावारणम् २४. भयहेतोरभावात् २५. प्रतिनिधिः २६. पञ्चमी २७. पञ्चमी २८. पञ्चमी २९. अकर्तर्यृणे पञ्चमी ३०. द्वितीया, तृतीया, पञ्चमी ।

**********

## ।। दशमखण्डः ।।

## षष्ठी–सप्तमी–विभक्तिविधानविचारः

### १०.१. प्रस्तावना

ङस्–ओस्–आम् इति विभक्तिक्रमे षष्ठीविभक्तिः । तस्याः विधानार्थं कौमुद्यां २६ सूत्राणि ०६ वार्त्तिकवचनानि विद्यन्ते । षष्ठीकारकविभक्तिः, सम्बन्धार्थिका षष्ठीविभक्तिः, षष्ठ्युपपदविभक्तिश्चेति भावेन विधानव्यवस्थायाः विभिन्नता । सूत्रकाराद् विधानव्यवस्थायामुपायत्रयं प्रतिपन्नं विद्यते १. कारकषष्ठी २. निर्द्दिष्टप्रत्यययोगे षष्ठी ३. निर्द्दिष्टशब्दप्रयोगे षष्ठी । कारकषष्ठीविषये विचारोऽपेक्षितो वर्त्तते । तदर्थं 'कर्तृ–कर्म–करण' इत्युच्चार्य्य सा व्यवस्था १० सूत्रैः नियम्यते । निर्द्दिष्टप्रत्ययद्वारा षष्ठी, तदर्थं अष्टौ सूत्राणि एकेन सूत्रेण निषेधः । एवञ्च निर्द्दिष्टशब्दप्रयोग–द्वारा (उपपदद्वारा) षष्ठी, तदर्थं पञ्च सूत्राणि ।

ङि–ओस्–सुप् इति विभक्तिक्रमे सप्तमीविभक्तिः । तस्याः विधानार्थं कौमुद्यां १५ सूत्राणि ०५ वार्त्तिकानि विद्यन्ते । उपायचतुष्टयेन सा विधानव्यवस्था १. अधिकरणकारके सप्तमीविभक्तिः २. कर्मप्रवचनीययोगे सप्तमीविभक्तिः ३. निर्द्दिष्टोपपदद्वारा सप्तमीविभक्तिः ४. निर्द्दिष्टार्थे निर्द्दिष्टप्रसङ्गे च सप्तमीविभक्तिः इति । एतस्याः विभक्तेः विधाने इयं विशेषता यत् उपपदविभक्तिविचारप्रसङ्गे पुनश्च, निर्द्दिष्टार्थप्रतिपादनपूर्वकविभक्तिविधानविचारप्रसङ्गे षष्ठी–सप्तमी, ततीया–सप्तमी इति विभक्तिद्वयस्य प्रसङ्गः प्रतिपद्यते । अधिकरणकारके भावे कर्मप्रवचनीययोगे च सप्तमीविभक्तिविधानव्यवस्था उपपन्ना विद्यते ।

### १०.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे अधोलिखितान् विन्दून् अधिगमिष्यन्ति ।

. सम्बन्धार्थिकां षष्ठीविभक्तिमधिगमिष्यन्ति ।

. षष्ठीकारकविभक्तिविधानव्यवस्थां ज्ञास्यन्ति ।

. निर्द्दिष्टप्रत्यययोगे षष्ठीविभक्तिविधानव्यवस्थामवगमिष्यन्ति ।

. निर्द्दिष्टशब्दप्रयोगे (उपपदविभक्तिः) षष्ठीविभक्तिविधानव्यवस्थां ज्ञास्यन्ति ।

. अधिकरणकारके सप्तमीविभक्तिविधानव्यवस्थां ज्ञास्यन्ति ।

. कर्मप्रवचनीययोगे विधीयमानां सप्तमीविभक्तिविधानव्यवस्थामधिगमिष्यन्ति ।

. निर्द्दिष्टोपपदद्वारा सप्तमीविभक्तिविधानव्यवस्थां ज्ञास्यन्ति ।

. निर्द्दिष्टार्थे निर्द्दिष्टप्रसङ्गे च सप्तमीविभक्तिविधानव्यवस्थामवगमिष्यन्ति ।

## १०.३. सम्बन्धार्थिका षष्ठीविभक्तिः

षष्ठीविभक्तिः मुख्यतया सम्बन्धे विधीयते । कर्मादीनां कारकाणां सम्बन्धविवक्षायां षष्ठीविभक्तिः भवतीति व्यवस्था । कर्मादीनां सम्बन्धमात्रविवक्षायां षष्ठ्येव । यथा भजे शम्भोः चरणे । अत्र 'चरणे' इति कर्मणि द्वितीया, सम्बन्धविवक्षायां षष्ठी भजे शम्भोः चरणयोः । एवं राज्ञः पुरुषः, वृक्षस्य शाखा, पशोः पादः, इत्यादीनि उदाहरणानि ।

कारकेभ्योऽन्यः, कर्मादिविशेषलक्षणेभ्यः षड्भ्योऽन्यः सम्बन्ध इति । 'षष्ठी शेषे' इति सूत्रस्थ 'शेष'पदस्य व्याख्या अनेनैवोपायेन प्रतिपादिता कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः । अयञ्च सम्बन्धः अनेकविधः ।

१. स्वस्वामिभावः नृपस्य धनम् ।
२. जन्यजनकभावः पितुः तनयः ।
३. उत्पाद्योत्पादकभावः कार्य्यस्य फलम् ।
४. अवयवायविभावः शरीरस्य पादौ ।
५. खाद्यखादकभावः अश्वस्य घासः ।
६. कार्य्यकारणभावः वस्त्रस्य तन्तुः ।
७. आधाराधेयभावः गङ्गायाः जलम् । प्रभृतयः ।

भर्तृहरिणा वाक्यपदीये उक्तम्

सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां वा क्रियया योऽभिधीयते ।।

अस्याः सर्वथा सम्बन्धर्थता । नेयं कारकविभक्तिरिति मतभेदः ।

**स्वावलोकनप्रश्नाः**

१. कर्मादीनां सम्बन्धमात्रविवक्षायां का विभक्तिः ?

२. कः शेषः ?

३. नृपस्य धनम् इत्यत्र कः सम्बन्धः ?

४. 'गङ्गायाः जलम्' इत्यत्र कः सम्बन्धः ?

५. 'वस्त्रस्य तन्तुः' इत्यत्र कः सम्बन्धः ?

## १०.४. षष्ठी कारकविभक्तिः

सम्बन्धमात्रे षष्ठीविभक्तिः विधीयते । अतः कारकत्वं नास्तीति केषाञ्चिदाशयः क्रियाजनकत्वं कारकत्वमिति वादिनां मतमिदम् । किन्तु क्रियान्वयित्वं कारकत्वमिति पक्षे परम्परासम्बन्धेन क्रियायोगकल्पनात् कारकत्वं स्वीकर्त्तुं शक्यते । कर्मादिषु कारकेषु षष्ठीविभक्तेः प्रयोगः दृश्यते । पाणिनीयसूत्रेऽपि तत्तत्कारकसाक्षादुक्त्या अस्याः विभक्तेः विधानं प्राप्यते । अतस्तेनैवोपायेन कारकत्वमुपकल्पितं जायते । कौमुद्यां तानि च सूत्राणि

१. कर्त्तृकर्मणोः कृति (पा.सू. २/३/६५)

कृद्योगे कर्त्तरि कर्मणि च षष्ठी स्यात् । उदा. कृष्णस्य कृतिः । कृतिग्रहणात् तद्धितप्रत्ययस्य वारणं जायते । अतः 'कृतपूर्वी कटम्' इति ।

२. उभयप्राप्तौ कर्मणि (पा.सू. २/३/६६)

उभयोः कर्त्तृकर्मणोः यदा कृद्योगे षष्ठी तदा केवलं कर्मण्येव षष्ठी ।

आश्चर्य्यो गवां दोहोऽगोपेन ।

I. स्त्रीप्रत्यययोरककारयोर्नायं नियमः (वा)

भेदिका विभित्सा वा रूद्रस्य जगतः ।

II. स्त्रीप्रत्यय इत्येके (वा) विचित्रा जगतः कृतिर्हरेः हरिणा वा ।

केचिदविशेषेण विभाषामिच्छन्ति शब्दानामनुशासनमाचार्य्येण आचार्य्यास्य वा ।

३. ज्ञोऽविदर्थस्य करणे (पा.सू. २/३/५१)

जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् । उदा. सर्पिषो ज्ञानम् ।

४. अधिगर्थदयेशां कर्मणि (पा.सू. २/३/५२)

'इक्स्मरणे' नित्यमधिपूर्वः, तस्यार्थः इवार्थो यस्य सः अधीगर्थः, दय, इश एषां कर्मणि षष्ठी स्यात् । मातुः स्मरणम्, सर्पिषो दयनम्,

५. कृञः प्रतिपत्ने (पा.सू. २/३/५३)

प्रतियत्नो गुणाधानम् । कृञः कर्मणि शेषे षष्ठी स्याद् गुणाधाने ।

उदा. एधोदकस्योपस्करणम् ।

६. रुजार्थानां भाववचनानामज्वरेः (पा.सू. २/३/५४)

भावकर्त्तृकाणां ज्वरवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् । चौरस्य रोगस्य रुजा ।

I. अज्वरिसन्ताप्योरिति वाच्यम् (वा)

रुजार्थानां भाववचनानां ज्वरिसन्तापिवर्जितानां कर्मणि शेषे षष्ठी स्यात् ।

उदा. रोगस्य चौरज्वरः ।

७. आशिषि नाथः (पा.सू. २/३/५५)

आशीरर्थस्य नाथतेः कर्मणि षष्ठी स्यात् । उदा. सर्पिषो नाथनम् ।

८. जासिनिग्रहणनाटकाथपिषां हिंसायाम् (पा.सू. २/३/५६)

जसुधातोः चौरादिकस्य निपूर्वकस्य प्रपूर्वकस्य हन् धातोः नाट क्राथ पिष इत्येतेषां च हिंसाक्रियाणाम् कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी स्यात् ।

उदा. चौरस्य उज्जासयति, दुष्टस्य निग्रहन्ति, वृषलस्य निहन्ति, चौरस्य प्रहन्ति ।

९. व्यवहृपणोः समर्थयोः (पा.सू. २/३/५७)

वि अव पूर्वको यो हृञ् धातुः पण धातुश्च तयोः समर्थयोः कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी स्यात् । उदा. शतस्य व्यवहरति, शतस्य पणते ।

१०. दिस्तदर्थस्य (पा.सू. २/३/५८)

व्यवहारार्थस्य दिव् धातोः अनभिहिते कर्मणि कारके षष्ठी । उदा. शतस्य दीव्यति

११. विभाषोपसर्गस्य (पा.सू. २/३/५९)

व्यवहारार्थकस्य दिव्धातोः सोपसर्गस्य कर्मणि कारके विभाषा षष्ठी स्यात् ।

उदा. शतस्य प्रतिदीव्यति, शतं प्रतिदीव्यति ।

१२. प्रेष्यब्रुवोहविषो देवतासम्प्रदाने (पा.सू. २/३/६१)

देवतासम्प्रदानेऽर्थे वर्त्तमानयोः प्रेष्यब्रुवोः कर्मणो हविषो वाचकात् शब्दात् षष्ठी विभक्तिर्भवति । उदा. अग्नये छागस्य हविषो वपाया मेदसः ।

**स्वावलोकनप्रश्नाः**

१. कृद् योगे का विभक्तिः ?

२. कृद्योगे कुत्र षष्ठी ?

३. मातुः स्मरणम् इत्यत्र केन सूत्रेण षष्ठी ?

४. प्रतियत्नो नाम ?

५. शतस्य दीव्यति इत्यत्र केन सूत्रेण षष्ठी ?

६. सर्पिषो नाथ इत्यत्र केन सूत्रेण षष्ठी ?

| | |
|---|---|
| ७. ......... प्रतिदीव्यति (शत) । उपयुक्तं रूपं निरूपयत ? | |
| ८. ......... व्यवहरति (शत) उपयुक्तं रूपं निरूपयत ? | |

## १०.५. निर्दिष्टप्रत्यययोगे षष्ठीविभक्तिः

निर्दिष्टाः केचन प्रत्ययाः सन्ति, येषां योगेन षष्ठीविभक्तिः विधीयते । ते च प्रत्ययाः अतसर्थप्रत्ययाः, कृत्वोऽर्थप्रत्ययाः, क्तप्रत्ययः, कृत्यप्रत्ययाः इति । तत्प्रत्ययान्तानां शब्दानां योगेन षष्ठीविभक्तिर्भवतीत्यर्थः । एतदर्थं सप्त सूत्राणि वार्त्तिकवचनद्वयम् इति वर्त्तन्ते ।

१. षष्ठ्यतसर्थप्रत्ययेन (पा.सू. २/३/३०)

अतसर्थप्रत्ययेन युक्ते षष्ठीविभक्तिर्भवति । ग्रामस्य दक्षिणतः, उत्तरतः, पुरः, पुरस्तात्, उपरिष्टात् इति ।

दक्षिणोत्तराभ्यामतसुच् (पा.सू. ५/३/२८) इति सूत्रेण अतसुच् प्रत्ययः तत्राधिकारे प्रोक्ताः प्रत्ययाः अतसर्थप्रत्ययाः ।

२. एनपा द्वितीया (पा.सू. २/३/३१)

एनप्प्रत्ययान्तेन योगे द्वितीया भवति । प्राप्तायाः षष्ठीविभक्तेरियं अपवादभूता । ग्रामं दक्षिणेन नदी वहति । इञ्बन्यतरस्यामदूरे (५/३/३५) इति सूत्रेण एनप् प्रत्ययो विधीयते ।

३. क्तस्य च वर्त्तमाने (पा.सू. २/३/६७)

वर्त्तमाने काले विहितस्य क्तप्रत्ययान्तस्य प्रयोगे षष्ठीविभक्तिः भवति । उदा. राज्ञां मतः, बुद्धः, पूजितः । 'मतिबुद्धिपूजार्थेभ्यः वर्त्तमाने क्तः' इति सूत्रेण मत्यर्थक-बुद्ध्यर्थक-पूजार्थकेभ्यः धातुभ्यः वर्त्तमाने काले 'क्त'प्रत्ययो भवति ।

४. अधिकरणवाचिनश्च (पा.सू. २/३/६८)

अधिकरणवाचिनः क्तप्रत्ययान्तस्य योगेन षष्ठीविभक्तिः भवति । क्तोऽधिकरणे ध्रौव्यगतिप्रत्यवसानार्थेभ्यः (पा.सू. ३/४/७६) इति सूत्रेण अधिकरणे क्तप्रत्ययो विहितः । उदा. इदमेषां यातम्, युक्तम्, शयितम्, सुप्तम् इति ।

५. न लोकाव्ययनिष्ठाखलर्थतृनाम् (पा.सू. २/३/६९)

खलोऽर्थः = खलर्थः । खलर्थ एव अर्थो येषां ते खलर्थाः । ल, उ, उक, अव्यय, निष्ठा, खलर्थ, तृन् इत्येतेषां योगे षष्ठी विभक्तिर्न भवति । 'ल'कारस्य स्थाने ये आदेशाः शतृशानचौ, कानच् क्वसू, किकिनौ, एते प्रत्ययाः गृह्यन्ते । उदा. ओदनं

पचन्, पचमानः, पेचानः, कटं चिकीर्षुः, कटं कृत्वा, कृतवान्, कृतम् । कर्त्ता कटं लटः शतृशानचादप्रथमासमानाधिकरणे (पा.सू. ३/२/१२४) इत्यत आरभ्य आ तृनो (पा.सू. ३/२/१३५) इति यावत् ये प्रत्ययाः प्रोक्ताः सन्ति ।

I. कमेरनिषेधः (वा)

कमेर्योगे षष्ठीनिषेधो न भवतीत्यर्थः । उदा. लक्ष्म्याः कामुकः ।

II. द्विषः शतुर्वा (वा) विकल्पेन षष्ठीनिषेधः । सुरस्य सुरं वा द्विषन् ।

६. अकेनोर्भविष्यदाधमर्ण्ययोः (पा.सू. २/३/७०)

भविष्यति आधमर्ण्ये च विहितस्य अकान्तस्य इन्प्रत्ययान्तस्य च प्रयोगे षष्ठीविभक्तिर्न भवति । उदा. कटं कारको व्रजति । शतं दायी ।

७. कृत्यानां कर्त्तरि वा (पा.सू. २/३/७१)

कृत्यप्रत्ययान्तानां प्रयोगे अनभिहिते कर्त्तरि विकल्पेन षष्ठीविभक्तिर्भवति । तव्य–अनीय्–यत्–ण्यत्–क्यप् इति प्रत्ययाः कृत्यप्रत्याः । उदा. देवदत्तस्य / देवदत्तेन कर्त्तव्यः । भवतः / भवता कटः कर्त्तव्यः ।

**स्वावलोकनप्रश्नाः**

१. अतसर्थप्रत्यये युक्ते का विभक्तिः ?

२. 'दक्षिणेन' इति प्रयोगे का विभक्तिः ?

३. वर्त्तमानकालिकक्तप्रत्यययोगेन का विभक्तिः ?

४. 'ओदनं पचन्' इत्यत्र षष्ठीविभक्तेः निषेधः केन सूत्रेण भवति ?

५. कृत्यानां कर्त्तरि का विभक्तिः भवति ?

## १०.६. निर्दिष्टपदद्वारा षष्ठीविभक्तिः

निर्दिष्टपदानां प्रयोगे षष्ठीविभक्तिः विधीयते, सा उपपदविभक्तिनाम्ना व्यवहृता जायते । एतदर्थं चत्वारि सूत्राणि विद्यन्ते ।

१. तुल्यार्थैरतुलोपमाभ्याम् तृतीयाऽन्यतरस्याम् (पा.सू. २/३/७२)

तुल्यः अर्थो येषां ते तुल्यार्थाः । तुल्यार्थैः शब्दैर्योगे शेषे विवक्षिते तृतीयाविभक्तिर्भवति विकल्पेन । अन्यस्मिन् पक्षे षष्ठी । तुलोपमाशब्दं वर्जयित्वा विचारः । उदा.

देवदत्तेन / देवदत्तस्य तुल्यः । देवदत्तेन / देवदत्तस्य सदृशः । देवदत्तेन तुला इति ।

२. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः (पा.सू. २/३/७३)

आशिषि गम्यमानायां आयुष्य, मद्र, भद्र, कुशल, सुख, अर्थ, हित इत्येतैर्योगे शेषे विवक्षिते विकल्पेन चतुर्थी पक्षे षष्ठी भवति । उदा. देवदत्तस्य / देवदत्तेन भद्रम् इत्यादयः प्रयोगाः ।

३. षष्ठी हेतुप्रयोगे (पा.सू. २/३/२६)

हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी भवति । उदा. अन्नस्य हेतो र्धनीकुले भवति ।

४. सर्वनाम्नस्तृतीया च (पा.सू. २७)

सर्वनाम्नो हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये तृतीया स्यात् । 'च'कारात् षष्ठी । पाठस्य हेतोर्वसति । पाठेन हेतुना वसति ।

I. निमित्तपर्य्यायप्रयोगे सर्वासां प्रायदर्शनम् (वा)

निमित्तपर्य्यायाणां प्रयोगे तेभ्यस्तत्समानाधिकरणेभ्यः सर्वासां विभक्तीनां प्रायः प्रयोगो भवति । उदा. किं निमित्तम्, केन निमित्तेन, कस्मै निमित्ताय, कस्य निमित्तस्य, कस्मिन् निमित्ते ।

**स्वावलोकनप्रश्नाः**

१. तुल्यार्थशब्दयोगेन का विभक्तिः ?

२. 'तुल्यार्थैरिति पदस्य का व्युत्पत्तिः ?

३. तुला / उपमा शब्दद्वारा का विभक्तिः ?

४. हेतुशब्दस्य प्रयोगे का विभक्तिः ?

५. निमित्तपर्य्यायप्रयोगे कासां विभक्तीनां प्रयोगः ?

## १०.७. अधिकरणकारके सप्तमीविभक्तिः

सप्तमीविभक्तिविधाने अधिकरणसंज्ञा नियामिका भवति । तच्चाधिकरणम् आधारोऽधिकरणम् (पा.सू. १/४/४५) इति सूत्रादवगम्यते । कर्त्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् ।

आङ्पूर्वकात् धृधातोरधिकरणे घञ्प्रत्यय: (आ+धृ+घञ्) आधीयतेऽस्मिन्नित्याधा: । आधार: = आश्रय: । साक्षात् क्रियाधारत्वं न सम्भवति । साक्षात् फलाधारस्य न खलु अधिकरणसंज्ञा । कर्मसंज्ञया परया बाधात् । साक्षाद् व्यापाराश्रयस्य अधिकरणसंज्ञाऽपि न । परया कर्त्तृसंज्ञया बाधात् । एवञ्च कर्मादिकारकवत् अधिकरणकारकस्य साक्षात् क्रियाश्रयत्वं नास्ति । अत: कर्त्तृकर्मद्वारा तन्निष्ठक्रियाया आधार: कारकमधिकरणसंज्ञं भवतीति कौमुद्यां व्याख्यातम् । भर्तृहरिणा वाक्यपदीये तदेव व्याख्यातम्

कर्त्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम् ।
अकुर्वन् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ।।

कैयटदीक्षितादिप्राचीनमते अधिकरणकारकस्य परम्परासम्बन्धेन क्रियान्वय: । नवीनमतेन साक्षात् क्रियान्वय: । अधिकरणमिति संज्ञा । तस्य शब्दस्य अधिक्रियते इति व्युत्पत्तिलभ्योऽर्थो न गृह्यते । करणसंज्ञाविधायकसूत्रे समाहितम् अस्मिन् कारकाधिकारे शब्दसामर्थ्य-गम्योऽर्थप्रकर्षो नाश्रीयते । अत: गौणमुख्यसाधारणसर्वाधारस्यात्राधारपदेन ग्रहणं जायते । आधार: त्रिविध: औपश्लेषिक: अभिव्यापक: वैषयिकश्चेति भावेन । अधिकरणकारके सप्तमीविभक्ति: विधीयते ।

१. सप्तम्यधिकरणे च (पा.सू. २/३/३६)

अधिकरणे सप्तमी स्यात् । चकाराद् दूरान्तिकार्थेभ्य: सप्तमी । आधारस्तु त्रिविध:

१. औपश्लेषिक: कटे आस्ते । स्थाल्यां पचति ।
२. अभिव्यापक: तिलेषु तैलमस्ति । सर्वस्मिन् आत्माऽस्ति ।
३. वैषयिक: मोक्षे इच्छाऽस्ति । गणिते ज्ञानं विद्यते ।
४. दूरान्तिकार्थेभ्य: वनस्य दूरे अन्तिके वा । वनस्य दूरं, दूराद्, दूरेण / अन्तिकाद्, अन्तिकेन इति चतस्र: विभक्तय: । दूरान्तिकार्थेभ्यो द्वितीया च (पा.सू. २/३/२५) इति सूत्रेण द्वितीया, तृतीया, पञ्चमी ।

**वार्त्तिकम्**

१. क्तस्येन् विषयस्य कर्मण्युपसंख्यानम् (वा. १४८५)

इन् विषयो यस्य । इन् इन्नन्त: । विषय: प्रकृति: 'इष्टादिभ्यश्च' इति सूत्रेण कर्त्तरि इन्प्रत्यय: । वक्तस्य इन्विषयस्य कर्मणि सप्तमी भवतीति ।

उदा. व्याकरणेद अधीती ।

२. साध्वसाधुप्रयोगे च (वा.१४८६)

सप्तमी । कृष्ण: मातरि साधु: । कृष्ण: मातुले असाधु: ।

३. निमित्तात् कर्मयोगे (वा. १४९०)

निमित्तवाचकात् सप्तमी भवति । निमित्तश्चात्र क्रियाफलम् । योग: सम्बन्ध: स च प्राचीनमते संयोग:, समवायश्च । उदा. चर्मणि द्वीपिनं हन्ति । दन्तयो: हन्ति कुञ्जरम् । केषुषु चमरीं हन्ति ।

**स्वावलोकनप्रश्नाः**

१. सप्तमीविभक्तिविधाने का संज्ञा नियामिका भवति ?

२. 'आधार:' इत्यस्य का व्युत्पत्ति: ?

३. साक्षात् फलाधारस्य अधिकरणसंज्ञा कथं न ?

४. अधिकरणकारकस्य साक्षात् क्रियान्वयं नास्तीति कस्य मतम् ?

५. आधार: कतिविध: ?

६. तिलेषु तैलमित्यत्र किम्भूत: आधार: ?

७. दूरान्तिकशब्दयो: कति विभक्तय: साधनीया: भवन्ति ?

८. साध्वसाधुप्रयोगे का विभक्ति: ?

९. 'निमित्तात् कर्मयोगे' का विभक्ति: ?

१०. निमित्तं नाम ?

## १०.८. कर्मप्रवचनीययोगे सप्तमी

अव्ययानां कर्मप्रवचनीयसंज्ञा भवति । कर्मप्रवचनीययोगे द्वितीयापञ्चमीवत् सप्तमी इति विभक्ति: । तदर्थं सूत्रद्वयं

१. अधिरीश्वरे (पा.सू. १/४/९७)

स्वस्वामिसम्बन्धे अधि: कर्मप्रवचनीयसंज्ञ: स्यात् । 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' (पा.सू. २/३/९) इति सूत्रेण सप्तमी । उदा. अधि भुवि राम: ।

२. विभाषा कृञि (पा.सू. १/४/९८)

अधिकरोतौ कर्मप्रवचनीयसंज्ञो भवति अधीश्वरेऽर्थे ।

उदा. माम् अधिकरिष्यति । 'मयि अधिकरिष्यति' ।

**स्वावलोकनप्रश्नाः**

१. 'अधि' कस्मिन्नर्थे कर्मप्रवचनीसंज्ञको भवति ?

२. अधि भुवि रामः इत्यत्र भुवि इत्यत्र केन सूत्रेण सप्तमी ?

३. 'विभाषा कृञि' इति सूत्रेण किं भवति ?

## १.९. निर्दिष्टपदद्वारा सप्तम्याः साधनम् ( उपपदविभक्तिः)

निर्दिष्टपदद्वारा सप्तम्याः साधनमिष्यते । सा उपपदविभक्तिरिति नाम्नाऽभिधीयते । तदर्थं चत्वारि सूत्राणि वर्त्तन्ते ।

१. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च (पा.सू. २/३/३९)

एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः ।

१. स्वामी गवां / गोषु स्वामी ।
२. ईश्वरः गवां / गोषु ईश्वरः ।
३. अधिपतिः गवां / गोषु अधिपति ।
४. दायादः गवां / गोषु दायादः ।
५. साक्षी गवां / गोषु साक्षी ।
६. प्रतिभूः गवां / गोषु प्रतिभूः ।
७. प्रसूतः गवां / गोषु प्रसूतः ।

२. आयुक्तकुशलाभ्यां चासैवायाम्

असेवायां गम्यमानायाम् आयुक्त कुशल इत्येताभ्यां शब्दाभ्यां योगे षष्ठीसप्तम्यौ भवतः । आयुक्तः व्यापारितः ।

उदा. हरिपूजने हरिपूजनस्य वा आयुक्तः / कुशलः ।

३. साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः (पा.सू. २/३/४३)

अर्चा पूजा प्रशंसा वा । साधु निपुण इत्याभ्यां योगे सप्तमी स्यादर्चायाम् न तु प्रतेः प्रयोगे । उदा. मातरि साधुः निपुणो वा ।

I. अप्रत्यादिभिरिति वक्तव्यम् (वा)

साधुनिपुणो वा मातरं प्रति परि अनु वा ।

४. प्रसितोत्सुकाभ्यां तृतीया च (पा.सू. २/३/४४)

प्रसितः आसक्तः । आभ्यां योगे तृतीया सप्तमी च ।

उदा. हरिणा हरौ वा प्रसितः / उत्सुकः ।

५. नक्षत्रे च लुपि (पा.सू. २/३/४५)

लुबन्तात् नक्षत्रशब्दात् तृतीयासप्तमीविभक्ती भवतः ।

उदा. मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ।

६. सप्तमीपञ्चम्यौ कारकमध्ये (पा.सू. २/३/७)

कारकयोर्मध्ये यौ कालाध्वनौ तद्वाचिभ्यां शब्दाभ्यां सप्तमीपञ्चम्यौ विभक्ती भवतः ।

उदा. अद्य देवदत्तः भुक्त्वा द्व्यहाद् द्व्यहे भोक्ता । क्रोशे / क्रोशात् लक्ष्यं भिद्यते ।

**स्वावलोकनप्रश्नाः**

१. स्वामीश्वराधिपति ..... योगे का विभक्तिः ?

२. आयुक्तो ना ?

३. आयुक्तकुशलाभ्यां का विभक्तिः ?

४. साधु निपुण इत्याभ्यां योगे का विभक्तिः ?

५. क्रोशे / क्रोशात् लक्ष्यं भिद्यते इत्यत्र केन सूत्रेण विभक्तिविधानम् ?

## १०.१०. निर्द्दिष्टार्थे निर्द्दिष्टप्रसङ्गे च सप्तमी

निर्द्दिष्टार्थप्रसङ्गे इयं विभक्तिः विधीयते । अनादरे निर्द्धारणे च अर्थागमनसाधने सप्तमी षष्ठी इति विभक्तिद्वयं विचार्य्यते । एतदर्थं चत्वारि सूत्राणि

१. षष्ठी चानादरे (पा.सू. २/३/३८)

अनादरे विषयसप्तमी । अनादरः = तिरस्क्रिया । 'यस्य च भावेन' इत्यनुवर्त्तते । अतः अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते तत षष्ठी सप्तमी इति भवतः । उदा. पितरि रुदति / पितुः रुदतः पुःत्र अगच्छत् । रुदन्तं पितरमनादृत्य पुत्रः पलायितवान् इति तात्पर्य्यम् ।

२. यतश्च निर्द्धारणम् (पा.सू. २/३/४१)

चतुष्टयी शब्दानां प्रवृत्तिः जातिवाचकाः, गुणवाचकाः, क्रियावाचकाः, यदृच्छा–

वाचकाः । यतः समुदायात् । यतः पृथक्करणं तद्वाचकात् शब्दात् षष्ठीसप्तम्यौ स्तः । यश्च निर्धार्य्यते पृथक् क्रियते, यस्मात् निर्धार्य्यते, येन रूपेण निधार्य्यते इति त्रयाणामुपादने सूत्रमिदं प्रवर्त्तते । नृणां / नृषु वा ब्राह्मणः श्रेष्ठः, नरेभ्यः राक्षसः क्रुरतमः इत्यत्र 'पञ्चमीविभक्ते' इति सूत्रेण पञ्चमी ।

३. पञ्चमीविभक्तेः (पा.सू. २/३/४२)

विभागः = विभक्तम् । निर्धार्य्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात् ।

उदा. माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः ।

४. यस्य च भावेन भावलक्षणम् (पा.सू. २/३/३७)

अनेन सूत्रेण विधीयमाना सप्तमी भावे सप्तमी इत्युच्यते । भावो नाम क्रिया । यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात् । उदा. गोषु दुह्यमानासु गतः । अत्र गमनक्रिया गोदोहनक्रियया लक्ष्यते । सवितरि उदिते पद्मं विकसति । पद्मविकसनक्रिया सवितुः उदयक्रियया लक्ष्यते । 'अर्हाणां कर्त्तृत्वेऽनर्हणामकर्त्तृत्वे तद्वैपरीत्ये च' (वा) अर्हाणामनर्हाणां कर्त्तृत्वे विवक्षिते सति तत्र सप्तमी । सत्यु/असत्यु सन्तः/असन्तः आसते ।

**स्वावलोकनप्रश्नाः**

१. अनादरे का विभक्तिः ?

२. निर्द्धारणे का विभक्तिः ?

३. 'नरेभ्यो राक्षसः' क्रुरतमः' इत्यत्र 'नरेभ्यः' केन सूत्रेण पञ्चमी ?

४. को नाम भावः ?

५. 'भावे सप्तमी' इत्यस्योदाहरणं देयम् ?

## १०.११. सारांशः

षष्ठीविभक्तेः सप्मीविभक्तेश्च विधानमधिगतम् । षष्ठीविभक्तेः विधानप्रसङ्गे कारकषष्ठी, निर्द्दिषटप्रत्यययोगे षष्ठी, निर्द्दिष्टशब्दप्रयोगे षष्ठी इत्युपायत्रयं पुरस्कृतम् । कारकषष्ठ्याः कृते सूत्रेषु कर्मादिकारकबोधकपदमुच्चरितं विद्यते । तेषां कारकाणां शेषत्वविवक्षायां षष्ठी । कर्त्तरि कर्मणि अधिकरणे च षष्ठी प्रतिपन्ना विद्यते । अत्र विधौ २६ सूत्राणि ०६ वार्त्तिकवचनानि सन्ति ।

सप्तमीविभक्तिः अधिकरणकारकाद् विचार्य्यते । कर्मप्रवचनीययोगे सप्तमी । 'अधि' इति कर्मप्रवचनीयः ईश्वरेऽर्थे सा संज्ञा । कृञ्धातुसमभिव्याहारेण विकल्पेन 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञा । एवञ्च सप्तम्युपपदविभक्तिः तदर्थं षट् सूत्राणि षष्ठी / सप्तमी इति विभक्तिद्वयस्य विधानम् । स्वामी, ईश्वरः, अधिपतिः, दायादः, साक्षी, प्रतिभूः, प्रसूतः, आयुक्तः, कुशलः, साधु, निपुण, प्रसित, उत्सुक इति नामानि उपपदरूपाणि । निर्दिष्टार्थे निर्दिष्टप्रसङ्गे च सप्तमी । निर्द्धारणे, अनादारे, षष्ठी/सप्तमी । भावे सप्तमी इति व्यवस्था ।

## १.१२. आदर्शप्रश्नाः

### I. निबन्धात्मकाः प्रश्नाः (प्रत्येकम् २०/१५ अङ्काः)

१. षष्ठीकारकविभक्तिमुपस्थापयत ?

२. निर्दिष्टप्रत्यययोगे षष्ठीविभक्तिविधानप्रसङ्गमुपस्थापयत ?

३. निर्दिष्टपदद्वारा सप्तमीविभक्तिप्रसङ्गं विचारयत ?

४. निर्दिष्टार्थे सप्तमीविभक्तिप्रसङ्गमुपस्थापयत ?

### II. विश्लेषणात्मकाः प्रश्नाः (प्रत्येकं १५/१० अङ्काः)

१. सम्बन्धार्थिकां षष्ठीविभक्तिविचारमुपस्थापयत ?

२. निर्दिष्टपदद्वारा षष्ठीविभक्तिप्रसङ्गं विचारयत ?

३. अधिकरणकारके सप्तमीविभक्तिं विचारयत ?

४. कर्मप्रवचनीययोगे सप्तमीविभक्तिविधानमुपस्थापयत ?

५. एकत्र प्रयोगे षष्ठीविभक्तेः सप्तमीविभक्तेश्च प्रसङ्गमुत्थापयत ?

६. 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इति सूत्रस्य व्याख्या कार्य्या ?

### III. लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)

१. 'कृद्योगे षष्ठी' इति विवेचयत ?

२. 'न लोकाव्ययनिष्ठखलर्थातृनाम्' इति सूत्रस्य व्याख्या कार्य्या ?

३. 'कृत्यानां कर्त्तरि वा' इति विवेचयत ?

४. 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः इत्यस्य व्याख्या विधेया ।

५. 'यतश्च निर्द्धारणम्' इत्यस्य व्याख्या कार्य्या ?

६. 'सप्तमीपञ्चम्यौ कारकमध्ये' इत्यस्य व्याख्या विधेया ?

७. 'यस्य च भावेन भावलक्षणम् इति सूत्रस्य व्याख्या कार्य्या ?

८. 'सर्वनाम्नस्तृतीया च' इति सूत्रस्याशयं लिखत ?

९. 'अतसर्थप्रत्यययोगे षष्ठी' इत्युदाहरणमुखेन प्रतिपादयत ?

१०. दूरान्तिकशब्दयोः प्रयोगे विभक्तिविधानव्यवस्थां विचारयत ?

IV. **एकाङ्कप्रश्नाः (प्रत्येकम् एकाङ्कः)**

१. कर्मादीनां सम्बन्धमात्रविवक्षायां का विभक्तिः ?

२. कः शेषः ?

३. 'नृपस्य धनम्' इत्यत्र कः सम्बन्धः ?

४. 'गङ्गायाः जलम्' इत्यत्र कः सम्बन्धः ?

५. कृद्योगे का विभक्तिः ?

६. मातुः स्मरणम्' इत्यत्र केन सूत्रेण षष्ठी ?

७. प्रतियत्नो नाम ?

८. ........... प्रतिदीव्यति (शत) उपयुक्तं रूपं निरूपयत ?

९. अतसर्थप्रत्ययेन युक्ते का विभक्तिः ?

१०. 'दक्षिणेन' इति प्रयोगे का विभक्तिः ?

११. वर्त्तमानकालिक 'क्त' प्रत्यययोगेन का विभक्तिः ?

१२. 'ओदनं पचन्' इत्यत्र षष्ठीविभक्तेः निषेधः केन सूत्रेण ?

१३. कृत्यानां कर्त्तरि का विभक्तिः ?

१४. तुल्यार्थशब्दयोगेन का विभक्तिः ?

१५. निमित्तपर्य्यायप्रयोगे कासां विभक्तीनां प्रयोगः ?

१६. सप्तमीविभक्तिविधाने का संज्ञा नियामिका भवति ?

१७. 'आधारः' इत्यस्य का व्युत्पत्तिः ?

१८. आधारः कतिविधः ?

१९. साध्वसाधुप्रयोगे का विभक्तिः ?

२०. निमित्तात् कर्मयोगे का विभक्तिः ?

२१. अनादरे का विभक्तिः ?

२२. निर्द्धारणे का विभक्तिः ?

२३. को नाम भावः ?

२४. 'नरेभ्यः राक्षसः क्रुरतमः' इति वाक्ये 'नरेभ्यः' इति केन सूत्रेण पञ्चमी ?

२५. स्वामीस्वराधिपति ...... योगे का विभक्तिः ?

## १.१३. एकाङ्कप्रश्नानामुत्तरम्

१. षष्ठी २. कारकप्रातिपदिकार्थव्यतिरिक्त: स्वस्वामिभावादिसम्बन्ध: शेष: ३. स्वस्वामिभाव: ४. आधाराधेयभाव: ५. षष्ठी ६. अधीगर्थदयेशां कर्मणि ७. गुणाधानम् ८. शतस्य / शतं ९. षष्ठी १०. षष्ठी ११. षष्ठी १२. न लोकाव्ययनिष्ठखलर्थतृनाम् १३. षष्ठी १४. षष्ठी / तृतीया १५. सर्वासां १६. अधिकरण १७. आध्रियते अस्मिन् अधिकरणे घञ् १८. त्रिविध: १९. सप्तमी २० सप्तमी २१. षष्ठी / सप्तमी २२. षष्ठी/सप्तमी २३. क्रिया २४. पञ्चमीविभक्ते: २५. सप्तमी ।

*******